A.C. Joshi Library
P.U. Chandigarh

MSS No. 172 Subject Philosophy

Name of MSS भगवद् गीता भाष्य

Author शंकर व्या०

Period 1827 विक्रमी Folios 127

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 17, 127, 128, 129

भगवद्गीता भाष्य ॥ शांकर
व्या०
मिन प० लं० अ० १२ पं० प्र० प्र०

हं० लं०

172

172

तदन्तर्वलनवाले नोट: तोऽन्यांश्च सनकसनंदनादीनुत्पाद्य निवृ हर २ त्तिधर्मज्ञानवैराग्यलक्षणं ग्राहयामास २

श्रीगणेशायनमः श्रीब्रह्मायनमः श्रीगुरुवेनमः श्रीरुद्रायनमः श्रीसरस्वत्यैनमः श्रीरामायनमः शंकरायनमः

ॐ नारायणः परोऽव्यक्तादंडमव्यक्तसम्भवं अंडस्यांतस्त्विमे लोकाः सप्तद्वीपा च मेदिनी॥ ॥स भगवान्सृष्ट्वेदं जग

त्तस्य च स्थितिं चिकीर्षुर्मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन्प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तं द्विविधो हि वेदोक्तो

धर्मः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च जगतः स्थितिकारणं प्राणिनामभ्युदयनिःश्रेयसहेतुर्यः स धर्मो ब्रा

श्रेयोऽर्थिभि ३५ ह्मणाद्यैर्वर्णिभिराश्रमिभिश्चानुष्ठीयमानो दीर्घेण कालेनानुष्ठातॄणां कामोद्भवाद्धीयमानविज्ञानहेतुकेनाधर्मेणा

प्रद भिभूयमाने धर्मे वर्धमाने चाधर्मे जगतः स्थितिं परिपिपालयिषुः स आदिकर्ता नारायणाख्यो विष्णुर्भौमस्य ब्रह्मणो ब्राह्म

स्थ५ णत्वे रक्षणार्थं देवक्यां वसुदेवादंशेन किल संबभूव ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्याद्वैदिको धर्मस्तदधीनत्वाद्वर्णाश्रम

भेदानां॥ स च भगवान्ज्ञानैश्वर्यबलवीर्यतेजोभिः सदा सम्पन्नस्त्रिगुणात्मिकां वैष्णवीं स्वां मायां प्रकृतिं वशीकृत्याजोऽव्य ख

कृता वता योभूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन्मायया देहवानिव लोकानुग्रहं कुर्वन्निव लक्ष्यते स्वप्रयोजनाभावे

रेण ५ भूतानुजिघृक्षया वैदिकं हि धर्मद्वयमर्जुनाय शोकमोहमहोदधौ निमग्नायोपदिदेश गुणाधिकैर्गृहीतोऽनुष्ठीयमानश्च मार

धर्मः प्रचयं गमिष्यतीति तं धर्मं भगवता यथोपदिष्टं भगवान्वेदव्यासः सर्वज्ञो गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबंध

शक्ति४ यथोक्तं से४ जातरवचर२ मल४

इवशब्दाज्जातं देहादेरवस्तुत्वेन कल्पितत्वं सूचितं सामान्यप्रकरणेनात्र प्रमाणेनाप्रत्यादि ... गी॰ भा॰

धा। तदिदं गीताशास्त्रं समस्तवेदार्थसंग्रहभूतं दुर्विज्ञेयार्थं तदर्थाविष्करणायानेकैर्वि तपदपदार्थवेय मप्यत्यं
ताविरुद्धानेकार्थत्वेन लौकिकैर्गृह्यमाणमुपलभ्याहं विवेकतोऽर्थनिर्धारणार्थं संक्षेपतो विवरणं करिष्यामि। तस्यास्य
गीता शास्त्रस्य संक्षेपतः प्रयोजनं निःश्रेयसं सहेतुकस्य संसारस्यात्यंतोपरमलक्षणं। तच्च सर्वकर्मसन्यासपूर्वकादात्म निःश्रेयसं
ज्ञाननिष्ठारूपाद्धर्माद्भवति। तथेममेव गीतार्थं धर्ममुद्दिश्य भगवतोक्तं स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने। इत्यनु
किंचान्यद वि५ गीतासु तत्रैवोक्तं। नैव धर्मी न चाधर्मी न चापि हि शुभाशुभी यः स्यादेकासने लीनस्तूष्णीं किंचिदचिंतयन् ज्ञानं सन्यासलक्ष
णमिति च। इह चापि अंते उक्तमर्जुनाय। सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज इति। अभ्युदयार्थोऽपि प्रवृत्तिलक्षणो धर्मो
श्य५ वर्णानाश्रमांश्चोद्दिश्य विहितः स देवादिस्थानप्राप्तिहेतुरपि सन्नीश्वरार्पणबुद्ध्यानुष्ठीयमानः सत्वशुद्धये भवति फलाभि
संधिवर्जितः। शुद्धसत्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते। त
चेममर्थमभिसंधाय थाँ वक्ष्यति। ब्रह्मण्याधाय कर्माणि योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये इति। इमं द्विःप्रकारं धर्मं निःश्रेयसः प्रयोजनं
परमार्थतत्वं वासुदेवाख्यं च परं ब्रह्माभिधेयभूतं विशेषतोऽभिव्यंजयद्विशिष्टप्रयोजनसंबंधाभिधेयवद्गीताशास्त्रं यत
स्तदर्थविज्ञाने समस्तपुरुषार्थसिद्धिरित्यतस्तद्विवरणे यत्नः क्रियते मया। अत्र च तु दृष्ट्वा तु पा ण्डवानीकमित्यं ता

स्वजन २ मेव तं भूता २ भ्रांति १

आरभ्य यावन्न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव हेत्येतदंतः प्राणिनां शोकमोहादिसंसारबीजं दोषोद्भवकारणप्रद
र्शनार्थत्वेन व्याख्येयो ग्रंथः। तथा ह्यर्जुनेन राज्यगुरुपुत्रमित्रसुहृत्संबंधिबांधवेष्वहमेषां ममैते इत्येवंप्रत्ययनिमित्तस्ने
हविच्छेदादिनिमित्तावात्मनः शोकमोहौ प्रदर्शितौ कथं भीष्ममहं संख्य इत्यादिना शोकमोहाभ्यां ह्यभिभूतविवेकविज्ञानस्स्व
त एव क्षात्रधर्मे युद्धे प्रवृत्तोपि तस्माद्युद्धादुपरराम। परधर्मं च भिक्षाजीवनादिकं कर्तुं प्रववृते। तथा च सर्वप्राणिनां शो
कमोहादिदोषाविष्टचेतसां स्वभावत एव स्वधर्मपरित्यागः प्रतिषिद्धसेवा च स्यात्। स्वधर्मप्रवृत्तानामपि तेषां वाङ्मनःकाया
टी नां प्रवृत्तिः फलाभिसंधिपूर्विकैव साहंकारा च भवति। तत्रैवं सति धर्माधर्मोपचयादिष्टानिष्टजन्मसुखदुःखसंप्राप्तिलक्षणः
संसारोनुपरतो भवतीत्यतः संसारबीजभूतौ शोकमोहौ तयोश्च सर्वकर्मसंन्यासादात्मज्ञानान्नान्यतो निवृत्तिरिति तदुपदिदिक्षुः सर्वलो
कानुग्रहार्थमर्जुनं निमित्तीकृत्याह भगवान्वासुदेवः॥ अशोच्यानित्यादि॥ अत्र केचिदाहुः सर्वकर्मसंन्यासपूर्वकादात्मज्ञा
ननिष्ठामात्रादेव केवलात्कैवल्यं न प्राप्यत एव। किं तर्हि अग्निहोत्रादिश्रौतस्मार्तसहिताज्ज्ञानात्कैवल्यप्राप्तिरिति सर्वासु
गीतासु निश्चितोर्थ इति॥ ज्ञापकं चाहुरस्यार्थस्य। अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि॥ कर्मण्येवाधिकारस्ते
कुरु कर्मैव तस्मात्त्वमित्यादि। हिंसादियुक्तत्वाद्वैदिकं कर्म न धर्मायेतीयमाशंका न कार्या। कथं क्षात्रं कर्म युद्धलक्षणं गुरु

श्रि ४ पूर्वकात् २ भू ५

अश्वमेधादिकानां २

वा २

भ्रातृपुत्रादिहिंसालक्षणमत्यंतक्रूरमपि स्वधर्म इति कृत्वा नाधर्माय तदकरणे च ततः स्वधर्मं कीर्तिं च हित्वा पाप
मवाप्स्यसीति ब्रुवता यावज्जीवादिश्रुतिचोदितानां पश्वादिहिंसालक्षणानां च धर्माणां प्रागेव नाधर्मत्वमिति स्मृति
श्रितमुक्तं भगवतेति ॥ तदसत् । ज्ञानकर्मनिष्ठयोर्विभागवचनाद्बुद्धिद्वयाश्रययोरशोच्यानित्यादिना ग्रंथेन भगवता या
यावत्स्वधर्ममपि चावेक्ष्येत्येतदंतेन ग्रंथेन यत्परमार्थात्मतत्त्वनिरूपणं कृतं तत्सांख्यं तद्विषया बुद्धिरात्मनो जन्मा
दिविक्रियाभावादकर्तात्मेति प्रकरणार्थनिरूपणेन या जायते सा सांख्यबुद्धिः सा येषामुचिता भवति ते सांख्याः ॥ एतस्या
बुद्धेर्जन्मनः प्रागात्मनो देहादिव्यतिरिक्तकर्तृत्वभोक्तृत्वाद्यपेक्षो धर्माधर्मविवेकपूर्वको मोक्षसाधनानुष्ठाननिरूपण
लक्षणो योगस्तद्विषया बुद्धिर्योगबुद्धिः सा येषां कर्मिणामुचिता भवति ते योगिनः ॥ तथा च भगवता विभक्ते द्वे बुद्धी ॥ एषा ते
भिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ॥ इति तयोश्च सांख्यबुद्ध्याश्रयां ज्ञानयोगेन निष्ठां सांख्यानां विभक्तां वक्ष्यति पुरा
वेदात्मना मया प्रोक्तेति ॥ तथा च योगबुद्ध्याश्रयां कर्मयोगेन निष्ठां विभक्तां वक्ष्यति कर्मयोगेन योगिनामित्येवं सांख्यबुद्धिं यो
गबुद्धिं चाश्रित्य द्वे निष्ठे भगवतोक्ते ज्ञानकर्मणोः कर्तृत्वाकर्तृत्वानेकत्वैकत्वबुद्ध्याश्रययोरेकपुरुषाश्रयत्वासंभवं पश्यता

ज्ञानिनां ५
र्व ५
निर्दिष्टे ४

विभक्ते २ योगिनां २

च २

यथैतद्विभागवचनं तथैव तद्विदर्शितं शास्त्राण्यपीह ब्राह्मणे। एतमेव प्रव्राजिनो लोकमिछंतो ब्राह्मणाः प्रव्रजंतीति सर्वक
र्मसंन्यासं विधाय तदर्थवादेन किं प्रजया करिष्यामो येषां नोयमात्मा [stain] यं लोक इति। तथैव च प्राग्दारपरिग्रहात्पुरुष आत्मा प्रा
कृतो धर्मजिज्ञासोत्तरकालं लोकत्रयसाधनं पुत्रं द्विप्रकारं वित्तं मानुषं दैवं च मानुषं कर्मरूपं पितृलोकप्राप्तिसाधनं
विद्यां च दैवं वित्तं देवलोकप्राप्तिसाधनं सोकामयत इत्यविद्याकामवत एव सर्वाणि कर्माणि श्रौतानि दर्शितानि तेभ्यो व्युत्थान
मात्मानमेव लोकमिछंतोकामस्य विहितं तदिदं विभागवचनमनुपपन्नं स्यात्। यदि श्रौतकर्मज्ञानयोः समुच्चयोभिप्रेतो न चार्जु स्यात्५
नस्य प्रश्न उपपन्नो ज्यायसी [stain] चेत्कर्मणास्ते इत्यादिरेकपुरुषानुष्ठेयत्वासंभवं बुद्धिकर्मणोर्भगवता पूर्वमुक्तं कथमर्जुनोश्रु ज्ञ६
तं बुद्धेश्च कर्मणो ज्यायस्त्वं भगवत्यध्यारोपयेन्मृषैव ज्यायसी चेत्कर्मणस्ते मता बुद्धिरिति। किंच यदि बुद्धिकर्मणोः सर्वेषां समुच्च
य उक्तः स्यादर्जुनस्यापि स उक्त एवेति यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितमिति कथमन्यतरानिश्चय एव प्रश्नः स्यात्। न हि पि
त्तप्रशमार्थिनो वैद्येन मधुरं शीतं च भोक्तव्यमित्युपदिष्टे तयोरन्यतरत्पित्तप्रशमकारणं ब्रूहीति प्रश्नः संभवत्यथार्जुनस्य भग
वदुक्तार्थविवेकानवधारणनिमित्तः प्रश्नः कल्प्येत तथापि भगवता प्रश्नानुरूपं प्रतिवचनं देयं मया बुद्धिकर्मणोः समुच्चय उक्तः
किमर्थमित्थं त्वं भ्रांतोसीति न तु पुनः प्रतिवचनमननुरूपं पृष्टादन्यदेव द्वे निष्ठे पुरा मया प्रोक्ते इति वक्तुं युक्तं नापि स्मार्तेनैव क

र्मणा वुद्धेः समुच्चये प्रोक्ते विभागवचनादि सर्वमनुपपन्नं किं च यदात्मज्ञस्य बुद्धस्यार्त्तस्य धर्ममजिजानतः तत्किं कर्मणि घोरे
मां नियोजयसीत्युपालंभोऽनुपपन्नः तस्मान्न गीताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्त्तेन वा कर्मणात्मज्ञानस्य समुच्चयः
नरु केनचिद्दर्शयितुं शक्यः यस्य त्वज्ञानाद्रागादिदोषवतो वा कर्मणि प्रवृत्तस्य यज्ञेन दानेन तपसा वा विशुद्धसत्वस्य ज्ञानमुत्पन्नं
परमार्थतत्वविषयमेकमेवेदं सर्वं ब्रह्माकर्त्तृ चेति तस्य कर्मणि कर्मप्रयोजने च निवृत्तेपि लोकसंग्रहार्थं यथा प्रवृत्तस्तथै पत्नुपर्यं ४
व प्रवृत्तस्य यत्प्रवृत्तिरूपं दृश्यते न तत्कर्म येन बुद्धेः समुच्चयः स्यात् यथा भगवतो वासुदेवस्य क्षात्रधर्मचेष्टितं न ज्ञानेन समु
च्चीयते पुरुषार्थसिद्धये तद्वत्फलाभिसंध्यहंकाराभावस्य तुल्यत्वाद्विदुषः तत्वविन्नाहं करोमीति मन्यते न च फलमभिसन्धत्ते॥
यथा च स्वर्गादिकामार्थिनोग्निहोत्रादिकामसाधनानुष्ठानायाहिताग्नेः काम्ये अग्निहोत्रादौ प्रवृत्तस्य सामि कृते विनष्टेपि कामे तदे
वाग्निहोत्र[illegible]मनुतिष्ठतोपि न तत्काम्यमग्निहोत्रादि भवति तथा दर्शयति भगवान् कुर्वन्नपि न करोति न लिप्यते इति। तत्र [illegible] यत्तु य दर्शितं ४ द्वेः
थोक्तं पूर्वैः पूर्वतरं कृतं कर्म। कर्मणैव हि संसिद्धिमास्थिता जनकादय इति। तत्र प्रविभज्य विज्ञेयं। तत्कथं यदि तावत्पूर्वे जनका
दयस्तत्वविदोपि प्रवृत्तकर्माणः स्युस्ते लोकसंग्रहार्थं गुणा गुणेषु वर्त्तन्त इति ज्ञानेनैव संसिद्धिमास्थिताः कर्मसंन्यासे प्राप्ते
पि कर्मणा सहैव संसिद्धिमास्थिताः न कर्मसंन्यासं कृतवंत इत्यर्थः अथ वा ये तत्वविद ईश्वरसमर्पितेन कर्मणा साधनभू

तुष्टितं ४

शं·भा·

तेन संसिद्धिं सत्त्वशुद्धिं ज्ञानोत्पत्तिलक्षणां वा संसिद्धिमास्थिता जनकादय इति व्याख्येयं तत्रैवार्थं वक्ष्यति भगवान्स
त्त्वशुद्धये कर्म कुर्वन्तीत्येवं कर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इत्युक्त्वा सिद्धिं प्राप्तस्य पुनर्ज्ञाननिष्ठां वक्ष्यति सिद्धिं
प्राप्तो यथा ब्रह्मेत्यादिना तस्माद्गीतासु केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिर्न कर्मसमुच्चितादिति निश्चितोऽर्थः य
था चायमर्थस्तथा प्रकरणशो विभज्य तत्र तत्र दर्शयिष्यामः ॥ तत्र धर्मसंमूढचेतसो महति शोकसागरे निमग्नस्यार्जुना
स्यान्यत्रात्मज्ञानादुद्धरणमपश्यन्भगवान्वासुदेवस्ततोऽर्जुनमुद्दिधीर्षुरात्मज्ञानायावतारयन्नाह ॥ ॥

अ

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ॥ गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ॥ न शोच्या अशोच्या भीष्म
द्रोणादयः सद्वृत्तत्वात्परमार्थस्वरूपेण नित्यत्वात् तानशोच्याननुशोचितवानसि ते म्रियन्ते मन्निमित्तमहं तैर्विनाभूतः किं क
रिष्यामि राज्यसुखादिनेति त्वं प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे । तदेतन्मौढ्यं पाण्डित्यं च विरुद्धमात्मनि दर्शय
सि उन्मत्त इवेत्यभिप्रायः यस्माद्गतप्राणान्मृतानगतासूञ्जीवतश्च नानुशोचन्ति पण्डिताः आत्मज्ञाः पण्डा ह्यात्मविषया बुद्धिर्येषां ते हि पण्डिताः पाण्डित्यं
निर्विद्येति श्रुतेः । परमार्थतस्त्वं तु नित्यानशोच्याननुशोचसि अतो मूढोऽसीत्यभिप्रायः कुतस्ते अशोच्या यतो नित्याः कथं ॥

कथं ते भीष्मद्रोणादयः शोच्याः ... नित्यत्वात् ... अशोच्या इत्युच्यते ... नित्यत्वं ... प्रत्यभिज्ञा

परमार्थतः

नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ॥ न चैव न भविष्यामः सर्वे वयमतः परं ॥ ।जातु कदाचिदहं न नासं किं त्वास
मेवेति विकल्प्याद्यं दूषयति सद्वृत्तत्वादात्मनः ... तस्मान्मुदीरितानि विगीताचारवत्वाद्द्वितीयं शोच्य कुर ...
परमार्थेति प ... रजतेरजतबुद्धिवदशोच्येषु शोच्यबुद्धिर्भ्रान्तिरित्याह ॥ ... ५

४ शं·भा·

आसम्२   न८   नोदेह४   त्रिष्वपि कालेषु२

मेवअतीतेषुदेहोत्पत्तिविनाशेषुनित्य एवाहमासमित्यभिप्रायः। तथा न त्वं नासीः। किं त्वासीरेव। तथा नेमे जनाधिपा नासन्। किं
त्वासन्नेव तथा च न न भविष्यामः किं तु भविष्याम एव सर्वे वयमतोऽस्माद्देहविनाशात्परमुत्तरकालेष्वपि नित्या आत्मस्वरूपेणेत्य
र्थः। देहभेदानुवृत्त्या बहुवचनं नात्मभेदाभिप्रायेण। तत्र कथमिव नित्य आत्मेति दृष्टान्तमाह॥१२॥ देहिनोऽस्मिन्यथा देहे कौ
मारं यौवनं जरा। तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥ ॥देहोऽस्यास्तीति देही तस्य देहवत आत्मनोऽस्मिन्वर्त्तमाने देहे य
था येन प्रकारेण कौमारं कुमारभावो बाल्यावस्था। यौवनं यूनो भावो मध्यमावस्था जरा वयोहानिर्जीर्णावस्थेत्येतास्तिस्रोऽवस्था अ
न्योन्यविलक्षणाः तासां प्रथमावस्थानाशेन न नाशः द्वितीयावस्थोपजनने नोपजन आत्मनः किं तर्ह्यविक्रियस्यैव द्वितीयतृतीयाव न८
स्थाप्राप्तिरात्मनो दृष्टा यथा तद्वदेव देहादन्यो देहो देहान्तरं तस्य प्राप्तिरविक्रियस्यैवात्मन इत्यर्थः। धीरो धीमांस्तत्रैवं सति न मो नमहय५
हमापद्यते। यद्यप्यात्मनाशनिमित्तो मोहो न संभवति नित्य आत्मेति विजानतः। तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौ ध्दिः
किको दृश्यते सुखवियोगनिमित्तो दुःखसंयोगनिमित्तश्च शोक इत्येतदर्जुनस्य वचनमाशंक्याह॥१२॥ मात्रास्पर्शास्तु कौन्तेय शी
तोष्णसुखदुःखदाः। आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥ ॥मात्रा आभिर्मीयन्ते शब्दादय इति श्रोत्रादीनीन्द्रियाणि मात्रा
मात्रा णां स्पर्शाः शब्दादिभिः संयोगाः शीतमुष्णं सुखं दुःखं प्रयच्छन्तीति॥ अथवा स्पृश्यन्त इति स्पर्शा विषया मात्राश्च स्पर्शाश्च शीतोष्णसुखदुः

मात्राः२

ते मात्रास्पर्शाः शीतोष्णसुखदुःखदाः२   देहान्तरप्राप्ति५ ध्दिः   स्पर्शाश्च२

समदुःखसुखं४ समदुःखसुखं४: तं आगमापायर उत्पत्तिलयरूपत्वात् आगमापायर
इति इत्यर्थर

खदाः शीतं कदाचित्सुखं कदाचिद्दुःखं। तयोष्णमप्यनियतरूपं। सुखदुःखे पुनर्नियतरूपतो न व्यभिचरतो। ततस्ताभ्यां शीतो×
ष्णयोः पृथग्ग्रहणं। यस्मात्ते मात्रास्पर्शादय आगमापायिनस्तस्मादनित्यास्तान् शीतोष्णादीन् प्रसहस्व। हर्षं विषादं च मा
कार्षीरित्यर्थः। शीतोष्णाद्यसहमानस्य अनर्थः किं स्यादिति॥१४॥ यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ॥ समदुःखसुखं धीरं सोऽमृ
तत्वाय कल्पते॥ ॥यं पुरुषं समे सुखदुःखे यस्य तं सुखदुःखप्राप्तौ हर्षविषादरहितं धीरं धीमंतं न चालयंति नित्यात्मदर्शना
देते यथोक्ताः शीतादयः। स नित्यात्मस्वरूपदर्शननिष्ठो द्वंद्वसहिष्णुरमृतत्वाय मोक्षायैव समर्थो भवतीत्यर्थः। इतश्च शोकमोहा
वकृत्वा शीतोष्णादिसहनं युक्तं॥१५॥ नासतो विद्यते भावो नाभावो विद्यते सतः॥ उभयोरपि दृष्टोंतस्त्वनयोस्तत्वदर्शिभिः॥ ॥नास
तः अविद्यमानस्य शीतोष्णादेः सकारणस्य न विद्यते भावो भवनमस्तिता। न हि शीतोष्णादिसकारणं प्रमाणैर्निरूप्यमाणं वस्तु सद्भवा
ति। विकारो हि सः। विकारश्च व्यभिचरति। यथा घटादिसंस्थानं चक्षुषा निरूप्यमाणं मृद्व्यतिरेकेणानुपलब्धेरसत्तथा सर्वो विका
रः कारणव्यतिरेकेणानुपलब्धेरसन् जन्मप्रध्वंसाभ्यां प्रागूर्ध्वं चानुपलब्धेः। मृदादिकारणस्य च तत्कारणव्यतिरेकेणानुपल×
ब्धेरसत्वं। असत्वे सर्वतोऽसत्प्रसंग इति चेन्न। सर्वत्र बुद्धिद्वयोपलब्धेर्यद्विषया बुद्धिर्न व्यभिचरति तदसत् यद्विषया च बुद्धिर्व्यभिचर
ति तदसत्। सदसद्विभागे बुद्धितंत्रे सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते समानाधिकरणे न नीलोत्पलवत्। सन्घटः सन्पटः सन्हस्तीते
ता ततर

सर्वत्राबैचर नय नास्ति सकारण सद्बुद्धिरसद्बुद्धिरिति र
भित्यर्थः॥४
रियते इत्यर्थः॥८
द्रिर

शीतोष्णाद
पं०५
ष्णाद
यस्मात र
णाव
नेत्रप्रधाने
द्वात्तस्त्रम
यथापिरि
स्थिरसम
द्वा५

नव्ययपंति
ष्णमततल्लाय५

त्येवं सर्वत्र तयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरति। तथा च दर्शितं॥ ननु सद्बुद्धिरप्यस्माद्घटादिबुद्धिविषययोरसत्त्वात् सद्बुद्धिविषयं
व्यभिचारात्तत्र घटे विनष्टे घटबुद्धौ व्यभिचरन्त्यां सद्बुद्धिरपि व्यभिचरतीति चेन्न। पटादावपि सद्बुद्धिदर्शनात्। विशेषणवि
षयैवसा। सद्बुद्धिर्वद्घटबुद्धिरपि घटांतरे दृश्यते इति चेन्न पटादावदर्शनात्। सद्बुद्धिरपि नष्टे घटे न दृश्यते इति चेन्न। विशे
ष्याभावात्। सद्बुद्धिर्विशेषणविषया सती विशेष्याभावे विशेषणानुपपत्तौ किंविषया स्यात् न तु पुनः सद्बुद्धेर्विषयाभावा
देकाधिकरणत्वं घटादिविशेष्याभावेन न युक्तमिति चेन्नोदकमिदकमिति मरीच्यादावन्यतराभावेपि सामानाधिकरण्य
दर्शनात्। तस्माद्देहादेर्द्वन्द्वस्य च सकारणस्यासतो न विद्यते भावः इति तथा सतश्चात्मनो ऽभावो ऽविद्यमानता न विद्यते सर्वे
त्राव्यभिचारादित्यवोचाम। एवमात्मानात्मनोः सदसतो रुभयोरपि दृष्ट उपलब्धो ऽतो निर्णयः सत्सदेव असदसदे
वेति। अनयोर्यथोक्तयोस्तत्त्वदर्शिभिः। तदिति सर्वनाम सर्वं तत् ब्रह्म तस्य नाम तदिति तद्भावस्तत्त्वं ब्रह्मणो याथात्म्यं द्रष्टुं
शीलं येषां ते तत्त्वदर्शिनस्तैः। त्वमपि तत्त्वदर्शिनां दृष्टिमाश्रित्य शोकं मोहं च हित्वा शीतोष्णादीनि तितिक्षस्वेत्यभिप्रायः॥ किं
पुनस्तद्यत्सदेव सर्वदेत्युच्यते॥ १६॥ अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्॥ विनाशमव्ययस्यास्य न कश्चित्कर्तु
मर्हति॥ ॥ नञ् विनष्टुं शीलमस्येति तु शब्दो ऽसतो विशेषणार्थः। तद्विद्धि जानीहि यत्सत्त्वमाव मविनाशि वस्त्वविशे
[illegible] षेणोक्तं नान्द्विशेषतो दर्शयति। अविषयेन सर्वमिदं जगद्व्याप्तमाकाशमाकाशेनेव घटादयो विनाशमदर्शनमभावमव्यय
किं येन सर्वमिदं जगत्ततं व्याप्तं सदाख्येन १ पदार्थतः स्यात् नियतत्वपाणिं दृष्टान्तिविकारो पमसन्देव मरीचिजलवाभिख्यावमास

विशेष्याभावं तत्त्वास्यासभावात् ४

तत्प्रभुवती त्यर्थः १

तीति मनसि व्यव स्थायं तत्त्या ४

६
शं· गी·

न व्येत्युपचयापच- आत्मनः संबंधिना वस्तुनेत्यर्थः। आत्मा न व्येति। कुतः। आत्मीयाभावात्। आत्मनः आत्मीयत्वमेव नास्तीत्यर्थः १
योनयाति

अन्तवतः ४

स्यै नैतत्सदाख्यं ब्रह्म स्वेन रूपेण व्येति निरवयवत्वाद्देहादिवन्नाप्यात्मीयेनात्मीयाभावाद्यथा देवदत्तो धनहान्या व्येति न त्वे-
वं ब्रह्म व्येत्यतो व्ययस्यास्य ब्रह्मणो विनाशं न कश्चित्कर्त्तुमर्हति। न कश्चिदात्मानं विनाशयितुं शक्नोति ईश्वरोप्यात्मा हि ब्रह्म ४
स्वात्मनि च क्रियाविरोधात्। किं पुनस्तदसद्यत्स्वात्मतत्त्वं व्यभिचरतीत्युच्यते॥ १७॥ अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरि-
णः। अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥ ॥ अन्तो विनाशो येषां ते अन्तवन्तः। यथा मृगतृष्णिकादौ सद्बुद्धिरनुवृत्ता प्रमाणनि-
रूपणान्ते विच्छिद्यते स तस्यान्तः तथेमे देहाः स्वप्नमायादेहादिवच्चान्तवन्तो नित्यस्य शरीरवतोऽनाशिनोऽप्रमेयस्यात्मनोऽन्तव-
न्त इत्युक्ता विवेकिभिरित्यर्थः। नित्यस्यानाशिन इति पुनरुक्तं नित्यस्य द्विविधत्वाल्लोके नाशस्य च यथा देहो भस्मीभूतोऽदर्श-
नं गतो नष्ट उच्यते विद्यमानोऽपि यथान्यथा परिणतो व्याध्यादियुक्तो जातो नष्ट उच्यते तत्र नाशिनो नित्यस्येति द्विविधेनापि
नाशेनासंबंधोऽस्येत्यर्थः। अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यादात्मनस्तन्मा भूदिति नित्यस्यानाशिन इत्याह। नप्रमेयस्य प्र-
त्यक्षादिप्रमाणैरपरिच्छेद्यस्येत्यर्थः। ननु आगमेनात्मा परिच्छिद्यते प्रत्यक्षादिना च पूर्वं ततः स्वतःसिद्धत्वात् तरं। सिद्धे ह्यात्मनि प्र-
मातरि प्रमित्सोः प्रमाणान्वेषणा भवति। न हि पूर्वमित्थमहमात्मानमप्रमाय पश्चात्प्रमेयपरिच्छेदाय प्रवर्त्तते। न ह्यात्मा नाम
कस्यचिदप्रसिद्धो भवति। शास्त्रं त्वन्त्यं प्रमाणमतद्धर्माध्यारोपणमात्रनिवर्त्तकत्वेन प्रमाणत्वमात्मनः प्रतिपद्यते न त्वज्ञा-
तार्थज्ञापकत्वेन। तथा च श्रुतिः। यत्साक्षादपरोक्षाद्ब्रह्म य आत्मेति। यस्मादेवं नित्योऽविक्रियश्चात्मा तस्माद्युध्यस्व युद्धा- श्री ६

अनात्मधर्माध्यारोपणमात्रनिवर्त्तकत्वेनेत्यर्थः २

शं· गी

दुपरमं मा कार्षीरित्यर्थः। न ह्यत्र युद्धकर्त्तव्यता विधीयते। युद्धे प्रवृत्त एव ह्यसौ शोकमोहप्रतिबद्धस्तूष्णीमास्ते। तस्य प्रतिबं
धापनयनमात्रं भगवता क्रियते। तस्माद्युध्यस्वेत्यनुवादमात्रं न विधिः। शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रव
र्त्तकमित्येतस्यार्थस्य साक्षिभूते ऋचावानिनाय भगवान्। यत्तु मन्यसे युद्धे भीष्मादयो मया हन्यंते अहमेषां हंतेत्येषा बुद्धिर्मृषैव ते
कथं॥१८॥ य एनं वेत्ति हंतारं यश्चैनं मन्यते हतं॥ उभौ तौ न विजानीतो नायं हंति न हन्यते॥ ॥य एनं देहिनं प्रकृतं वेत्ति विजानाति हं
तारं हननक्रियायाः कर्त्तारं यश्चैनं मन्यते हतं हननक्रियायाः कर्मभूतं तावुभौ न विजानीतः अविवेकेनात्मानं हंताहं हतोऽहमिति देहहननेन
आत्मानमहंप्रत्ययविषयं यौ विजानीतः तावात्मस्वरूपानभिज्ञावित्यर्थः। यस्मान्नायमात्मा हंति हननक्रियायाः कर्त्ता न च हन्यते। न च हन
नक्रियायाः कर्म भवतीत्यर्थः अविक्रियत्वात्। कथमविक्रिय आत्मेति द्वितीयो मंत्रः॥१९॥ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा
न भूयः॥ अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ ॥न जायते नोत्पद्यते जनिलक्षणा वस्तुविक्रिया नात्मनो विद्य
त इत्यर्थः। तथा न म्रियते वा। वाशब्दश्चार्थे न म्रियते चेत्यंत्या विनाशलक्षणा विक्रिया प्रतिषिध्यते कदाचिच्छब्दः सर्वविक्रियाप्रतिषेधैः
संबध्यते। न कदाचिज्जायते न कदाचिन्म्रियते इत्येवं॥ यस्मादयमात्मा भूत्वा भवनक्रियामनुभूय पश्चादभविता अभावं गंता न भूयः पुन
स्तस्मान्न म्रियते यो हि भूत्वा न भविता स म्रियते इत्युच्यते लोके वाशब्दान्नशब्दाच्चायमात्मा अभूत्वा भविता देहवन्न भूयः पुनस्तस्मान्न जा
यते। यो ह्यभूत्वा भविता स जायते इत्युच्यते नैवमात्मातो न जायते यस्मादेवं तस्मादजो नित्यश्च न म्रियते। यद्यप्याद्यंतयोर्विक्रिययोः प्र

तिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवति तथापि मध्यभाविनीनां विक्रियाणां शब्दैरेव प्रतिषेधः कर्त्तव्य इत्यनुक्तानामपि यौ
वनादिस्य समस्तविक्रियाणां प्रतिषेधो यथा स्यादित्याह। शाश्वत इत्यादि शाश्वत इत्यप यलक्षणाणा विक्रिया प्रतिषिध्यते। शश्वद्भ
वः शाश्वतो नापक्षीयते स्वरूपेण निरवयवत्वान्निर्गुणत्वाच्च नापि गुणक्ष येणापक्षयः अपक्षयविपरीतापि वृद्धिलक्षणा विक्रि
या प्रतिषिध्यते। पुराण इति यो ह्यवयवागमेनोपचीयते स वर्धते अभिनव इति चोच्यते। अयं त्वात्मा निरवयवत्वात्पुरापि नव एवे
ति पुराणो न वर्धत इत्यर्थः। तथा न हन्यते न विपरिणम्यते हन्यमानेपि विपरिणममानेपि शरीरे। हन्तिरत्र विपरिणामार्थो द्रष्टव्यो पुन
रुक्तता ये न विपरिणम्यत इत्यर्थः। अस्मिन्मंत्रे षड्भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषिध्यन्ते सर्वप्रकारविक्रियारहित
आत्मेति वाक्यार्थः। यस्मादेवं तस्मादुभौ तौ न विजानीत इति पूर्वेण मंत्रेणास्य संबंधः। य एनं वेत्ति हन्तारमित्यनेन हननक्रियायाः
कर्त्ता कर्म च न भवतीति प्रतिज्ञाय न जायत इत्यनेनाविक्रियत्वं हेतुमुक्त्वा प्रतिज्ञातार्थमुपसंहरति॥२०॥ वेदाविनाशिनं नित्यं
य एनमजमव्ययं। कथं स पुरुषः पार्थ कं घातयति हन्ति कं॥ ॥वेद विजानाति अविनाशिनं अंत्यभावविकाररहितं नित्यं
विपरिणामरहितं यो वेदेति संबंधः। एनं पूर्वेण मंत्रेणोक्तलक्षणमजमव्ययमपक्षयरहितं कथं केन प्रकारेण स विद्वान्पुरु
षोधिकृतो हन्ति हननक्रियां करोति कथं वा घातयति हन्तारं प्रयोजयति न कथंचिद्धन्ति न कथंचिद्घातयतीत्युभयत्राक्षेप ए
वार्थः प्रश्नासंभवात् हेत्वर्थस्याविक्रियत्वस्य तुल्यत्वाद्विदुषः सर्वकर्मप्रतिषेध एव प्रकरणार्थो ऽभिप्रेतो भगवतः। हन्तेस्त्वादोपादाने पह

वि२

रणाद्यत्वेन विदुषः कं कर्मासंभवहेतुविशेषं पश्यन्कर्माण्याक्षिपति भगवान्कथं स पुरुष इति ननूक्त आत्मनो विक्रि
यत्वे कर्मासंभवकारणविशेषः सत्यमुक्तो न तु कारणविशेषोऽन्यत्वाद्विदुषोऽविक्रियात्आत्मन इति न ह्यविक्रियं स्थाणुं विदि
तवतः कर्म न संभवतीति चेन्न। विदुष आत्मत्वान्न देहादिसंघातस्य विद्वत्ता अतः पारिशेष्यादसंहत आत्मा विद्वानविक्रिय
इति तस्य विदुषः कर्मासंभवादाक्षेपो युक्तः कथं स पुरुष इति। यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्य। अविक्रिय एव सन् बुद्धिवृत्त्यविवेक
ज्ञानेनाविद्ययोपलब्धात्मा कल्प्यते। एवमात्मानात्मविवेकज्ञानेन बुद्धिवृत्त्या विद्ययासत्यरूपयैव परमार्थतोऽविक्रिय एवा
त्मा विद्वानुच्यते। विदुषः कर्मासंभववचनाद्यानि कर्माणि शास्त्रेण विधीयंते तान्यविदुषो विहितानीति भगवतो निश्चयोऽवगम्य
ते। ननु विद्याप्यविदुष एव विधीयते। विदितविद्यस्य पिष्टपेषणवद्विद्यानर्थक्यात्तत्राविदुषः कर्माणि विधीयंते न विदुष इति विशे
षो नोपपद्यते। न। अनुष्ठेयस्य भावाभावविशेषोपपत्तेरग्निहोत्रादिविध्यर्थज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाधनोप
संहारपूर्वकमनुष्ठेयं कर्त्ताहं मम कर्त्तव्यमिति। एवंप्रकारविज्ञानवतोऽविदुषो यथानुष्ठेयं भवति न तु तथा न जायत इत्याद्यात्म
स्वरूपविध्यर्थज्ञानोत्तरकालभावि किंचिदनुष्ठेयं भवति। नाहं कर्त्ता न भोक्तेत्यादिज्ञानमात्मैकत्वाकर्तृत्वज्ञानादुत्पद्यते। विशे
ष उपपद्यते। यः पुनः कर्त्ताहमिति वेत्त्यात्मानं तस्य ममेदं कर्त्तव्यमित्यवश्यंभाविबुद्धिः स्यात्। तदपेक्षया सोऽधिक्रियत इति तं प्रति कर्मा
णि संभवंति। स चाविद्वानुभौ तौ न विजानीत इति वचनात्। विशेषितस्य च विदुषः कर्माक्षेपवचनात्। कथं स पुरुष इति। तस्माद्विदुषो मम

दोऽस्य सर्वकर्मसंन्यास एवाधिकारः अत एव भगवान्नारायणः सांख्यान्विदुषः अविदुषश्च कर्मिणः प्रविज्य द्वे निष्ठे ग्राहयति ज्ञान
योगेन सांख्यानां कर्मयोगेन योगिनामिति। तथा च पुत्रायाह भगवान्व्यासो द्वाविमावथ पंथानावित्यादि तथा क्रियापथश्चैव पुरस्ता
त्संन्यासश्चेत्येवमेव विभागं पुनर्दर्शयिष्यति भगवान्। अतत्त्वविदहंकारविमूढात्मा कर्त्ताहमिति मन्यते तत्त्ववित्तु नाहं करोमीति तथा च
सर्वकर्माणि मनसा संन्यस्य स्यास्त इति। तत्र केचित्पंडितंमन्या वदंति जन्मादिषड्भावविकाररहितोऽविक्रियोऽकर्त्तैकोऽहमात्मेति न क
स्यचिज्ज्ञानमुत्पद्यते। यस्मिन्सति सर्वकर्मसंन्यास उपदिश्यते न न जायत इत्यादिशास्त्रोपदेशानर्थक्यप्रसंगात् यथा च शास्त्रोपदेशसाम
र्थ्याद्धर्माधर्मास्तित्वविज्ञानं कर्त्तुर्देहांतरसंबंधिविज्ञानमुत्पद्यते तथा शास्त्रात्तस्यैवात्मनोऽविक्रियत्वाकर्त्तृकत्वैकत्वादिविज्ञानं कस्मा
न्नोत्पद्यते। इति प्रष्टव्यास्ते करणागोचरत्वादिति चेन्न मनसैवानुद्रष्टव्यमिति श्रुतेः शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मद
र्शने करणं तथा च तदधिगमायानुमाने आगमे च सति ज्ञानं नोत्पद्यत इति साहसमात्रमेतत् ज्ञानं चोत्पद्यमानं तद्विपरीतमज्ञानमव
ग्रं ४ श्यं बाधत इत्यभ्युपगंतव्यं। त ज्ञानं दर्शितं हंता हं हतोऽस्मीति उभौ तौ न विजानीत इत्यत्र चात्मनो हननक्रियायाः कर्त्तृत्वं कर्मत्वं ज्ञान
कृतं दर्शितं तत सर्वक्रियास्वपि समानं कर्त्तृत्वादेरविद्याकृतत्वमविक्रियत्वादात्मनो। विक्रियावान्हि कर्त्ताऽत्मनः कर्मभूतमन्यं प्रयोजयति चा ४
कुर्विति। तदेतदविशेषेण विदुषः सर्वक्रियासु कर्त्तृत्वं हेतुकर्त्तृत्वं च प्रतिषेधति भगवान्कर्माधिकाराभावप्रदर्शनार्थं वेदाविनाशि
नमिति। कथं स पुरुष इत्यादिना। कः पुनर्विदुषोऽधिकार इत्येतदुक्तं पूर्वमेव ज्ञानयोगेन सांख्यानामिति। तथा कर्मसंन्यासं वक्ष्यति॥

ग्रं २

क्रि २

सर्वकर्माणि मनसा संन्यस्येत्यादिना। ननु मनसेति वचनान्न वाचिकानां कायिकानां च संन्यास इति। न। सर्वकर्माणीति वि
शेषितत्वात्। मानसानामेव कर्मणामिति चेन्न। मनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणां मनोव्यापाराभावेऽनुपपत्तेः। शास्त्री
याणां वाक्कायकर्मणां कारणानि मानसानि वर्जयित्वान्यानि सर्वकर्माणि मनसा संन्यस्येति चेन्न। नैव कुर्वन्न कारयन्निति विशेष
णात्। सर्वकर्मसंन्यासोऽयं भगवतोक्तः। मरिष्यतो न जीवत इति चेन्न। नवद्वारे पुरे देहे आस्ते इति विशेषणानुपपत्तेः। न हि सर्वक
र्मसंन्यासेन मृतस्य तद्देहे आसनं संभवति। अकुर्वतोऽकारयतो देहे संन्यस्येति संबन्धो न देहे आस्ते इति चेन्न। सर्वत्रात्मनो विक्रिया
वधारणात्। आसनक्रियायाश्चाधिकरणापेक्षत्वात्तदनपेक्षत्वाच्च संन्यासस्य। संपूर्वस्तु न्यासशब्दोऽत्र त्यागार्थो नादानार्थः। तस्माद्गीताशा
स्त्रे आत्मज्ञानवतः संन्यास एवाधिकारो न कर्मणीति तत्र तत्रोपरिष्टादात्मज्ञानप्रकरणे दर्शयिष्यामः। प्रकृतं तु वक्ष्यामः। तत्रात्मनोऽवि
नाशित्वं प्रतिज्ञातं तत्किमिवेत्युच्यते॥२१॥ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि। तथा शरीराणि विहाय जीर्णान्य
न्यानि संयाति नवानि देही॥ ॥वासांसि जीर्णानि दुर्बलतां गतानि यथा लोके परित्यज्याभिनवान्युपाददाते नरः पुरुषोऽन्यानि तद्वदे
वशरीराणि विहाय जीर्णान्यन्यानि संयाति संगच्छति नवानि देही आत्मा पुरुषवदविक्रिय एवेत्यर्थः। कस्मादविक्रिय एवेत्याह॥
२२॥ नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः॥ न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥ ॥नैनं देहिनं प्रकृतं शस्त्राणि
छिन्दन्ति निरवयवत्वान्नावयवविभागं कुर्वन्ति शस्त्राण्यस्यादीनि। तथा चैनं अग्निरपि न भस्मीकरोति। तथा नैनं क्लेदयन्त्यापो। पं

हि सावयवस्य वस्तुनो ऽद्भिरार्द्रीभावकरणेनावयवविश्लेषापादने सामर्थ्यं तन्न निरवयव आत्मनि संभवति। तथा स्नेहवद्द्रव्यं स्नेहशो
षणेन नाशयति वायुरेनं त्वात्मानं न शोषयति मारुतोपि यत एवं तस्मात्॥२३॥ अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च॥ नित्यः सर्वग
स्थाणुरचलोयं सनातनः॥ ॥यस्मादन्योन्यनाशहेतूनि भूतान्यात्मानं नाशयितुं नोत्सहंते तस्मान्नित्यो नित्यत्वात्सर्वगतः
सर्वगतत्वात्स्थाणुरिव स्थिर इत्येतत् स्थिरत्वादचलः। अयमात्मा अतः सनातनश्चिरंतनो न कारणात्कुतश्चिन्निष्पन्नो ऽभिनव इत्य
र्थः॥ नैतेषां श्लोकानां पौनरुक्त्यं चोदनीयं यत एकेनैव श्लोकेनात्मनो नित्यत्वमविक्रियत्वं चोक्तं न जायते म्रियते इत्यादिना। तत्र यदेवात्म
विषयं किंचिदुच्यते तदेतस्माच्छ्लोकार्थान्नातिरिच्यते। किंचिच्छब्दतः पुनरुक्तं किंचिदर्थत इति दुर्बोधत्वादात्मवस्तुनः पुनः पुनः प्र
संगमापाद्यापाद्य शब्दांतरेण तदेव वस्तु निरूपयति भगवान्वासुदेवः कथं नु नाम संसारिणां बुद्धिगोचरमापन्नं सदव्यक्तं तत्त्वं संसा
रनिवृत्तये स्यादिति॥२४॥ अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते। तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥ ॥सर्वकरणावि
षयत्वान्न व्यज्यत इत्यव्यक्तोयमात्मा अत एवाचिंत्योयं। यद्धींद्रियगोचरं तच्चिंताविषयत्वमापद्यते। अयं त्वात्मा निरिंद्रियगोचरत्वाद
चिंत्यः अविकार्योयं यथा क्षीरं दध्येवं च न। निरवयवत्वाच्चाविक्रियो न हि। निरवयवं किंचिद्विक्रियात्मकं दृष्टमविक्रियत्वादविक्रियो
यमात्मोच्यते। तस्मादेवं यथोक्तप्रकारेणात्मानं विदित्वा त्वं नानुशोचितुमर्हसि। हंताहमेतेषां मयैते हन्यंते इत्यादिना॥ नित्यत्वमभ्युपग
म्येदमुच्यते॥२५॥ अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं॥ तथापि त्वं महाबाहो नैवं शोचितुमर्हसि॥ ॥अथ चेत्यभ्युपगमार्थ एनं प्रकृ

नाशः२ जन्म२

तमात्मानं नित्यजातं लोकप्रसिद्ध्या प्रत्यनेकशरीरोत्पत्तिं जातो जात इति वा मन्यसे तथा प्रति तन्नित्यं वा मन्यसे मृतं मृतो मृत इति तथा
ऽपि त्वं महाबाहो नैवं शोचितुमर्हसि तथा ह्यात्मा विनित्यात्मनि त्वं महाबाहो नैवं शोचितुमर्हसि। जन्मवतो जन्मनाशवतो नौ चावश्यं
भाविनाविति तथा सति॥२६॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च॥ तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥ ॥जातस्य हि लब्ध
जन्मनो ध्रुवोऽव्यभिचारी मृत्युर्मरणं। ध्रुवं जन्म मृतस्य च। तस्मादपरिहार्योऽयं जन्ममरणलक्षणोऽर्थः तस्मिन्नपरिहार्येऽर्थे न त्वं शो
चितुमर्हसि। कार्यकारणसंघातात्मकान्यपि भूतान्युद्दिश्य शोको न युक्तः कर्तुं यतः॥२७॥ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भा
रत॥ अव्यक्तनिधनान्येव तत्र का परिदेवना॥ ॥अव्यक्तमदर्शनमनुपलब्धिरादिर्येषां पुत्रमित्रादिकार्यकारणसंघातात्म
कानां तान्यव्यक्तादीनि भूतानि प्रागुत्पत्तेरुत्पन्नानि च प्राङ्मरणाद्व्यक्तमध्यानि पुनरव्यदर्शनं निधनं मरणं येषां तान्यव्यक्तनि
धनानि मरणादूर्ध्वमव्यक्ततामेव प्रतिपद्यन्त इत्यर्थः। तथा चोक्तं॥ अदर्शनादापतितः पुनश्चादर्शनं गत इति तत्र का परिदेवना
को वा विलापः। अदृष्टदृष्टप्रणष्टभ्रान्तिभूतेषु भूतेष्वित्यर्थः दुर्विज्ञेयोऽयं प्रकृत आत्मा किं त्वामेवैकमुपालभे साधारणे भ्रान्तिमात्रे
कथं दुर्विज्ञेय आत्मेत्याह॥२८॥ आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः॥ आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्ये
नं वेद न चैव कश्चित्॥ ॥आश्चर्यमदृष्टमद्भुतमकस्माद्दृश्यमानं तेन तुल्यमाश्चर्यवदाश्चर्यमिवैनं पश्यति। कश्चिदाश्चर्यवदेव
वदति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणोति। दृष्ट्वा श्रुत्वाप्येनं वेद न चैव कश्चित्। अथवा योऽयमात्मानं पश्यति स आश्चर्यवत्तु

१०
श्री·गी·

न्यो यो वदति यश्च शृणोति सोनेकसहस्रेषु कश्चिदेव भवतीत्यतो दुर्वोधश्चात्मेत्यभिप्रायः॥ अथेदानीं प्रकृतमर्थमुपसंहरति॥२९॥
देही नित्यमवध्योयं देहे सर्वस्य भारत॥ तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि॥ ॥सर्वस्य प्राणिजातस्य देहे वध्यमानेप्य
यं देही अवध्यः तस्माद्भीष्मादीनि सर्वाणि भूतान्युद्दिश्य न त्वं शोचितुमर्हसि। इह परमार्थतत्वापेक्षायां शोको मोहो वा न संभवती
त्युक्तं॥ न केवलं तत्वापरमार्थतत्वापेक्षायामेव॥३०॥ स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि॥ धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य
न विद्यते॥ ॥स्वो धर्मः स्वधर्मः क्षत्रियस्य युद्धं तमप्यवेक्ष्य त्वं न प्रचलितुमर्हसि। स्वाभाविकाद्धर्मादात्मस्वजनादित्यभिप्रायः त
च्च युद्धं पृथिवीजयद्वारेण धर्मार्थं प्रजारक्षणार्थं चेति परं धर्म्यं तस्माद्धर्म्याद्युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते हि यस्मात् कुतश्च
तद्युद्धं कर्त्तव्यमित्युच्यते॥३१॥ यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं॥ सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशं॥ ॥यदृच्छ
या चाप्रार्थितमागतमुपपन्नं स्वर्गद्वारमपावृतमुद्घाटितं ये तदीदृशं युद्धं लभन्ते क्षत्रिया हे पार्थ किं न सुखिनस्ते। एवं कर्त्तव्यता
प्राप्तमपि॥३२॥ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि॥ ततः स्वधर्मं कीर्त्तिं च हित्वा पापमवाप्स्यसि॥ ॥अथ चेत्त्वं धर्माद
नपेतं युद्धं न करिष्यसि ततस्तदकरणात्स्वधर्मं कीर्त्तिं महादेवादिसमागमनिमित्तां हित्वा केवलं पापमवाप्स्यसि न केवलं स्व
धर्मकीर्त्तिपरित्यागः॥३३॥ अकीर्त्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययां॥ संभावितस्य चाकीर्त्तिर्मरणादतिरिच्यते॥ ॥
ते तवाव्ययां दीर्घकालं धर्मात्मा शूर इत्येवमादिभिर्गुणैः संभावितस्य चाकीर्त्तिर्मरणादतिरिच्यते। सम्भावितस्य चाकीर्त्तेर्वि

अथ चेत्त्वमिमं धर्म्यं धर्म

निवातकवचादि दुःखनिमित्तं १

१०
श्री·गी·

रं मरणमित्यर्थः। किंच ॥३४॥ भयाद्रणादुपरतं मंस्यंते त्वां महारथाः॥ येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवं॥ ॥भयात्क
र्णादिभ्यो रणाद्युद्धादुपरतं निवृत्तं मंस्यंते चिंतयिष्यंति। न कृपयेति। त्वां महारथा दुर्योधनप्रभृतयो के मन्यंते रत्या हृ ये
षां च त्वं दुर्योधनादीनां बहुमतो भूत्वा बहुभिर्गुणैर्युक्त इत्येवं मतो बहुमतो भूत्वा पुनस्त्वं यास्यसि लघुतां। किंच ॥३५॥
अवाच्यवादांश्च बहून्वदिष्यंति तवाहिताः॥ निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं॥ ॥अव्यक्तान्वादांश्च बहूनने
कप्रकारान्वदिष्यंति तवाहिताः शत्रवः। कुत्सयंतस्त्वदीयं सामर्थ्यं तस्मात् ततो निंदाप्राप्तेः दुःखतरं नु किं ततः कष्टतरं दुःखं
नास्तीत्यर्थः। युद्धे पुनः क्रियमाणे कर्णादिभिः॥३६॥ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं॥ तस्मादुत्तिष्ठ कौंतेय युद्धा
य कृतनिश्चयः॥ ॥हतो वा प्राप्स्यसि स्वर्गं कर्णादीन्शूरान्जित्वा महीं भोक्ष्यसे वा उभयथापि ते लाभ एवेत्यभिप्रायः। यतए
वं तस्मादुत्तिष्ठ कौंतेय जेष्यामि शत्रून्मरिष्यामीति वा निश्चयं कृत्वेत्यर्थः॥३७॥ तत्र स्वधर्म इत्येवं युद्ध्यमानस्योपदेशमिमं
श्रृणु॥ ॥सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ। ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥ ॥सुखदुःखे समे तु
ल्ये कृत्वा रागद्वेषावकृत्वेत्यर्थः तथा लाभालाभौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व घटस्व नैवं युद्धं कुर्वन्पापमवा
प्स्यसि॥३८॥ एव उपदेशः प्रासंगिकः शोकमोहापनयनाय लौकिको न्यायः स्वधर्ममपि चावेक्ष्येत्यादिश्लोकैरुक्तो न तु तात्पर्येण
परमार्थदर्शनं त्विह प्रकृतं। तदेवोक्तमुपसंहरति। एषा तेऽभिहितेति शास्त्रविषयविभागप्रदर्शनाय इह हि दर्शयते पुनः शास्त्रविषयवि

मार्गेणु परिरक्षा ज्ञानयोगेन सांख्यानां कर्म्मयोगेन योगिनामिति निष्ठाद्वयविषयं शास्त्रं सुखं प्रवर्तयिष्यते श्रोतारश्च विषयवि
भागेन सुखं ग्रहीष्यंतीत्याह ॥ एषा तेभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ॥ बुद्ध्या युक्तो यया पार्थ कर्म्मबंधं प्रहास्य
सि ॥ ॥ एषा तुभ्यमुक्ता सांख्ये परमार्थवस्तुविवेकविषये बुद्धिर्ज्ञानं साक्षाच्छोकमोहादिसंसारहेतुदोषनिवृत्तिकारणं
योगे तु तत्प्राप्त्युपाये निःसंगतया द्वंद्वप्रहाणपूर्वकमीश्वराराधनार्थे कर्म्मयोगे कर्म्मानुष्ठाने समाधियोगे च इमामनंतरमेवोच्य
मानां बुद्धिं शृणु तां बुद्धिं स्तौति । प्ररोचनार्थं बुद्ध्या यया योगविषयया युक्तो हे पार्थ कर्म्मबंधं कर्म्मैव धर्म्माधर्म्माख्यो बंधः । तं प्रहा
स्यसीश्वरप्रसादनिमित्तज्ञानप्राप्त्यैवेत्यभिप्रायः किंचान्यत् ॥ ॥ नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते स्वल्पमप्यस्य धर्म
स्य त्रायते महतो भयात् ॥ ॥ नेह मोक्षमार्गे कर्म्मयोगे अभिक्रमनाशः अभिक्रमणमभिक्रमः प्रारंभस्तस्य नाशो नास्ति यथा कृष्यादे
र्योगविषये प्रारंभस्य नानैकांतिकफलत्वमित्यर्थः । नापि चिकित्सावत्प्रत्यवायो विद्यते किंतु भवति । स्वल्पमप्यस्य योगस्य धर्म
स्यानुष्ठितं त्रायते रक्षति महतः संसारभयात् जन्ममरणादिलक्षणात् । येयं सांख्ये बुद्धिरुक्ता योगे च वक्ष्यमाणा सा ॥ ॥ व्यवसा
यात्मिका बुद्धिरेकेह कुरुनंदन ॥ बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ॥ ॥ व्यवसायिनां व्यवसायात्मिका निश्चयस्वभा
वैकैव बुद्धिः इतराविपरीतबुद्धिः शाखाभेदस्य बाधिका सम्यक्प्रमाणजनितत्वात् इह श्रेयोमार्गे कुरुनन्दन याः पुनरितरा बु
द्धयो यासां शाखाभेदप्रचारवशादनंतोऽपारोऽनुपरतः संसारो नित्यप्रततो भवति । प्रमाणजनितविवेकबुद्धिवशाच्चोपर

भ॰ गी॰

तास्त्वनंतभेदबुद्धिषु संसारोप्युपरमते। ताबुद्धयो बहुधाः शाखाः यासां ताः बहुभेदा इत्येतत्। प्रतिशाखाभेदेन ह्यनंतास्ताबुद्ध
यः केषामव्यवसायिनां प्रमाणजनितविवेकबुद्धिरहितानामित्यर्थः येषां व्यवसा यात्मिका
बुद्धिर्नास्ति ते॥४१॥ यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः॥ वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ ॥यामिमां वक्ष्यमा
णां पुष्पितां पुष्पितरुवद्भूः तत्र वत् शोभमानां श्रूयमाणरमणीयां वाक्यलक्षणां प्रवदंति के अविपश्चितः अल्पमेधसः अविवे
किन इत्यर्थः वेदवादरताः बहुर्थवादफलसाधनप्रकाशकेषु वेदवाक्येषु रताः पार्थ नान्यत् स्वर्गपश्वादिफलसाधनेभ्यः कर्म
भ्योस्तीत्येवं वादिनो वदनशीलाः ते च॥४२॥ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां॥ क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्र
ति॥ ॥कामस्वभावाः कामपरा इत्यर्थः स्वर्गः परः पुरुषार्थो येषां ते स्वर्गप्रधानाः कर्मणः फलं कर्मफलं जन्मैव कर्मफलं तत्प्र
ददातीति तां जन्मकर्मफलप्रदां वाचं प्रवदंतीत्यनुषज्यते क्रियाणां विशेषा बहुला यस्यां सा स्वर्गपशुपुत्राद्यर्थीयया वाचा बाहु
ल्येन प्रकाश्यंते। भोगश्चैश्वर्यं च जयोर्गतिः प्राप्तिस्तां प्रतिसाधनभूता ये क्रियाविशेषास्तद्बहुलां तां वाचं प्रवदंतो मूढाः संसारे प
रिवर्तंत इत्यभिप्रायः तेषां च॥४३॥ भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां॥ व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ ॥
भोगः कर्तव्य ऐश्वर्यं चेति तयोरेव प्रणयवतां तदात्मभूतानां तया क्रियया विशेषबहुलया वाचा अपहृतविवेकप्रज्ञानां व्यवसाया
त्मिका सांख्ययोगे बुद्धिः समा धौ समाधीयतेस्मिन् पुरुषोपभोगाय सर्वमिति समाधिः अंतःकरणं बुद्धिः तस्मिन् समा

धौ न विधीयते न स्थिरी भवतीत्यर्थः॥ यएवं विवेकबुद्धिरहितास्तेषां कामात्मनां॥४४॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जु
न॥ निर्द्वन्द्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान्॥ ॥त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां वेदानां ते ते वेदास्त्रैगु
ण्यविषयाः॥ त्वं तु निस्त्रैगुण्यो भवार्जुन। निष्कामो भवेत्यर्थः॥ सुखदुःखहेतू सप्रतिपक्षौ पदार्थौ द्वन्द्वशब्दवाच्यौ ततो निर्गतो नि
र्द्वन्द्वो भव त्वं तथा सदा सत्वगुणाश्रितो भव तथा निर्योगक्षेमः। अनुपात्तस्योपादानं योगः उपात्तस्य रक्षणं क्षेमः योगक्षेमप्रधान
स्य श्रेयसि प्रवृत्तिर्दुष्करेत्यतो निर्योगक्षेमो भव आत्मवान् अप्रमत्तश्च भव एष तवोपदेशः स्वधर्ममनुतिष्ठतः सर्वेषु वेदोक्तेषु कर्म
सु यान्यनन्तानि फलानि तानि नापेक्ष्यन्ते चेत्। किमर्थं तानीश्वरायेत्यनुष्ठीयते इत्युच्यते शृणु॥४५॥ यावानर्थ उदपाने सर्वतः
संप्लुतोदके॥ तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥ ॥यथा लोके कूपतडागाद्यनेकस्मिन् उदपाने परिच्छिन्नोदके याव
न्यावत्परिमाणः स्नानपानादिरर्थः फलं प्रयोजनं स स सर्वोऽर्थः सर्वतः संप्लुतोदकेपि योऽर्थस्तस्मिंस्तावानेव संपद्यते एवं ताव
ान्यावत्परिमाण एव संपद्यते तत्रान्तर्भवतीत्यर्थः सर्वेषु वेदेषु वेदोक्तेषु कर्मसु योऽर्थः फलं कर्मफलं सोऽर्थो ब्राह्मणस्य विजानतः
संन्यासिनः परमार्थतत्वं विजानतो योऽर्थो यद्विज्ञानफलं सर्वतः संप्लुतोदकस्थानीयं तस्मिंस्तावानेव संपद्यते तत्रैवान्तर्भवती
त्यर्थः॥ यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किंचित्प्रजाः साधु कर्म कुर्वन्ति यस्तद्वेद यत्स वेदेति श्रु
तेः सर्वं कर्माखिलमिति च वक्ष्यति तस्मात्प्राक् ज्ञाननिष्ठाधिकारप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म

कर्त्तव्यं तव च॥४६॥ कर्मण्येवाधिकारस्ते मा फलेषु कदाचन॥ मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि॥ ॥कर्मण्येवाधि
कारो ज्ञाननिष्ठायां ते तवात्र च कर्म कुर्वतो मा फलेष्वधिकारोस्तु कर्मफलतृष्णा मा भूत् कदाचन कस्यांचिदप्यवस्था ४
यामित्यर्थः यदा कर्मफले तृष्णा ते स्यात्तदा कर्मफलप्राप्ते हेतुः स्यात् एवं कर्मफले मा हेतुर्भूः। यदा हि कर्मफलतृष्णाप्रयुक्तः क
र्मणि प्रवर्त्तते तदा कर्मफलस्यैव जन्महेतुर्भवेत् यदि कर्मफलहेतुर्नेष्यते किं कर्मणा दुःखरूपेणेति चा माते तव संगोस्त्वक
र्मण्यकरणे प्रीतिर्माभूत् यदि कर्मफलप्रयुक्तेन न कर्त्तव्यं कर्म कथं तर्हि कर्त्तव्यमित्युच्यते॥४७॥ योगस्थः कुरु कर्माणि सं
गं त्यक्त्वा धनंजय। सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ ॥योगस्थः सन् कुरु कर्माणि केवलमीश्वरार्थं तत्रापीश्व
रो मे तुष्यतु इति संगं त्यक्त्वा धनंजय। कर्मफलतृष्णारहितेन क्रियमाणे कर्मणि सत्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिस्तद्विपर्ययजा
ऽसिद्धिस्तयोः सिद्ध्यसिद्ध्योरपि समस्तुल्यो भूत्वा कुरु कर्माणि कोसौ योगो यत्रस्थः कुर्वित्युक्तमिदमेव तत्समत्वं सिद्ध्यसिद्धिवि
षयं योग उच्यते। यत्पुनः समत्वबुद्धियुक्तमीश्वराराधनार्थं कर्मैतस्मात्कर्मणः॥४८॥ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय॥ बुद्धौ
शरणमन्विच्छ कृपणाः फलहेतवः॥ ॥दूरेणातिविप्रकर्षेणाधमं निकृष्टं कर्मफलार्थिना क्रियमाणं बुद्धियोगात् समत्वबु
द्धियुक्तात्कर्मणो जन्ममरणादिहेतुत्वात् हे धनंजय यत एवं योगविषयायां बुद्धौ तत्परिपाकजायां वा सांख्यबुद्धौ शरणमाश्रय
मभयप्राप्तिकारणमन्विच्छ प्रार्थयस्व परमार्थज्ञानशरणो भवेत्यर्थः यतोवरं कर्म कुर्वाणाः कृपणा दीनाः फलहेतवः फलतृष्णा

फलप्रयुक्ताः संतो यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपण इति श्रुतेः समत्वबुद्धियुक्तः सन्स्वधर्ममनुतिष्ठन्यत्फलं प्राप्नोति
तच्छृणु ॥४९॥ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते। तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं॥ ॥कर्मविषयया बुद्ध्या
युक्तो बुद्धियुक्तो बुद्धियुक्तः समत्वविषयया बुद्ध्या युक्तो बुद्धियुक्तः जहाति परित्यजति इह अस्मिंल्लोके उभे सुकृतदुष्कृते पुण्यपापे सत्त्व
शुद्धिज्ञानप्राप्तिद्वारेण यतः तस्मात्समत्वबुद्धियोगाय युज्यस्व घटस्व स्वधर्माख्येषु कर्मसु प्रवर्त्तमानस्य या सिद्ध्यसिद्ध्योः समत्व
बुद्धिरीश्वरार्पितचेतस्तया वंधस्वभावान्यपि कर्माणि समत्वबुद्ध्या स्वभावान्निवर्त्यंते। तस्मात्समत्वबुद्धियुक्तो भव त्वं यस्मात् ॥५०॥ ॥
कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः। जन्मवंधविनिर्मुक्ताः पदं गच्छंत्यनामयं॥ ॥कर्मजं फलं त्यक्त्वेति व्यवहितेन सं
वंधः इष्टानिष्टदेहप्राप्तिः कर्मजं फलं कर्मभ्यो जातं फलं बुद्धियुक्ताः समत्वबुद्धियुक्ताः संतः हि यस्मात्कर्मफलं त्यक्त्वा परित्यज्य म
नीषिणो ज्ञानिनो भूत्वा जन्मवंधविनिर्मुक्ताः जन्मैव वंधो जन्मवंधः तेन विनिर्मुक्ताः जीवंत एव जन्मवंधाद्विनिर्मुक्ताः संतः पदं प
रमं विष्णोर्मोक्षाख्यं गच्छंत्यनामयं सर्वोपद्रवरहितमित्यर्थः अथवा बुद्धियोगाद्धनंजयेत्यारभ्य परमार्थदर्शनलक्षणैव सर्वतः
संप्लुतोदकस्थानीया कर्मयोगजसत्त्वशुद्धिजनिता बुद्धिर्दर्शिता साक्षात्सुकृतदुष्कृतप्रहाणादिहेतुत्वश्रवणात् योगानुष्ठानजनिता
सत्त्वशुद्धिजा बुद्धिः कदा प्राप्यत इत्युच्यते ॥५१॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥

तथा तत् कौशलं कुशलभावः ५

यदा यस्मिन्काले ते तव मोहात्मकमविवेकरूपं कालुष्यं येनात्मानात्मविवेकबोधं कलुषीकृत्य विषयं प्रत्यंतःकरणं प्रवर्त्तते त
व बुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति शुद्धिभावमापत्स्यत इत्यर्थः तदा तस्मिन्काले गंतासि प्राप्तासि निर्वेदं वैराग्यं श्रोतव्यस्य श्रु
तस्य च तदा श्रोतव्यं श्रुतं चेति निष्फलं प्रतिपद्यत इत्यभिप्रायः मोहकलिलात्ययद्वारेण लब्धात्मज विवेकप्रज्ञः कदा कर्मयोगजं ५
फलं परमार्थयोगमवाप्स्यसीति तदुच्यते ॥ ५२ ॥ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ॥ समाधावचला बुद्धिस्तदा योग
मवाप्स्यसि ॥ ॥ अनेकसाध्यसाधनसंबंधप्रकाशनश्रुतिभिः श्रवणैर्विप्रतिपन्ना नानाप्रतिपन्ना श्रुतिविप्रतिपन्ना विक्षिप्ता
सती ते तव बुद्धिर्यदा यस्मिन्काले स्थास्यति स्थैर्यं समाधिरात्मा तस्मिन्नात्मनीत्येतद् अचला तत्रापि विकल्पवर्जितेत्येतद् बुद्धि
रंतःकरणं तदा तदा तस्मिन्काले योगमवाप्स्यसि विवेकप्रज्ञां समाधिं प्राप्स्यसि ॥ प्रश्नबीजं प्रतिलभ्यार्जुन उवाच नन्वस्य समाधिप्रज्ञस्य
लक्षणं बुभुत्सया ॥ ५३ ॥ स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ॥ स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ॥ ॥ स्थिता प्रतिष्ठि
ता अहमस्मि परं ब्रह्मेति प्रज्ञा यस्य स तस्य स्थितप्रज्ञस्य का भाषा भाषणं वचनं कथमसौ परिभाष्यते समाधिस्थस्य समाधौ स्थितस्य
केशव ॥ स्थितधीः स्थितप्रज्ञः स्वयं किं वा प्रभाषेत किमासीत व्रजेत किमासनं व्रजनं वा तस्य किमित्यर्थः ॥ स्थितप्रज्ञस्य लक्षणमनेन
श्लोकेन पृच्छ्यते यो ह्यादित एव संन्यस्य कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्तो यश्च कर्मयोगेन तयोः स्थितप्रज्ञस्येति प्रजहातीत्यार ५

रोन्ताता अवि
ष्यति तिष्ठत्यला
विक्षेपचल
न वर्जितास्य
तीसमाधौस्य
माधीयते चि
नमास्मि क्रिध
३·

न्याध्यायपरिसमाप्तिः पर्यंतस्थितप्रज्ञलक्षणं साधनं चोपादिश्यते सर्वत्रैव ह्यध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साध
नान्युपदिश्यंते। यत्नसाध्यत्वात्। यत्नसाध्यानि साधनानि लक्षणानि च भवंति तानि श्रीभगवानुवाच ॥५४॥ प्रजहाति यदा कामान्सर्वा
न्पार्थ मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥ ॥प्रजहाति प्रकर्षेण जहाति परित्यजति यदा कामान्यदि ध्यात्रे दा
न्हे पार्थ मनोगतान्मनसि प्रविष्टान्सर्वकामपरित्यागे तुष्टिकारणाभावात् शरीरधारणनिमित्तशेषे च सत्युन्मत्तस्येव प्रवृत्तिः
प्राप्तेत्यत उच्यते। आत्मन्येव प्रत्यगात्मस्वरूपेणैवात्मना स्वेनैव बाह्यलाभनिरपेक्षस्तुष्टः परमार्थदर्शनामृतरसलाभेनान्यस्माद
लंप्रत्ययवान्तुष्टः स्थितप्रज्ञः स्थिता प्रतिष्ठितात्मानात्मविवेकजा प्रज्ञा यस्य स स्थितप्रज्ञो विद्वांस्तदोच्यते। त्यक्तपुत्रवित्तलोकैषणः
संन्यासी आत्मारामः आत्मक्रीडः स्थितप्रज्ञ इत्यर्थः ॥५५॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥ वीतरागभयक्रोधः स्थितधीर्मुनि
रुच्यते॥ ॥दुःखेषु आध्यात्मिकादिषु प्राप्तेष्वनुद्विग्नं नोद्विग्नं न प्रक्षोभितं दुःखप्राप्तौ मनो यस्य सोयमनुद्विग्नमनाः तथा सुखेषु प्राप्ते
षु विगता स्पृहा तृष्णा यस्य नाग्निरिवेन्धनाद्याधाने सुखान्यनुविवर्धते स विगतस्पृहः ॥ रागश्च भयं च क्रोधश्च रागभयक्रोधाः य
स्मात्त्वीतविगता रागभयक्रोधाः यस्मात्स वीतरागभयक्रोधः स्थितधीः स्थितप्रज्ञो मुनिः संन्यासी तदोच्यते किंच ॥५६॥ यः स
र्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं ॥ नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥ ॥यो मुनिः सर्वत्र देहजीवितादिष्वपि अनभि
स्नेहः अभिस्नेहवर्जितः तत्तत्प्राप्य शुभमशुभं वा तत्तच्छुभं प्राप्य न तुष्यति अशुभं प्राप्य च न द्वेष्टीत्यर्थः तस्यैवं हर्षविषादवर्जितस्य

विवेकजा प्रतिष्ठिता॥५७॥ यदा संहरते चायं कूर्मोंगानीव सर्वशः॥ इन्द्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ ॥यदा संहरते सम्यगुपसंहरते चायं ज्ञाननिष्ठायां प्रवृत्तो यतिः यथा कूर्मोंगानि भयात्स्वान्यंगान्युपसंहरति तस्य प्रज्ञा प्रतिष्ठिते त्युक्तार्थं वाक्यं। तत्र विषयानना हरतः आतुरस्यापि कूर्मोंगानीव संहृियंते न तद्विषयो रागः कथं संह्रियत इत्युच्यते॥५८॥ विषया विनिवर्त्तंते निराहारस्य देहिनः। रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्त्तते॥ ॥तेयद्यपि विषयोपलक्षिता विषयशब्दवाच्यानींद्रियाणि प्रयत्नाद्विषयाद्वनि वर्त्तंते देहिनो देहवतो रसो रागो विषयेषु यस्तं वर्जयित्वा रसशब्दो रागे प्रसिद्धः। स्वरसेन प्रवृत्तो रसिको रसज्ञ इत्यादि दर्शनात्। सोपि रसो रंजनारूपः स च यतेः परं परमार्थतत्त्वं ब्रह्म दृष्ट्वोपलभ्याहमेवैतदिति वर्त्तमानस्यापि निवर्त्तते निर्बीजं विषयज्ञानं संपद्यत इत्यर्थः नासति सम्यग्दर्शने रसस्योच्छेदस्तस्मात्सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्त्तव्यमित्यभिप्रायः सम्यग्दर्शनलक्षणप्रज्ञास्थैर्यं चिकीर्षता दादाविन्द्रियाणि स्ववशे स्थापयितव्यानि यस्मात्तदनवस्थापने दोषमाह॥५९॥ यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः॥ इन्द्रियाणि प्रमाथीनि हरंति प्रसभं मनः॥ ॥यततः प्रयत्नं कुर्वतो हि यस्मादपि कौंतेय पुरुषस्य त्वं विपश्चितो मेधाविनोपीति व्यवहितेन संबंधः इन्द्रियाणि प्रमथनशीलानि विषयाभिमुखं पुरुषं विक्षोभयंत्याकुली कुर्वंति आकुलीकृत्य हरंति च प्रसभं प्रसह्य प्रकाशमेव पश्यतो विवेकविज्ञानयुक्तं मनो यतस्तस्मात्॥६०॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः॥ वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥ ॥तानि सर्वाणि संयम्य संयमनं वशीकरणं कृत्वा युक्तः समाहितः सन्नासीत मत्परो हं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्परः

नान्योहं तस्मादित्यासीतेत्यर्थः। एवमासीनस्य यतेर्वशे हि यस्येन्द्रियाणि वर्त्तंते। ऽस्यास्वत्वात्तस्य प्रज्ञा प्रतिष्ठिता॥ अथेदानीं पराभवि
ष्यतः सर्वानर्थमूलमिदमुच्यते॥६१॥ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते। संगात्संजायते कामः कामात्क्रोधोभिजायते॥ ॥ध्या
यतश्चिंतयतो विषयान्शब्दादिविषयविशेषानालोचयतः पुरुषस्य संगः आसक्तिः प्रीतिस्तेषु विषयेषूपजायते। संगात्प्रीतेः समुत्पद्य
ते कामस्तृष्णा तस्मात्कामात्कुतश्चित्प्रतिहतात्क्रोधोभिजायते॥६२॥ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः॥ स्मृतिभ्रंशाद्बुद्धि
नाशो बुद्धिनाशात्प्रणश्यति॥ ॥अविवेकः कार्याकार्यविषयः संमोहः क्रुद्धो हि संमूढः सन्गुरुमप्याक्रोशति संमोहात्। शास्त्रा
चार्योपदेशाहितसंस्कारजनितायाः स्मृतेः स्याद्विभ्रमो भ्रंशः स्मृत्युत्पत्तिनिमित्तप्राप्तौ अनुत्पत्तिः ततः स्मृतिभ्रंशाद्बुद्धेर्नाशः का
र्याकार्यविषयविवेकायोग्यता अंतःकरणस्य बुद्धेर्नाश उच्यते बुद्धिनाशात्प्रणश्यति। तावदेव हि पुरुषो यावदंतःकरणं तदी
यं कार्याकार्यविवेकयोग्यं तदयोग्यत्वे नष्ट एव पुरुषो भवति। अतस्तस्यांतःकरणस्य बुद्धेर्नाशात्प्रणश्यति पुरुषार्थायोग्यो भव
ति। सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानम् अथेदानीं मोक्षकारणमिदमुच्यते॥६३॥ रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्॥
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति॥ ॥रागद्वेषवियुक्तैः रागश्च द्वेषश्च रागद्वेषौ तत्पुरःसरा हीन्द्रियाणां प्रवृत्तिः स्वाभावि
की तत्र यो मुमुक्षुर्भवति स ताभ्यां वियुक्तैः श्रोत्रादिभिरिन्द्रियैर्विषयानवर्जनीयांश्चरन्नुपलभमानः आत्मवश्यैः आत्मनो वश्यानि
वशीभूतानि तैः आत्मवश्यैर्विधेयात्मा इच्छातो विधेय आत्मा अंतःकरणं यस्य सोयं प्रसादमधिगच्छति प्रसादः प्रसन्नता स्वास्थ्यं प्रसा

देसतिकिंस्यादित्युच्यते॥६४॥प्रसादेसर्वदुःखानांहानिरस्योपजायते॥प्रसन्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठते॥ ॥प्रसादे
सर्वदुःखानामाध्यात्मिकादीनांहानिर्विनाशोस्योपजायतेकिंचप्रसन्नचेतसःस्वस्थांतःकरणस्यहियस्मादाशुशीघ्रंबुद्धिःप
र्यवतिष्ठतिआकाशमिवपरिसमंतादवतिष्ठते।आत्मस्वरूपेणैवनिश्चलीभवतीत्यर्थः।एवंप्रसन्नचेतसोह्यवस्थितबुद्धेःकृतकृ
त्यतायतस्तस्मात्रागद्वेषवियुक्तैःशास्त्राविरुद्धेष्ववर्जनीयेषुयुक्तःसमाचरेदितिवाक्यार्थःसेयंप्रसन्नता॥६५॥नास्तिबुद्धिरयु
क्तस्यनचायुक्तस्यभावना॥नचाभावयतःशांतिरशांतस्यकुतःसुखं॥ ॥नास्तिनविद्यतेनभवतीत्यर्थःबुद्धिरात्मस्वरूपविष
याअयुक्तस्यासमाहितचित्तस्यनचास्तिअयुक्तस्यभावनाआत्मज्ञानाभिनिवेशःतथानचास्त्यभावयतःआत्मज्ञानाभिनिवेशमकु
र्वतःशांतिरुपशमःअशांतस्यकुतःसुखंइंद्रियाणांहिविषयसेवातृष्णातोनिवृत्तिःसातत्सुखंनविषयविषयातृष्णादुःखमेवहिसं
नतृष्णायांसत्यांसुखस्यगंधमात्रमुपपद्यतेइत्यर्थःअयुक्तस्यकस्माद्बुद्धिर्नास्तीत्युच्यते॥६६॥इंद्रियाणांहिचरतांयन्मनोनुवि
धीयते॥तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसि॥ ॥इंद्रियाणांहियस्माच्चरतांस्वविषयेषुप्रवर्त्तमानानांयन्मनोनुविधी
यतेअनुप्रवर्त्त्यतितदिंद्रियविषयविकल्पनेनप्रवृत्तंमनोयस्ययतेर्हरतिप्रज्ञामात्मानात्मविवेकजांवायुर्नावमिवअंभस्युदके
जिगमिषुतांमार्गादुद्धृत्योन्मार्गेयथावायुःनावंप्रवर्त्तयत्येवमात्मविषयांप्रज्ञांहृत्वामनोविषयविषयांकरोति।यततोह्यपीत्युपप
न्नस्यार्थस्यानेकधोपपत्तिमुक्त्वातंचार्थमुपपाद्योपसंहरतितस्मादिति।इंद्रियाणांप्रवृत्तौदोषमुपपादितोयस्मात्॥६७॥ ॥

है तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः॥ इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ ॥तस्माद्यस्य यतेः हे महाबाहो निगृ
हीतानि सर्वशः इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता। योयं लौकिको वैदिकश्च व्यवहारः स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञ
स्याविद्याकार्यत्वादविद्यानिवृत्तौ निवर्तते। अविद्यायाश्च विद्याविरोधान्निवृत्तिरित्येतमर्थं स्फुटीकुर्वन्नाह॥ ६८॥ या निशा सर्व
भूतानां तस्यां जागर्ति संयमी॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुने॥ ॥या निशा रात्रिः सर्वपदार्थानामविवेककरी त
मःस्वभावत्वात् सर्वेषां भूतानां किं तत्परमार्थतत्त्वं पश्यतो स्थितप्रज्ञस्य विषयो यथा नक्तंचराणामहरेव सदन्येषां निशा भवति त
द्वन्नक्तंचरस्थानीयानामज्ञानां सर्वभूतानां निशेव निशा परमार्थतत्त्वमगोचरत्वादतद्बुद्धीनां तस्यां परमार्थतत्त्वलक्षणायामज्ञ
पोध ज्ञाननिद्रायाः प्रबुद्धो जागर्ति संयमी संयमवान् जितेन्द्रियो योगीत्यर्थः। यस्यां ग्राह्यग्राहकभेदलक्षणायामविद्यानिद्रायां प्रसुप्तान्येव
भूतानि जाग्रतीत्युच्यन्ते यस्यां निशायां प्रसुप्ता इव स्वप्नदृशः सा निशा अविद्यारूपत्वात्परमार्थतत्त्वं पश्यतो मुनेः। अतः कर्माण्यवि
द्यावस्थायामेव चोद्यन्ते न विद्यावस्थायां विद्यायां हि सत्यामुदिते सवितरि शार्वरमिव तमः प्रणाशमुपगच्छति। अविद्या प्राग्विद्यो
त्पत्तेरविद्या प्रमाणबुद्ध्या गृह्यमाणा क्रियाकारकफलभेदरूपा सती सर्वकर्महेतुत्वं प्रतिपद्यते न प्रमाणबुद्ध्या गृह्यमाणायाः कर्महे
तुत्वोपपत्तिर्यथा वार्त्तिको उक्तवान् तदद्दृष्टोरगवदविद्या किं करिष्यति। प्रमाणभूतेन वेदेन मम चोदितं कर्त्तव्यं कर्मेति कर्मणि कर्त्ता प्रवर्त्त
ते नाविद्यामात्रमिदं सर्वं निशेवेति मन्वानः। यस्य पुनर्निःशेषाविद्यामात्रमिदं सर्वं भेदजातं ज्ञानमिति तस्यात्मज्ञस्य सर्वकर्मसंन्या

त्वनासंबंधग्रंथेगीतार्थो निरूपितस्तत्प्रतिकूलं चेदं पुनः प्रश्नप्रतिवचनयोरर्थं निरूपयंति कथं तत्रसंबंधग्रंथे तावत्सर्वेषा
माश्रमिणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोर्थ इत्युक्तं पुनर्विशेषितं च यावज्जीवं श्रुतिनोदितानि कर्माणि परित्यज्य
केवलादेव ज्ञानान्मोक्षः प्राप्यत इत्येतदेकांतेनैव प्रतिषिद्धमिति हत्वाश्रमविकल्पं दर्शयता यावज्जीवं श्रुतिनोदितानामेव कर्म
णां परित्याग उक्तः तत्कथमीदृशं विरुद्धमर्थमर्जुनाय ब्रूयात् भगवान् श्रोता च कथं विरुद्धमर्थमवधारयेत् तत्रैतत्स्यात् गृहस्था
नामेव श्रौतकर्मपरित्यागेन केवलादेव ज्ञानान्मोक्षः प्रतिषिध्यते न त्वाश्रमांतराणामित्येतदपि पूर्वोत्तरविरुद्धमेव कथं सर्वा
श्रमाणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोर्थ इति प्रतिज्ञाते कथं तद्विरुद्धं केवलादेव ज्ञानान्मोक्षं ब्रूयादाश्रमांतराणा
मर्थमेतच्छ्रौतकर्मापेक्षायेतद्वचनं केवलादेव ज्ञानाच्छ्रौतकर्मरहिताद् गृहस्थानां मोक्षः प्रतिषिध्यते इति तत्र गृहस्थानां विद्यमान
मपि स्मार्तं कर्माविद्यमानवदुपेक्ष्य ज्ञानादेव केवलादित्युच्यते इत्येतदपि विरुद्धं कथं गृहस्थस्यैव स्मार्तकर्मणा समुच्चि
ताज्ज्ञानान्मोक्षः प्रतिषिध्यते न त्वाश्रमांतराणामिति कथं विवेकिभिः शक्यमवधारयितुं । किं च यदि मोक्षसाधनत्वेन स्मार्तानि
कर्माण्यूर्ध्वरेतसां समुच्चीयंते तथा गृहस्थस्यापीष्यतां स्मार्तैरेव समुच्चयो न श्रौतैरथ स्मार्तैः श्रौतैश्च गृहस्थस्यैव
दार समुच्चयो मोक्षायोर्ध्वरेतसां तु स्मार्तकर्ममात्रसमुच्चिताज्ज्ञानान्मोक्ष इति । तत्रैवं सति गृहस्थस्यायासबाहुल्यं श्रौतस्मार्तबहु
दुःखरूपं कर्म शिरस्यारोपितं स्याद् गृहस्थस्यैवायासबाहुल्यात् कारणान्मोक्षः स्यान्नाश्रमांतराणां श्रौतादिनित्यकर्मरहि

म२ न२

तत्वादिति तदप्यसत्सर्वोपनिषत्स्वितिहासपुराणयोगशास्त्रेषु ज्ञानांगत्वेन च मुमुक्षोः सर्वकर्मसन्न्यासविधानादाश्रमविक
ल्पसमुच्चयविधानाच्छ्रुतिस्मृत्योः सिद्धः स्तर्हि सर्वाश्रमाणां ज्ञानकर्मणोः समुच्चयो न मुमुक्षोः सर्वकर्मसंन्यासविधानात्व्यु
त्थायभिक्षाचर्यं चरंति तस्मान्न्यासमेषां तपसामतिरिक्तमाहुर्न्यास एवात्यरेचयदिति न कर्मणा प्रजया धनेन त्यागेनैकेनमृ
मृतत्वमानशुरिति च ब्रह्मचर्यादेव प्रव्रजेदित्याद्याः श्रुतयः त्यज धर्ममधर्मं च उभे सत्यानृते त्यज उभे सत्यानृते त्यक्त्वा येन त्यजसि
दि त्यज। संसारमेव निःसारं दृष्ट्वा सारं दिदृक्षया॥ प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिताः॥ इति बृहस्पतिः॥ कर्मणा बध्यते जंतुर्विद्यया
च विमुच्यते। तस्मात्कर्म न कुर्वंति यतयः पारदर्शिनः इति शुकानुशासनं इहापि च सर्वकर्माणि मनसा संन्यस्येत्यादि मोक्षस्य चा॰
कार्यत्वान्मुमुक्षोः कर्मानर्थक्यं नित्यानित्यप्रत्यवायपरिहारार्थानीति चेन्नासंन्यासिविषयत्वात्प्रत्यवायप्राप्तेः न ह्यग्निकार्याद्य॰
करणात्संन्यासिनः प्रत्यवायः कल्पयितुं शक्यो यथा ब्रह्मचारिणामसंन्यासिनामपि तावन्नित्यानामकरणादभावादेव भाव
रूपस्य प्रत्यवायस्योत्पत्तिः कल्पयितुमशक्या कथमसतः सज्जायेतेत्यसतः सज्जन्मासंभवश्रुतेर्यदि चाविहिताकरणादसंभा ना
व्यमपि प्रत्यवायं ब्रूयाद्वेदस्तदानर्थकरो वेदोऽप्रमाणमित्युक्तं स्यात् विहितस्य करणाकरणयोर्दुःखमात्रफलत्वात् यथा च का
रकं शास्त्रं न ज्ञापकमित्यनुपपन्नार्थं कल्पितं स्यान्न चैतदिष्टं तस्मात्संन्यासिनां न कर्माणि। अतो ज्ञानकर्मणोः समुच्चया॰
नुपपत्तिः ज्यायसी चेदित्यर्जुनस्य प्रश्नानुपपत्तेश्च यदि हि भगवता द्वितीयेऽध्याये ज्ञानं कर्म समुच्चयेन ते[illegible]नुष्ठेयमित्युक्तं ×

ण१

स्यात्ततोऽर्जुनस्य प्रश्नोऽनुपपन्नो ज्यायसी चेत्कर्मणस्ते मता बुद्धिरित्यर्जुनाय चेद्बुद्धिकर्मणी त्वयाएकेनाऽनुष्ठेये इत्युक्ते या च
कर्मणो ज्यायसी बुद्धिः साप्युक्तैवेति तत्किं कर्मणि घोरे मां नियोजयसीत्युपालंभो वा प्रश्नो वा कथंचनोपपद्यते न चार्जुनस्यैव
ज्यायसी बुद्धिर्नानुष्ठेयेति भगवतोक्तं पूर्वमिति कल्पयितुं युक्तं येन ज्यायसीत्यादिप्रश्नः स्याद्यदि पुनरेकस्य पुरुषस्य ज्ञानकर्म
णोर्विरोधाद्युगपदनुष्ठानं न संभवतीति भिन्नपुरुषानुष्ठेयत्वं भगवता पूर्वमुक्तं स्यात्ततोऽयं प्रश्न उपपन्नो ज्यायसी चेदित्यादि
रविवेकतः प्रश्नकल्पनायामपि भिन्नपुरुषानुष्ठेयत्वेन भगवतः प्रतिवचनं नोपपद्यते न चाज्ञाननिमित्तं भगवतः प्रतिवचनं कल्प्यं
अस्माच्च भिन्नपुरुषानुष्ठेयत्वेन ज्ञानकर्मनिष्ठयोर्भगवतः प्रतिवचनदर्शनात् ज्ञानकर्मणोः समुच्चयानुपपत्तिः केव
लादेव ज्ञानान्मोक्ष इत्येषोऽर्थो निश्चितो गीतासु सर्वोपनिषत्सु च ज्ञानकर्मणोरेकं वद निश्चित्येति चैकविषयैव प्रार्थनानुपपन्नोभ
योः समुच्चयसंभवे कुरु कर्मैव तस्मात्त्वमिति च ज्ञाननिष्ठासंभवमर्जुनस्यावधारणेन दर्शयिष्यति॥ अर्जुन उवाच॥ ज्यायसी चेत्कर्मण
स्ते मता बुद्धिर्जनार्दन॥ तत्किं कर्मणि घोरे मां नियोजयसि केशव॥१॥ ज्यायसी श्रेयसी चेद्यदि कर्मणः सकाशात्ते तव मताऽभिप्रेता बुद्धिर्ज्ञा
नं हे जनार्दन। यदि बुद्धिकर्मणी समुच्चिते इष्टे तदेकं श्रेयःसाधनमिति कर्मणो ज्यायसी बुद्धिः कर्मणोऽतिरिक्तकरणं बुद्धेरनुपपन्नमर्जुने
नुकृतं स्यान्नहि तदेव तस्मात्फलतोऽतिरिक्तं स्यात्तथा कर्मणः श्रेयस्करी बुद्धिर्भगवतोक्ताऽश्रेयस्करं कर्म कुर्विति मां प्रतिपादयति तत्
किं कारणमिति भगवत उपालंभमिव कुर्वस्तत्किं कस्मात्कर्मणि घोरे क्रूरे हिंसालक्षणे मां नियोजयसि केशवेति च यदाह तदपि नोपपद्यते

त्रैवर्णिकानां ... व्यामिश्रेणैव ... मनो ब्रवीमि

अथ यस्मात्ते निवृत्तकर्मणः समुच्चयः सर्वेषां भगवतोक्तः अर्जुनेन च अवधारितश्च तस्मात्किं कर्मणि घोरे मां नियोजयसीत्यादि कथं युक्तं वचनं॥१॥ व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे॥ तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥ ॥यद्यपि विविक्ताभिधायी भगवांस्तथापि मम मंदबुद्धेर्व्यामिश्रमिव भगवद्वाक्यं प्रतिभाति। तेन मम बुद्धिं मोहयसीव। मम बुद्धिव्यामोहापनयाय प्रवृत्तस्त्वं कथं मोहयसीति भिन्नकर्तृकयोर्ज्ञानकर्मणोरेकपुरुषानुष्ठानासंभवं यदि मन्यसे तत्रैवं सति तत्तयोरेकं बुद्धिं कर्म वान्यतरेण श्रेयोऽहमाप्नुयां॥ यदि कर्मनिष्ठायां गुणभूतमपि ज्ञानं भगवतोक्तं स्यात्कथं तयोरेकं वदेति एकविषयैवार्जुनस्य शुश्रूषा स्यान्न हि भगवतोक्तमन्यतरदेव ज्ञानकर्मणोर्वक्ष्यामीति येनान्यतरप्राप्त्यसंभवं मन्यमान एकमेव प्रार्थयेत् प्रश्नानुरूपमेव प्रतिवचनं भगवानुवाच॥२॥ लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ॥ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां॥ ॥लोकेऽस्मिन् शास्त्रार्थानुष्ठानाधिकृतानां द्विप्रकारा निष्ठा स्थितिरनुष्ठेयतात्पर्यं पुरा पूर्वं सर्गादौ प्रजाः सृष्ट्वा तासामभ्युदयनिःश्रेयसप्राप्तिसाधनं वेदार्थसंप्रदायं कुर्वता प्रोक्ता मया सर्वज्ञेनेश्वरेणानघ अपाप। का सा द्विविधा निष्ठेत्यत आह। ज्ञानमेव योगस्तेन सांख्यानां आत्मानात्मविषयविवेकज्ञानवतां ब्रह्मचर्याश्रमादेव कृतसंन्यासानां वेदांतविज्ञानसुनिश्चितार्थानां परमहंसपरिव्राजकानां ब्रह्मण्येवावस्थितानां निष्ठा प्रोक्ता। कर्मैव योगः कर्मयोगस्तेन योगिनां कर्मिणां निष्ठा प्रोक्तेत्यर्थः। यदि चैकेन पुरुषेणैकस्मै पुरुषार्थाय ज्ञानं कर्म च समुच्चित्यानुष्ठेयं भगवतेष्टमुक्तं वक्ष्यमाणं वा गीतासु वेदेषु चोक्तं भवति कथमिहार्जुनायोपसन्नाय प्रियाय विशिष्टभिन्नपुरुषकर्तृके एव ज्ञानकर्मनिष्ठे ब्रूयात्। यदि पुनर

इदमेवार्जुनस्य योग्यं बुद्धिः कर्म वा यस्यानुष्ठानं ... इति यन्निश्चित्य वद येन ज्ञानेन कर्मणा वा २॥

कथं

श्रम्यः प्राप्य

श्री
कर्मयोगेन २

ग
ह्रि
वेदत्रयम

सर्वं ६
स ५
पु.र ४
नाम ८

र्जुनो ज्ञानं कर्म च द्वयं श्रुत्वा स्वयमेवानुष्ठास्यत्यन्येषां तु निम्नपुरुषानुष्ठेयतां वक्ष्यामीति मतं भगवतः क
ल्पितं तदा रागद्वेषवानप्रमाणं तेन भगवान्कल्पितः स्यात् ॥ तस्मान्न समुच्चयो ज्ञानकर्मणोः ॥ यदर्जुनेनोक्तं क
र्मणो ज्यायसी चेद्बुद्धिरिति तन्निराकरणं तस्याश्च संन्यासेनैवानुष्ठेयत्वं निम्नपुरुषानुष्ठेयत्वं च वचनात् भग
वत एवमेवानुमतमिति गम्यते ॥ मां च बंधकारणे कर्मणि नियोजयसीति विषण्णमनसमर्जुनं कर्म नारप्स्य
इत्येवं मन्वानमालक्ष्याह भगवान्न कर्मणामनारंभादिति ॥ अथवा ज्ञानकर्मनिष्ठयोः परस्परविरोधादेकेन
पुरुषेण युगपदनुष्ठातुमशक्यत्वे सतीतरेतरानपेक्षयोरेकपुरुषार्थहेतुत्वे प्राप्ते कर्मनिष्ठायाः ज्ञाननिष्ठाप्रा
प्तिहेतुत्वेन पुरुषार्थहेतुत्वं न स्वातंत्र्येण ॥ ज्ञाननिष्ठा तु कर्मनिष्ठोपायलब्धात्मिका सती स्वातंत्र्येणैव पुरुषार्थहेतु
रन्यानपेक्षेत्येतमर्थं दर्शयिष्यन्नाह भगवान् ॥ न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते ॥ न च सं
न्यसनादेव सिद्धिं समधिगच्छति ॥४॥ न कर्मणामनारंभात् कर्मणां क्रियमाणानां यज्ञादीनामिह जन्मांतरे वानु
ष्ठितानामुपात्तदुरितक्षयहेतुत्वेन सत्त्वशुद्धिकारणानां तत्कारणत्वेन च ज्ञानोत्पत्तिद्वारेण ज्ञाननिष्ठाहेतू
नां ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ॥ तथादर्शतलप्रख्ये पश्यन्नात्मानमात्मनीत्यादेः स्मरणा
दनंतरमनारंभादननुष्ठानान्नैष्कर्म्यं निःकर्मभावं कर्मशून्यतां ज्ञानयोगेन निष्ठां निःक्रियात्मस्वरूपेणैवावस्था
नमिति यावत् ॥ पुरुषो नाश्नुते न प्राप्नोतीत्यर्थः ॥ कर्मणामनारंभान्नैष्कर्म्यं नाश्नुत इत्युच्यते ॥ कर्मारंभस्य
नैष्कर्म्योपायत्वान्न ह्युपायमंतरेणोपेयप्राप्तिरस्ति ॥ कर्मयोगोपायत्वं च नैष्कर्म्यलक्षणस्य ज्ञानयोगस्य श्रु
ताविह च प्रतिपादनात् ॥ श्रुतौ तावत्प्रकृतस्यात्मलोकस्य वेद्यस्य वेदनोपायत्वेन ॥ तमेतं वेदानुवचनेन ब्रा

त्मणि विविदिषंति यज्ञेनेत्यादिना कर्मयोगस्य ज्ञानयोगोपायत्वं प्रतिपादितमभिहायैव ॥ संन्यासस्तु महाबाहो दुः
खमाप्तुमयोगतः योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये यज्ञो दानं तपश्चैव पावनानि मनीषिणामित्यादिप्र
तिपादयिष्यति ॥ ननु चात्रयं सर्वं हतेत्योदहानैष्कर्म्यमाचरेदित्यादौ कर्तव्यकर्मसंन्यासादपि नैष्कर्म्यप्राप्तिं
दर्शयति ॥ लोकेचकर्मणामनारंभान्नैष्कर्म्यमिति पुरुषश्रुतरमत मुनैष्कर्म्यार्थिनः किं कर्मारंभेणेति प्राप्ते
सिस्मतत्राह ॥ न च संन्यसनादेवेति । नापि संन्यसनादेव केवलात्कर्मपरित्यागमात्रादेव ज्ञानरहितात्सिद्धिं नै
ष्कर्म्यलक्षणं ज्ञानयोगनिष्ठां समधिगच्छति न प्राप्नोति ॥४॥ कस्मात्पुनः कारणं कर्मसंन्यासमात्रादेव केव
लाज्ज्ञानरहितात्सिद्धिं नैष्कर्म्यलक्षणं पुरुषो नाधिगच्छतीति हेत्वाकांक्षायामाह ॥ न हि कश्चित्क्षणमपि जा
तु तिष्ठत्यकर्मकृत् ॥ कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥५॥ न हीति यस्मात्क्षणमपि जातु तिष्ठत्यकर्मकृत्सन्क
स्मात्कार्यते हि यस्मादवश एव कर्म सर्वः प्राणी प्रकृतिजैः प्रकृतितो जातैः सत्वरजस्तमोगुणै रज्ञ इति
वाक्यशेषः ॥ यतो वक्ष्यति ॥ गुणैर्यो न विचाल्यत इति सांख्यानां पृथक्करणादज्ञानामेव हि कर्मयोगो न ज्ञानिनां
॥ ज्ञानिनां तु गुणैरचाल्यमानानां स्वतश्चलनेनोत्पत्तावा कर्मयोगो नोपपद्यते ॥ तथा च व्याख्यातं वेदाऽविनाशिन
मिति ॥५॥ अतश्चास्त्रहेतुरनात्मज्ञः चोदितं कर्म नारभत इति तदसदित्याह ॥ कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्म
रन् ॥ इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥६॥ कर्मेंद्रियाणि हस्तादीनि संयम्य संहृत्य य आस्ते इति वृत्तिमन
सा स्मरन्विद्धि इंद्रियार्थान्विषयान्विमूढात्मा विमूढांतःकरणो मिथ्याचारः कपटाचारः पापाचारः स उच्यते ॥६॥
यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन ॥ कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ॥७॥ यस्त्विति

नः कर्मण्येवाधिकारस्तस्माद्योऽवबुद्धीन्द्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेन्द्रियैः वाक्पाण्यादिभिः किमारभत इत्याह कर्मयोगमसक्त
त्तः स विशिष्यते इतरस्मान्मिथ्याचारात् यतस्त्वमतः ॥७॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ॥ शरीरयात्रापि च ते न प्रसिद्ध्ये
दकर्मणः ॥ ॥ नियतं नित्यं यो यस्मिन्कर्मण्यधिकृतः फलाय चाश्रुतं तन्नियतं कर्म कुरु त्वं यतः श्रेयोऽधिकतरमेवाकर्मणो हि यस्मा
त्तदकरणादनारंभात्कथं शरीरस्थितिरपि च ते तव न प्रसिद्ध्येत् न प्रसिद्धिं गच्छेत् अतः कर्मणोऽकरणात् प्रत्यक्षः कर्माकर्मणोर्विशेषो लोके
यच्च मन्यसे त्वं बंधार्थत्वात्कर्म न कर्त्तव्यमिति तदप्यसत्। कथं ॥८॥ यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः ॥ तदर्थं कर्म कौन्तेय मु
क्तसंगः समाचर ॥ ॥ यज्ञो वै विष्णुरीश्वरस्तदर्थं यत्क्रियते तद्यज्ञार्थं कर्म तस्मात्कर्मणोऽन्यत्रान्येन कर्मणा लोकोऽयमधिकृतः कर्म
बंधनः कर्म यस्य बंधनं यस्य स लोको न तु यज्ञार्थात् तस्मात्तदर्थं यज्ञार्थं कर्म कौन्तेय कर्मफलसंगवर्जितः समाचर इतरथाधिकृतेन क
र्म कर्त्तव्यं ॥९॥ सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ॥ अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ ॥ यज्ञसहिताः प्रजा
स्त्रयो वर्णास्ताः सृष्ट्वोत्पाद्य पुरा पूर्वसर्गादावुक्तवान्प्रजानां स्रष्टा पतिः अनेन यज्ञेन प्रसविष्यध्वं प्रसवो वृद्धिरुत्पत्तिस्तां कुरुध्वं। ए
ष यज्ञो वो युष्माकमस्तु इष्टान्प्रेतान्कामान्फलविशेषान्दोग्धीति इष्टकामधुक् कथं ॥१०॥ देवान्भावयतानेन ते देवा भावयं
तु वः ॥ परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ॥ देवानिन्द्रादीन्भावयत वर्धयतानेन यज्ञेन ते देवा भावयन्तु वो युष्मान
मेवं परस्परं भावयन्तः श्रेयः परं प्रविज्ञानप्राप्तिक्रमेणावाप्स्यथ स्वर्गं परं वा श्रेयोऽवाप्स्यथ किंच ॥११॥ निवर्त्तयद इत्यादि

कर्मबंधनो
नवतु
इकामधुजा

कर्म ज्यायो
मुक्तसंगो
वृष्ट्यादिना

इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः॥ तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः॥ ॥इष्टानभिप्रेतान्दीन् यज्ञेन भाविता व
र्द्धिताः तोषिताः संतो दास्यंते तैर्देवैर्दत्तान् प्रदायैभ्यो यो भुंक्ते भोगा[illegible] नऋणं दत्वा आत्मन्येव भक्षते इत्यर्थः एभ्यो देवेभ्यो यो भुंक्ते स्वदेहे
न्द्रियाण्येव तर्पयति स्तेन एव तस्कर एव सः देवस्वापहारीत्यर्थः॥१२॥ यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः॥ भुंजते ते त्वघं पा
पा ये पचंत्यात्मकारणात्॥ ॥देवयज्ञादीन्निर्वर्त्य शिष्टमशनममृताख्यमश्नितुं शीलं येषां ते सर्वैः किल्बिषैः पापैः चुल्ल्या
च दिपंचसूनाकृतैर्मुच्यते प्रमादकृतहिंसाजनितैश्चान्यैर्ये देहंभरयो भुंजते ते त्वघं पापं स्वयमपि पापा ये पचंति पाकं निर्वर्त्तयंति आ
त्मकारणादात्महेतोः इतश्चाधिकृतेन कर्म कर्त्तव्यं जगच्चक्रप्रवृत्तिहेतुर्हि कर्म कथमित्युच्यते॥१३॥ अन्नाद्भवंति भूतानि पर्ज
न्यादन्नसंभवः॥ यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥ ॥अन्नाद्भुक्तात् लोहितरेतःपरिणतात् प्रत्यक्षं भवंति जायंते भू
तानि पर्जन्याद्वृष्टेरन्नस्य संभवः यज्ञाद्भवति पर्जन्यः अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेर
न्नं ततः प्रजाः इति यज्ञः अपूर्वः स च कर्मसमुद्भवः ऋत्विग्यजमानयोश्च व्यापारः कर्म ततः समुद्भवो यस्य यज्ञस्यापूर्वस्य स यज्ञः कर्मसंभ
वः॥१४॥ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं॥ तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं॥ ॥ब्रह्म वेदः समुद्भवो यस्य तत्कर्म ब्र
ह्मोद्भवं विद्धि जानीहि ब्रह्म [illegible] पुनर्वेदाख्यमक्षरं परमात्मा समुद्भवो यस्य तदक्षरसमुद्भवं ब्रह्म तस्मात्सर्वार्थप्रकाश

कत्वात्सर्वगतं अपि हि नित्यं सदा यज्ञविधिप्रधानत्वाद्यज्ञे प्रतितिष्ठितं ॥१५॥ एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः ॥ अघायुरिन्द्रियारा
मो मोघं पार्थ स जीवति ॥ एवमीश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्त्तितं नानुवर्त्तयतीह यो लोके कर्मण्यधिकृतः सन्नघं पापं यस्यायु
जीवनं सोघायुः पापजीवन इति इन्द्रियैरारमणमाक्रीडा विषयेषु यस्य स इन्द्रियारामो मोघं वृथा हे पार्थ स जीवति तस्मादज्ञेनाधिकृ ८३
तेन कर्त्तव्यमेव कर्मेति प्रकरणार्थः प्रागात्मज्ञाननिष्ठायोग्यताप्राप्तेस्तादर्थ्येन कर्मयोगानुष्ठानमधिकृतेनानात्मज्ञेन कर्त्तव्यमित्ये
तत् न कर्मणामनारंभादित्यारभ्य शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मण इत्येवमंतेन प्रतिपाद्य यज्ञार्थात्कर्मणोन्यत्रेत्यादिना मोघं पार्थ
स जीवतीत्येवमंतेनापि ग्रंथेन प्रासंगिकमधिकृतस्यानात्मविदः कर्मानुष्ठाने बहुकारणमुक्तं तदकरणे च दोषसंकीर्त्तनं कृतमेवं स्थि
ते किमिदं प्रवर्त्तितं चक्रं सर्वेणानुप्रवर्त्तनीयमाहोस्वित्पूर्वोक्तकर्मयोगानुष्ठानोपायप्राप्यामात्मविदां ज्ञानयोगेनैव निष्ठामात्मविद्भिः
सांख्यैरनुष्ठेयामप्राप्तेनैवेत्येवमर्थमर्जुनस्य प्रश्नमाशंक्य स्वयमेव शास्त्रार्थस्य विवेकप्रतिपत्त्यर्थमेव चैतमात्मानं विदित्वा निवृत्तमिथ्या
ज्ञानाः संतो ब्राह्मणा मिथ्याज्ञानवद्भिरवश्यकर्त्तव्येभ्यः पुत्रैषणादिभ्यो व्युत्थायाथ भिक्षाचर्यं शरीरस्थितिमात्रप्रयुक्तं चरंति । न तेषामात्मज्ञा
ननिष्ठाव्यतिरेकेणान्यत्कार्यमस्तीत्येवं श्रुत्यर्थमिह गीताशास्त्रे प्रतिपादयिषितमाविष्कुर्वन्नाह भगवान् ॥१६॥ यस्त्वात्मरतिरेव स्या
दात्मतृप्तश्च मानवः ॥ आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ ॥यस्तु सांख्य आत्मज्ञाननिष्ठ आत्मनिरतिर्न विषयेषु यस्य स आत्मर
तिरेव न त्वात्मप्रबोधेनैव तृप्तो नान्नरसादिना स मनुष्यः संन्यासी आत्मन्येव च संतुष्टः संतोषो हि बाह्यार्थलाभे सर्वस्य भवति तमनपे

द्यात्मन्येव च संतुष्टः सर्वतो वीततृष्ण इत्येतत् य ईदृश आत्मवित्तस्य करणीयं नास्तीत्यर्थः ॥१७॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्च
न॥ न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥ ॥न च तस्यैवमात्मरतेः कृतेन कर्मणार्थः प्रयोजनमस्ति न ह्यकृतेन प्रत्यवायाख्यो
र्थो नाकृतेनेह लोके कश्चिदपि प्रत्यवायप्राप्तिरूप आत्महानिलक्षणो नैवास्ति। न चास्य सर्वभूतेषु ब्रह्मादिस्थावरांतेषु कश्चिदर्थव्यपा
श्रयः व्यपाश्रयणं किंचिद्भूतविशेषमाश्रित्य न साध्यः कश्चिदर्थोऽस्ति येन तदर्था क्रियानुष्ठेया च स्यात्। न त्वमेतस्मिन्सर्वतः संप्लुतोदकस्था
नीये सम्यग्दर्शने वर्त्तस्येव तत एवं॥१८॥ तस्मादसक्तः सततं कार्यं कर्म समाचर। असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः॥ ॥तस्मात्सं
गवर्जितः सर्वदा कर्त्तव्यं नित्यं कर्म समाचर निर्वर्त्तय। असक्तो हि यस्मात्समाचरन्नीश्वरार्थं कर्म कुर्वन्परं मोक्षमाप्नोति पूरुषः पुरु
षः सत्त्वशुद्धिद्वारेणेत्यर्थः यस्मात्॥१९॥ कर्मणैव हि संसिद्धिमास्थिता जनकादयः। लोकसंग्रहमेवापि संपश्यन्कर्त्तुमर्हसि॥ ॥कर्मणै
व हि पूर्वे क्षत्रिया विद्वांसः संसिद्धिं मोक्षं गंतुमास्थिताः प्रवृत्ता जनकाश्वपतिप्रभृतयो यदि ते प्राप्तसम्यग्दर्शनास्ततो लोकसंग्रहार्थं प्राप्तकर्मत्वा
त्कर्मणा सहैवासंन्यस्यैव कर्म संसिद्धिमास्थिता इत्यर्थः अथाप्राप्तसम्यग्दर्शना जनकादयस्तदा कर्मणा सत्त्वशुद्धिसाधनभूतेन क्रमेण संसि
द्धिमास्थिता इति व्याख्येयः श्लोकः अथ मन्यसे पूर्वैरप्यजानद्भिः कर्त्तव्यं नावश्यमन्येन कर्त्तव्यं सम्यग्दर्शनवता कृतार्थेनेति तथापि प्रार
ब्धकर्मायत्तस्त्वं लोकसंग्रहमेवापि लोकस्योन्मार्गप्रवृत्तिनिवारणं लोकसंग्रहः तमेवापि प्रयोजनं संपश्यन्कर्त्तुमर्हसि लोकसंग्रहं कः क
र्त्तुमर्हति कथं चेत्युच्यते॥२०॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते॥ ॥यद्यत्कर्माचरति

श्रेष्ठस्तत्तदेवेतरो जनः ॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥ ॥ यद्यत्कर्माचरति श्रेष्ठः प्रधानस्तदेव कर्माचरतीतरः अन्यो ज
नस्तदनुगतः किंच स श्रेष्ठो यत्प्रमाणं कुरुते लौकिकं वैदिकं वा लोकस्तदनुवर्त्तते तदेव प्रमाणं करोतीत्यर्थः यद्युक्तं लोकसंग्रहकर्त्तव्य
तायां विप्रतिपत्तिर्मयि किं न पश्यसि ॥२१॥ न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किंचन ॥ नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि ॥ ॥ न मे मम
पार्थ नास्ति विद्यते कर्त्तव्यं त्रिष्वपि लोकेषु किंचन किंचिदपि कस्मात् न अनवाप्तमवाप्तव्यं प्राप्तणीयं तथापि वर्त्त एव कर्मण्यहं ॥२२॥ यदि ह्यहं न व
र्त्तेयं जातु कर्मण्यतंद्रितः ॥ मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः ॥ ॥ यदि पुनरहं न वर्त्तेयं जातु कर्मण्यतंद्रितः सन् मम श्रेष्ठस्य सतो
मम मार्गमनुवर्त्तंते मनुष्याः सर्वशः सर्वप्रकारैस्तथा च को दोष इत्याह ॥२३॥ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं ॥ संकरस्य च का
र्त्ता स्यामुपहन्यामिमाः प्रजाः ॥ ॥ उत्सीदेयुर्विनश्येयुरिमे सर्वे लोकाः लोकस्थितिनिमित्तस्य कर्मणोऽभावात् न कुर्यां कर्म चेदहं संकरस्य
च कर्त्ता स्यां तेन कारणेनोपहन्यामिमाः प्रजाः ॥ प्रजानामनुग्रहाय प्रवृत्त उपहतिं कुर्यामिति ममेश्वरस्याननुरूपमापद्यते। यदि पुनर
हमिव त्वं कृतार्थबुद्धिरात्मविदन्यो वा तस्याप्यात्मनः कर्त्तव्याभावेपि परानुग्रह एव कर्त्तव्य इति ॥२४॥ सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भार
त ॥ विद्वान्कुर्यात्तथासक्तश्चिकीर्षुर्लोकसंग्रहं ॥ ॥ सक्ताः कर्मण्यस्य फलं मम भविष्यतीति केचिदविद्वांसो यथा कुर्वंति भारत कुर्या x
द्विद्वानात्मवित्तथासक्तः सन् तद्वत्किमर्थं करोतीति तदर्थमाह चिकीर्षुः कर्त्तुमिच्छुः लोकस्य संग्रहमेवं लोकस्य संग्रहं । चिकी
र्षुर्निर्ममात्मविदः कर्त्तव्यमन्यस्य वा लोकसंग्रहमुक्तो तस्यात्मविद इदमुपदिश्यते ॥२५॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसंगि x

नां॥जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्॥ ॥बुद्धेर्भेदः कर्त्तव्यं भोक्तव्यं चास्य कर्मणः फलमिति निश्चितरूपाया बुद्धेरन्या
स्या भेदं चालनं न जनयेन्नोत्पादयेत्। अज्ञानामविवेकिनां कर्मण्यासंगवतां किंतु कुर्याज्जोषयेत् कारयेत्सर्वकर्माणि स्वयं तदेवाविदु
षां कर्मयुक्तोऽभियुक्तः समाचरन् विद्वान्नरः कथं कर्मसु सज्जत इत्याह॥२६॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः॥ अहंकार
विमूढात्मा कर्त्ताहमिति मन्यते॥ ॥प्रकृतिः प्रधानं सत्वरजस्तमसां साम्यावस्था। तस्याः प्रकृतेर्गुणैर्विकारैः कार्यकारणरूपैः क्रि
यमाणानि कर्माणि लौकिकानि शास्त्रीयाणि च सर्वशः सर्वप्रकारैः। कार्यकारणसंघातात्मप्रत्ययोहंकारस्तेन विविधं नानामूढ आत्मां
तःकरणं यस्य सोयं कार्यकारणधर्मा कार्यकारणाभिमान्यविद्यया कर्माण्यात्मनि मन्यमानस्तत्कर्मणामहं कर्त्तेति मन्यते यः पुनर्विद्वा
न्॥२७॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः॥ गुणा गुणेषु वर्त्तत इति मत्वा न सज्जते॥ ॥त त्त्ववित्तु महाबाहो कस्य तत्त्ववि
द्गुणकर्मविभागयोः गुणविभागस्य कर्मविभागस्य च तत्त्वविदित्यर्थः गुणाः करणात्मका गुणेषु विषयात्मकेषु वर्त्तते नात्मेति मत्वा न सज्ज
ते सक्तिं न करोतीति पुनः॥२८॥ प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु॥ तानकृत्स्नविदो मंदान् कृत्स्नविन्न विचालयेत्॥ प्रकृतेर्गुणैः
सम्यङ्मूढाः संतः सज्जंते गुणानां कर्मसु वयं कुर्मः फलायेति तानकर्मसंगिनकृत्स्नविदः कर्मफलमात्रदर्शिनो मंदप्रज्ञान्कृत्स्न
विदात्मवित्स्वयं न विचालयेत्। बुद्धिभेदकरणमेव चालनं तन्न कुर्यादित्यर्थः कथं पुनः कर्मण्यधिकृतेनाज्ञेन मुमुक्षुणा कर्म कर्त्तव्य
मित्युच्यते॥२९॥ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा॥ निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥ ॥मयि देवे परमेश्वरे सर्व

रो सर्वात्मनि सर्वाणि कर्माणि संन्यस्य निःक्षिप्याध्यात्मचेतसा विवेकबुद्ध्या अहं कर्त्तेश्वराय भृत्यवत्करोमीत्यनया बुद्ध्या किं च निराशी
स्त्यक्ताशीर्ममत्वशून्यो निर्गतो यस्य तव स त्वं निर्ममो भूत्वा युध्यस्व विगतसंतापः विगतशोकः सन्नित्यर्थः ॥ ३० ॥ यदेतन्मम मतं कर्म कर्त्त
व्यमिति प्रमाणमुक्तं तत्तथा ॥ ॥ ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ॥ श्रद्धावंतोऽनसूयंतो मुच्यंते तेपि कर्मभिः ॥ ये मे मदीयं मतमनु
तिष्ठंत्यनुवर्त्तंते मनुष्याः श्रद्दधाना असूयां मयि गुरौ वाऽकुर्वंतो मुच्यंते ते ध्येवंभूताः कर्मभिर्धर्माधर्माख्यैः ॥ ३१ ॥ ये त्वेतदभ्यसूयंतो
नानुतिष्ठंति मे मतं ॥ सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ये तद्विपरीतास्त एते मम मतं नित्यं नो नानुवर्त्तंते सर्वेषु ज्ञानेषु विवि
ध मूढास्तेतान्नष्टान्नाशं गतानचेतसः अविवेकिनः कस्तु पुनः कारणात्त्वदीयं मतं नानुतिष्ठंति परधर्मं मनुतिष्ठंते स्वधर्मं च नानु
वर्त्तंते तत्र प्रतिकूलाः कथं नाविज्ञ्याति तत्र शासनातिक्रमदोषान् ॥ ३२ ॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ॥ प्रकृतिं यांति भूतानि निग्रहः किं
करिष्यति ॥ ॥ सदृशमनुरूपं चेष्टते स्वकीयायाः प्रकृतेः प्रकृतिर्नाम पूर्वकृतधर्माधर्मादिसंस्कारो वर्त्तमानजन्मादावभिव्यक्तः सा प्र
कृतिः तस्याः सदृशमेव सर्वो जंतुः ज्ञानवानपि किं मूर्खः सर्वः तस्मात्प्रकृतिं यांति भूतानि निग्रहः निरोधरूपः किं करिष्यति मम चान्यस्य
वा यदि सर्वस्यात्मनः प्रकृतिसदृशमेव चेष्टते न च प्रकृतिशून्यः कश्चिदस्ति ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्य प्राप्ता
विदमुच्यते ॥ ३३ ॥ इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ॥ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ॥ ॥ इंद्रियस्येंद्रियस्यार्थे
सर्वेंद्रियाणामर्थे शब्दादिविषये इष्टे रागः अनिष्टे द्वेष इत्येवं प्रतींद्रियार्थं रागद्वेषाववश्यंभाविनौ तत्रायं पुरुषकारस्य शास्त्रार्थस्य च

विषय उच्यते शास्त्रार्थे प्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत्। या हि पुरुषस्य प्रकृतिः सा रागद्वेषपुरःसरैव स्वकार्ये प्रवर्त्तयति तदा स्वध
र्मपरित्यागः परधर्मानुष्ठानं च भवति। यदा पुनः रागद्वेषौ तत्प्रतिपक्षेण नियमयति तदा शास्त्रदृष्टिरेव पुरुषो भवति न प्रकृतिवशः। तस्मात्त
यो रागद्वेषयोर्वशं नागच्छेत्। यतस्तौ तस्य पुरुषस्य परिपंथिनौ श्रेयोमार्गस्य विघ्नकर्त्तारौ तस्कराविव पथि तत्र रागद्वेषप्रयुक्तो मन्यते
शास्त्रार्थमप्यन्यथा परधर्मोऽपि धर्मत्वादनुष्ठेय एवेति तदसत्॥३४॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्॥ स्वधर्मे निधनं श्रेयः प
रधर्मो भयावहः॥ ॥श्रेयान्प्रशस्यतरः। स्वो धर्मो विगतगुणोऽपि अनुष्ठीयमानः परधर्मात्स्वनुष्ठितादपि स्वधर्मे स्थितस्य निध
३५ नं मरणमपि श्रेयः परधर्मस्थस्य जीवितात्। कस्मात्परधर्मो नरकादिलक्षणं भयमावहतीति॥३५॥ यद्यप्यनर्थमूलं ध्यायतो विषयान्रागद्वे
षौ ह्यस्य परिपंथिनाविति रागद्वेषौ संसारपातहेतुत्वादनर्थमूलमित्युक्तं तथापि विविक्तं चोक्तं विक्षिप्तमनसा त्वव[illegible]धारितं च तदुक्तं त
स्योच्छित्तिं चेदमेवेति ज्ञातुमिच्छन्नर्जुन उवाच। ज्ञाते हि तस्मिंस्तदुच्छेदाय यत्नं कुर्यामिति॥३६॥ अथ केन [illegible] प्रयुक्तोऽयं पापं चरति पू
रुषः। अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥ ॥अथ केन हेतुभूतेन प्रयुक्तः सन्राज्ञेव भृत्यो यं पापं कर्माचरति पुरुषः स्वयमनि
च्छन्नपि हे वार्ष्णेय बलादिव नियोजितो राज्ञेवेत्युक्तो दृष्टान्तः स्वरूपं तं वैरिणं सर्वानर्थकरं यं त्वं पृच्छसि॥ श्रीभगवानुवाच॥ ऐश्वर्यस्य सम
प ग्रस्य धर्मस्य यशसः श्रियः॥ वैराग्यस्याथ मोक्षस्य षण्णां भग इतीर्यते॥१॥ इति ऐश्वर्यादिषट्कं यस्मिन्वासुदेवे नित्यमप्रतिबद्धेन सामस्
त्येन च वर्त्तते। उत्पत्तिं निधनं [illegible] चैव भूतानामागतिं गतिं॥ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥२॥ उत्पत्तिप्रलयं चैवे

त्यादिविषयं च विज्ञानं यस्य वासुदेवो वाच्यो भगवानिति ॥ ॥काम एष क्रोध एष रजोगुणसमुद्भवः ॥ महाशनो महापाप्मा विद्ध्येनमि
ह वैरिणं ॥ ३७॥ काम एष सर्वलोकवशं कुर्वन् शत्रुर्येन निमित्ता सर्वानर्थप्राप्तिः प्राणिनां स एष कामः प्रतिहतः केनचित् क्रोधत्वेन परिण
मते । अतः क्रोधोप्येष एव रजोगुणसमुद्भवो रजश्च तद्गुणश्च रजो गुणः समुद्भवो यस्य सः कामो रजोगुणसमुद्भवो रजोगुणस्य वा स
मुद्भवः कामो ह्युद्भूतो रजः प्रवर्त्तयन् पुरुषं प्रवर्त्तयति । तृष्णयाह्यहं कारित इति दुःखितानां रजःकार्ये सेवादौ प्रवृत्तानां प्रलापः श्रूय
ते । महाशनो महदशनमस्येति महाशनः अत एव महापाप्मा कामेन हि प्रेरितो जन्तुः पापं करोत्यतो विद्ध्येनं काममिह संसारे वैरिणं ॥
३७॥ कथं वैरीति दृष्टान्तैः प्रत्याययति ॥ ॥धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ॥ यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतं ॥ ३८॥ धूमे
न सहजेनाव्रियते वह्निः प्रकाशात्मकोऽप्रकाशात्मकेन यथा चादर्शो मलेन यथोल्वेन च गर्भवेष्टनेन जरायुणा आच्छादितो गर्भस्तथा तेने
दमावृतं ॥ ३८॥ किं पुनस्तदिदं शब्दवाच्यं यत्कामेनावृतमित्युच्यते ॥ ॥आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ॥ कामरूपेण कौन्तेय
दुःपूरेणानलेन च ॥ ३९॥ आवृतमेतेन ज्ञानं ज्ञानिनो नित्यवैरिणा ज्ञानी हि जानात्यनेनाहमनर्थे प्रयुक्त इति पूर्वमेव दुःखी च भगव
त्यते । नित्यमेवासौ ज्ञानिनो नित्यवैरिणां तु मूर्खस्य स हि कामं तृष्णाकाले मित्रमिव पश्यंस्तत्कार्ये दुःखे प्राप्ते जानाति तृष्णयाहं दुःखित्वमापा
न१ दित इति पूर्वमेवातो ज्ञानिन एव नित्यवैरी किंरूपेण कामरूपेण कामिनाभिछैव रूपमस्येति कामरूपस्तेन दुःखेन पूरणमस्येति दुःपुरः

न२

वैं तेन रानतके नास्यालं पर्याप्तिर्विद्यते इत्यनलस्तेन।। किमधिष्टानः कामो ज्ञानस्यावरणत्वेन वैरी सर्वस्येत्यपेक्षायामाह ज्ञाते हि श
त्रोरधिष्टाने सुखेन शत्रुं निबर्हणं कर्तुं शक्य इति।। ३९।। इंद्रियाणि मनो बुद्धिरस्याधिष्टानमुच्यते।। एतैर्विमोहयत्येष ज्ञानमावृत्य
देहिनं।। ४०।। इंद्रियाणि मनो बुद्धिश्चास्य कामस्याधिष्टानमाश्रय उच्यते आश्रयः कथ्यते एतैरिंद्रियादिभिराश्रयैर्विमोहयति
विविधं मोहयत्येष कामो ज्ञानमावृत्याच्छाद्य देहिनं शरीरिणं।। ४०।। यतएवं।। तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ।। पा
प्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं।। ४१।। तस्मात्त्वमिंद्रियाण्यादौ प्रथममेव नियम्य वशीकृत्य भरतर्षभ पाप्मानं [illegible] कामं
प्रजहि परित्यज हि यस्मादेनं प्रकृतं वैरिणं ज्ञानविज्ञाननाशनं ज्ञानं शास्त्रतः आचार्यतश्च आत्मादीनामवबोधो विज्ञानं वि
शेषतस्तदनुभवस्तयोर्ज्ञानयोः श्रेयःप्राप्तिहेत्वोर्नाशनं जहिहि मा आत्मनः परित्यजेत्यर्थः।। ४१।। इंद्रियाण्यादौ नियम्य कामं शत्रुं
जहि हीत्युक्तं तत्र किमाश्रयः कामं जह्यादित्युच्यते।। ।। इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः।। मनसस्तु परा बुद्धिर्यो बुद्धेः
परतस्तु सः।। ४२।। इंद्रियाणि श्रोत्रादीनि पंच देहस्थूलं बाह्यं परिछिन्नं चापेक्ष्य सौक्ष्म्यांतरत्वव्यापित्वाद्यपेक्षया पराणि प्रकृष्टा
न्याहुः पंडितास्तथेंद्रियेभ्यः परं मनः संकल्पविकल्पात्मकं तथा मनसस्तु परा बुद्धिर्निश्चयात्मिका तथा सर्वदृश्येभ्यो बुद्ध्यंते
भ्यो भ्यंतरो यं देहिनमिंद्रियादिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तं स बुद्धेर्द्रष्टा परश्चात्मा।। ४२।। एवं बुद्धे
र्बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।। जहि शत्रुं महाबाहो कामरूपं दुरासदं।। ४३।। एवं बुद्धेः परमात्मानं बुद्ध्वा ज्ञात्वा संस्तभ्य सम्यक्

स्तंभं कृत्वात्मनात्मानं स्वेनैवात्मना सम्यक्समाधायेत्यर्थः ॥ जहि शत्रुं महाबाहो कामरूपं दुरासदं ॥ दुःखेनासदंआसनं प्राप्तिर्यस्य ५
तं दुरासदं दुर्विज्ञेयानेकविशेषमिति ॥ ४३ ॥ ॥ इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यस्य शंकरभगव
तः कृतौ गीताभाष्ये कर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥ श्रीभगवानुवाच ॥ योऽयं योगोऽध्यायद्वयेनोक्तो ज्ञाननिष्ठालक्षणः सं
न्यासः स कर्मयोगोपायो यस्मिन्वेदार्थः परिसमाप्तः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च गीतासु सर्वास्वयमेव योगो विवक्षितो भगव भ॰
तोऽममध्यायद्वयेनोक्तं योगंऽतः परिसमाप्तं सकलवेदार्थं मन्वानस्तं वंशकथनेन स्तौति भगवान् ॥ ॥ इमं विवस्वते योगं प्रो
क्तवानहमव्ययं ॥ विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥ ऽममध्यायद्वयेनोक्तं योगं विवस्वते आदित्याय सर्गादौ प्रोक्त
वानहं जगत्परिपालयितॄणां क्षत्रियाणां बलाधानाय तेन हि योगबलेन युक्ताः समर्था भवंति ब्रह्म परिरक्षितुं ब्रह्मक्षत्रेण परि
पालितं जगत्परिपालयितुमलं अव्ययमव्ययफलत्वान्न ह्यस्य सम्यग्दर्शननिष्ठालक्षणस्य मोक्षाख्यं फलं व्येति ॥ स च विव वेदं ६
स्वान्मनवे प्राह मनुरिक्ष्वाकवे स्वपुत्राय आदिराजायाब्रवीत् ॥ १ ॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः ॥ स कालेनेह महता योगो
नष्टः परंतप ॥ २ ॥ एवं क्षत्रियपरंपराप्राप्तमिमं राजर्षयो राजानश्च ते स्वयंश्च ते राजर्षयो विदुरिमं योगं स योगः कालेनेह म
हता दीर्घेण नष्टो विच्छिन्नसंप्रदायः संवृत्तः हे परंतप आत्मनो विपक्षभूताः परे उच्यंते तान्शौर्यतेजोगभस्तिभिः भानुरिव तापय
तीति परंतपः शत्रुतापन इत्यर्थः ॥ २ ॥ दुर्बलानजितेंद्रियान्प्राप्य नष्टं योगमुपलभ्य लोकं चापुरुषार्थसंबंधिनं ॥ ॥ स एवायं म

यो तेद्य योगः प्रोक्तः पुरातनः ॥ भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमं ॥३॥ स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः भ-
क्तोऽसि मे सखा चासीति रहस्यं हि यस्मादेतदुत्तमं योगो ज्ञानमित्यर्थः ॥ भगवता विप्रतिषिद्धमुक्तमिति मन्वानस्तस्य चिद्धुद्धिरिति परि-
प्रश्न २ हारार्थं चोद्यमिव कुर्वन्नर्जुन उवाच ॥ ॥अपरं भवतो जन्म परं जन्म विवस्वतः ॥ कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४॥ अ-
परमर्वाग्वसुदेवगृहे भवतो जन्म परं पूर्वं सर्गादौ जन्मोत्पत्तिर्विवस्वतः आदित्यस्य तत्कथमे तद्विजानीयामविरुद्धार्थतया त्वमे-
वादौ प्रोक्तवानिमं योगं स त्वमेवेदानीं मह्यं प्रोक्तवानसीति ॥४॥ वासुदेवे रनीश्वरासर्वज्ञाशंकामर्जुनतो परिहरन्भगवानु-
वाच ॥ यदर्थोऽर्जुनस्य प्रश्नः ॥ बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ॥ तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥५॥ बहूनि मे व्यती-
तानि अतिक्रान्तानि जन्मानि तव च हे अर्जुन तान्यहं वेद जाने सर्वाणि न त्वं वेत्थ न जानीषे धर्माधर्मप्रतिबंधज्ञानशक्तित्वात् अहं तु नित्यशु-
द्धबुद्धमुक्तस्वभावत्वादनावरणज्ञानशक्तिरिति हे परंतप वेदाहं कथं तर्हि नित्येश्वरस्य धर्माधर्माभावे जन्मेत्युच्यते ॥ ॥अजोऽपि स-
न्नव्ययात्मा भूतानामीश्वरोऽपि सन् ॥ प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥६॥ अजोऽपि जन्मरहितोऽपि सन् तथाव्ययात्मा अक्षीणगु-
णामूर्तिज्ञानशक्तिस्वभावोऽपि सन् तथा भूतानां ब्रह्मादिस्तंबपर्यंतानां ईश्वरः ईशनशीलोऽपि सन् प्रकृतिं मम वैष्णवीं मायां त्रिगुणात्मि-
कां यस्या वशे सर्वं जगद्वर्तते यया मोहितः सन् स्वमात्मानं वासुदेवं जानाति तां प्रकृतिं स्वामधिष्ठाय वशीकृत्य संभवामि देहवानिव जात
इवात्ममायया न परमार्थतो लोकवत् ॥६॥ तच्च जन्म कदा किमर्थं चेदं उच्यते ॥ ॥यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥ अभ्युत्थानम-

श्री २ न २

धर्मस्य तदात्मानं सृजाम्यहं ॥७॥ यदा यदा हि धर्मस्य ग्लानिर्हानिर्वृत्तिश्र माहित्लक्षणस्य प्राणिनामभ्युदयनिःश्रेयससाधन
स्य भवति भारत अभ्युत्थानं समुद्भवो ऽधर्मस्य तदा तदात्मानं सृजाम्यहं मायया ॥७॥ किमर्थं ॥ परित्राणाय साधूनां विनाशाय
च दुष्कृतां ॥ धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥८॥ परित्राणाय परिरक्षणाय साधूनां सन्मार्गस्थानां विनाशाय च दु
ष्कृतां पापकारिणां ॥ किंच ॥ धर्मसंस्थापनार्थाय धर्मस्य सम्यक्स्थापनं धर्मसंस्थापनं तदर्थं संभवामि युगे युगे प्रतियुगं ॥
८॥ ॥ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ॥ त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥९॥ जन्म मायारूपं कर्म च साधुपरि
नश्यचिकं ९ त्राणादि मे मम दिव्यमप्राकृतमैश्वरमेवं यथोक्तं यो वेत्ति तत्त्वतस्तत्त्वेन यथावत् त्यक्त्वा देहमिमं पुनर्जन्म पुनरुत्पत्तिं नैति न प्रा
प्नोति मामेत्यागच्छति समुच्यते हे ऽर्जुन ॥९॥ नैष मोक्षमार्ग इदानीं प्रवृत्तः किंतर्हि पूर्वमपि ॥ ॥ वीतरागभयक्रोधा मन्मया मा
मुपाश्रिताः ॥ बहवो ज्ञानतपसा पूता मद्भावमागताः ॥१०॥ वीतरागभयक्रोधा रागश्च भयं च क्रोधश्च वीता विगता येभ्यस्ते वीतराग
भयक्रोधाः मन्मया ब्रह्मविद ईश्वराभेददर्शिनो मामेव च परमेश्वरमुपाश्रिताः केवलज्ञाननिष्ठा इत्यर्थः ॥ बहवो ऽनेके ज्ञानतप
सा ज्ञानमेव परमात्मविषयं तपस्तेन ज्ञानतपसा पूताः परां शुद्धिंगताः संतो मद्भावमीश्वरभावं मोक्षमागताः समनुप्राप्ताः इतरतपो निर
पेक्षाः ज्ञाननिष्ठा इत्यस्य लिंगं ज्ञानतपसेति विशेषणं ॥१०॥ तव तर्हि रागद्वेषौ स्तो येन केभ्यश्चिदेवात्मभावं प्रयच्छसि न सर्वेभ्य इत्यु
च्यते ॥ ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं ॥ मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः ॥११॥ ये यथा येन प्रकारेण येन प्रयोज

नपुनः रागद्वेषनिमित्तं वा कांश्चिद्भजामि २

२७
गी॰ता॰

नेन यत्फलार्थि [illegible] तथा मां प्रपद्यन्ते तांस्तथैव तत्फलदानेन भजाम्यनुगृह्णाम्यहं तेषां मोक्षं प्रत्यनर्थित्वात् न ह्येक॥
स्य मुमुक्षुत्वं फलार्थित्वं च युगपत्संभवति अतो ये फलार्थिनस्तान् फलदानेन ये यथोक्तकारिणस्त्वफलार्थिनो मुमुक्षवश्च तान्
ज्ञानप्रदानेन ये ज्ञानिनः संन्यासिनो मुमुक्षवस्तान्मोक्षप्रदानेन तथार्त्तानार्त्तिहरणेनैवं यथा प्रपद्यन्ते ये तांस्तथैव भजामीत्यर्थः॥
न पुनरागद्वेषनिमित्तं मोहनिमित्तं वा कांश्चिद्भजामि सर्वथापि सर्वावस्थस्य मम ईश्वरस्य वर्त्म मार्गमनुवर्त्तन्ते मनुष्या यत्फलार्थितया
यस्मिन्कर्मण्य॰ धिकृता ये प्रपद्यन्ते ते मनुष्या अत्र उच्यन्ते पार्थ सर्वशः प्रकारैः॥११॥ यदि तवेश्वरस्य रागादिदोषाभावात्सर्व
प्राणिष्वनुजिघृक्षायां तुल्यायां सर्वफलप्रदानसमर्थे च त्वयि सति वासुदेवः सर्वमिति ज्ञानेनैव मुमुक्षवः सन्तः कस्मात्त्वामेव सर्वे न
प्रपद्यन्त इति शृणु तत्र कारणम्॥ ॥काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः॥ क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा॥१२॥ काङ्क्षन्
तः अभीप्सन्तः कर्मणां सिद्धिं फलनिष्पत्तिं प्रार्थयन्तो यजन्ते इहास्मिल्लोके देवता इन्द्राग्न्याद्या अथ योन्यां देवतामुपास्तेऽन्योसावन्यो
हमस्मीति न स वेद यथा पशुरेवं स देवानामिति श्रुतेः॥ तेषां हि भिन्नदेवतायाजिनां फलकाङ्क्षिणां क्षिप्रं शीघ्रं हि यस्मान्मानुषे लोके मनु
ष्यलोके हि शास्त्राधिकारः॥ क्षिप्रं मानुषे लोके इति विशेषणादन्येष्वपि कर्मफलसिद्धिं दर्शयति भगवान् मानुषे लोके वर्णाश्रमादिकर्म
णीति विशेषः॥ तेषां च वर्णाश्रमाद्यधिकारि कर्मणां फलसिद्धिः क्षिप्रं भवति कर्मजा कर्मणो जाता॥१२॥ मानुषे लोके वर्णाश्रमादि॥
कर्माधिकारो नान्येषु लोकेष्विति नियमः किंनिमित्त इति अथवा वर्णाश्रमादिप्रविभागोपेताः मनुष्या मम वर्त्मानुवर्त्तन्ते सर्वशः इत्युक्तं॥

परिमत्क
र्ममोघाना
मोदि॰

२७
गी॰ता॰

कस्मात्पुनः कारणान्नियमेन तवैव वर्त्मानुवर्त्तन्ते नान्यस्येत्युच्यते॥ ॥चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः॥ तस्य कर्त्ता
रमपि मां विद्ध्यकर्त्तारमव्ययं॥१३॥ चातुर्वर्ण्यं चत्वार एव वर्णाश्चातुर्वर्ण्यं मयेश्वरेण सृष्टमुत्पादितं गुणकर्मविभागशः गु
णविभागशः कर्मविभागशश्च गुणाः सत्वरजस्तमांसि तत्र सात्विकस्य सत्वप्रधानस्य ब्राह्मणस्य शमो दमस्तप इत्यादीनि कर्माणि
णि सत्वोपसर्जनस्य रजःप्रधानस्य क्षत्रियस्य शौर्यतेजप्रभृतीनि कर्माणि तमउपसर्जनस्य रजःप्रधानस्य वैश्यस्य कृष्या
दीनि कर्माणि॥ रजउपसर्जनस्य तमःप्रधानस्य शूद्रस्य शुश्रूषैव कर्मेत्येवं गुणकर्मविभागशः चातुर्वर्ण्यं मया सृष्ट
मित्यर्थः॥ तच्चेदं चातुर्वर्ण्यं नान्येषु लोकेष्वतो मानुषे लोक इति विशेषणं॥ हन्त तर्हि चातुर्वर्ण्यस्य सर्गादेः कर्मणः कर्त्तृत्वात्त
त्फलेषु युज्यसे अतो न त्वं नित्यमुक्तो नित्येश्वरश्चेत्युच्यते यद्यपि मायासंव्यवहारेण तस्य कर्मणः कर्त्तारमपि संतं मां परमार्थ
तोऽकर्त्तारं विद्ध्यत एवाव्ययमसंसारिणं च मां विद्धि॥१३॥ येषां तु कर्मणां कर्त्तारं मां मन्यसे परमार्थतस्तेषामकर्त्ताहं यतः॥ ॥न मां
कर्माणि लिंपंति न मे कर्मफले स्पृहा॥ इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥१४॥ न मां तानि कर्माणि लिंपंति देहाद्यारंभकत्वेनाहं
काराभावान्न च तेषां कर्मणां फलेषु मे मम स्पृहा तृष्णा येषां तु संसारिणामहं कर्त्तेत्यभिमानः कर्मसु स्पृहा तत्फलेषु च तान् कर्माणि लिंपंति
इति युक्तं तदभावान्न मां कर्माणि लिंपंतीत्येवं योन्योपि मामात्मत्वेनाभिजानाति नाहं कर्त्ता न मे कर्मफले स्पृहेति कर्मभिर्न स बध्यते॥ तस्या
पि न देहादेरारंभकाणि कर्माणि भवंतीत्यर्थः॥१४॥ नाहं कर्त्ता न मे कर्मफले स्पृहेति॥ ॥एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः॥

कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं॥१५॥ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः कुरु तेन कर्मैव त्वं न तूष्णीमासनं नापि संन्या-
सः कर्तव्यस्तस्मात्त्वं पूर्वैरप्यनुष्ठितत्वात् यद्यनात्मज्ञस्त्वं तदात्मशुद्ध्यर्थं तत्त्वविच्चेत्तर्हि लोकसंग्रहार्थं पूर्वैर्जनकादिभिः पूर्वतरं कृतं नाधु-
नोक्ते तं निवर्त्तितं॥१५॥ तत्र कर्म चेत्कर्त्तव्यं त्वद्वचनादेव करोम्यहं किं विशेषितेन पूर्वैः पूर्वतरं कृतमित्युच्यते। यस्मान्महद्वैषम्यं कर्मा कर्मणि।
कथं॥ ॥किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः॥ तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥१६॥ किं कर्म किं वाकर्मेति कवयो मेधा-
विनोऽप्यत्रास्मिन्कर्मादिविषये मोहिता मोहं गताः अतस्ते तुभ्यमहं कर्माकर्म च प्रवक्ष्यामि यज्ज्ञात्वा कर्मादि मोक्ष्यसेऽशुभात्संसारात्॥१६॥ न चैत-
त्त्वया मन्तव्यं कर्म नाम देहादिचेष्टा लोकप्रसिद्धं अकर्म नाम तदक्रिया तूष्णीमासनं किं तत्र बोद्धव्यमिति कस्मादुच्यते॥ ॥कर्मणो ह्य-
पि बोद्धव्यं बोद्धव्यं च विकर्मणः॥ अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः॥१७॥ कर्मणः शास्त्रविहितस्यापि यस्मादप्यस्ति बोद्धव्यं बोद्ध-
व्यं चास्ति विकर्मणः प्रतिषिद्धस्य तथाऽकर्मणश्च तूष्णीभावस्य बोद्धव्यमस्तीति त्रिष्वप्यध्याहारः कर्त्तव्यो यस्माद्गहना विषमा दुर्ज्ञाना क-
र्मणस्तूपलक्षणार्थं कर्मादीनां कर्माकर्मविकर्मणां गतिर्याथात्म्यं तत्त्वमित्यर्थः॥१७॥ किं पुनस्तत्त्वं कर्मादेर्यद्बोद्धव्यं वक्ष्यामीति प्रतिज्ञातं तदु-
च्यते॥ ॥कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः॥ स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥१८॥ कर्मणि क्रियत इति व्यापा-
रमात्रं तस्मिन्कर्मण्यकर्म कर्माभावं यः पश्येदकर्मणि च कर्माभावे च कर्तृतन्त्रत्वात् प्रवृत्तिनिवृत्त्योः वस्त्वप्राप्यैव हि सर्व एव क्रियाकारक-
कादिव्यवहारोऽविद्याभूमावेव कर्म यः पश्येत्पश्यति स बुद्धिमान्मनुष्येषु स युक्तो योगी च कृत्स्नकर्मकृत्समस्तकर्मकृच्च स इति स्तूयते

नेतदकमेव॰

कर्माकर्मणोः इतरेतरदर्शी। ननु किमिदं विरुद्धमुच्यते कर्मण्यकर्म यः पश्येदकर्मणि च कर्मेति। न हि कर्माकर्म स्यादकर्म वा कर्म। तत्र कथं विरु
द्धं पश्येद्द्रष्टा। नैतत्। अकर्मैव परमार्थतः सत्कर्मवदवभासते मूढदृष्टेर्लोकस्य तथा कर्मैवाकर्मवत्। तत्र यथाभूतदर्शनार्थमाह भगवान्क
र्मण्यकर्म यः पश्येदित्याद्यतो न विरुद्धं बुद्धिमत्त्वाद्युपपत्तेः। बोद्धव्यमिति च यथाभूतमुच्यते। न च विपरीतज्ञानादशुभान्मोक्षणं स्याद्य
ज्ज्ञात्वा मोक्ष्यसेऽशुभादिति चोक्तं। तस्मात्कर्माकर्मणी विपर्ययेण गृहीते प्राणिभिस्तद्विपर्ययग्रहणनिवृत्त्यर्थं भगवतो वचनं कर्मण्यकर्म य
इत्यादि। न चात्र कर्माधिकरणमकर्मास्ति कुण्डे बदराणीव। नाप्यकर्माधिकरणं कर्मास्ति कर्माभावत्वादकर्मणः। अतो विपरीतगृहीते एव कर्माक
र्मणी लौकिकैर्यथा मृगतृष्णिकायामुदकं शुक्तिकायां वा रजतं। ननु कर्म कर्मैव वाऽकर्माऽकर्मैव सर्वेषां न क्वचिद्व्यभिचरति। तन्न। नौस्थस्य
नावि गच्छन्त्यां तटस्थेष्वगतिषु नगेषु प्रतिकूलगतिदर्शनात्। दूरेषु च चक्षुषासन्निकृष्टेषु गच्छत्सु गत्यभावदर्शनात्। एवमिहात्वकर्मणि ×
कर्मदर्शनं कर्मणि वाऽकर्म। विपरीतदर्शनं येनामिहाप्यकर्मण्येव हं करोमीति कर्मदर्शनं। विपरीतदर्शनं कर्मणि चाकर्मणो दर्शनं येन तन्नि
राकरणार्थमुच्यते। कर्मण्यकर्मेत्यादि तदेतदुक्तप्रतिवचनमप्यसकृदत्यन्तविपरीतदर्शनभावितया मोमुह्यमानो लोकः श्रुतमप्यसकृत्तत्त्वं
त्वं विस्मृत्य विस्मृत्य मिथ्याप्रसंगमवतार्यावतार्य चोदयतीति पुनः पुनरुत्तरमाह भगवान्दुर्विज्ञेयत्वं चालक्ष्य वस्तुनः। अव्यक्तोयमचिंत्योयं
न जायते म्रियते इत्यादिनात्मनि कर्माभावः श्रुतिस्मृतिन्यायप्रसिद्धः। उक्तो वक्ष्यमाणश्च। तस्मिन्नात्मनि कर्माभावेऽकर्मणि च कर्मविपरी
तदर्शनमत्यन्तनिरूढं यतः किं कर्म किमकर्मेति कवयोप्यत्र मोहिताः। देहाद्याश्रयं कर्मात्मन्यध्यारोप्याहं कर्ता ममैतत्कर्म मयास्य कर्मणः

एवमिहाप्यकर्मण्येकर्मदर्शनं विपरीतदर्शनं कर्मणि चाकर्मणो दर्शनं अनेन

न

२९
गी॰भा॰

फलं भोक्तव्यमिति च तथाहं तूष्णीं भवामि येनाहं निरायासः सुखी स्यामिति कार्यकारणाश्रयं व्यापारोपरमं कर्मैव तत्कृतं च सुखि-
त्वमात्मन्यध्यारोप्य न करोमि किंचित् तूष्णीं सुखमासे इत्यभिमन्यते लोकस्तत्रेदं लोकस्य विपरीतदर्शनापनयनायाह भगवान् कर्म-
ण्यकर्म य इत्यादि। अत्र च कर्म कर्मैव सत्कार्यकारणाश्रयं कर्मरहिते अविक्रिये आत्मनि सर्वैरध्यस्तं यतः पंडितोप्यहं करोमीति मन्य-
ते। अतश्चात्मसमवेततया सर्वलोकप्रसिद्धे कर्मणि नदीकूलस्थेष्विव वृक्षेषु गतिप्रातिलोम्येनाकर्म कर्माभावं यथाभूतं गत्यभावमि-
व वृक्षेषु यः पश्येदकर्मणि च कार्यकारणव्यापारोपरमे कर्मवदात्मन्यध्यारोपिते तूष्णीमकुर्वन् सुखमासे इत्यहंकाराभिसंधिहेतुत्वात् त-
स्मिन्नकर्मणि च कर्म यः पश्येद्य एवं कर्मा कर्मविभागज्ञः स बुद्धिमान् पंडितो मनुष्येषु युक्तः स योगी कृत्स्नकर्मकृच्चासावशुभान्मोक्षि-
तः कृतकृत्यो भवतीत्यर्थः॥ अयं श्लोकोऽन्यथा व्याख्यातः कैश्चित्। कथं नित्यानां किल कर्मणामीश्वरार्थेऽनुष्ठीयमानानां तत्फलाभावादक-
र्माणि तान्युच्यंते गौण्या वृत्त्या। तेषां चाकरणं कर्म तच्च प्रत्यवायफलत्वात्कर्मोच्यते गौण्यैव वृत्त्या। तत्र नित्ये कर्मण्यकर्म यः पश्येत्तत्फलाभावा-
द्यथा धेनुरपि गौरगौरित्युच्यते क्षीराख्यं फलं न प्रयच्छतीति तद्वत्। तथा नित्याकरणे त्वकर्मणि कर्म यः पश्येन्नरकादिप्रत्यवायफलं प्रयच्छ-
तीति। नैतद्युक्तं व्याख्यानमेवं ज्ञानादशुभान्मोक्षानुपपत्तेर्यज्ज्ञात्वा मोक्ष्यसेऽशुभादिति भगवतोक्तं बाध्येत। कथं नित्यानामनुष्ठानादशुभात्स्या-
न्नाम मोक्षणं न तु तेषां फलाभावज्ञानान्न हि नित्यानां फलाभावज्ञानमशुभमुक्तिफलत्वेन चोदितं नित्यकर्मज्ञानं वा। न च भगवतैवेहोक्तमे-
तेनाकर्मणि कर्मदर्शनं निरस्तं। न ह्यकर्मणि कर्मेति दर्शनं कर्तव्यतयेह चोद्यते। नित्यस्य तु कर्तव्यतामात्रं न चाकरणान्नित्यस्य प्रत्यवा-

२९
गी॰भा॰

योऽभवतीति विज्ञानात् । किंचित्फलं स्यान्नापि नित्याकरणं ज्ञेयत्वेन चोदितं नापि कर्माकर्मेति मिथ्यादर्शनादशुभान्मोक्षणं न च बु
द्धिमत्त्वयुक्तता लौकिकर्मिकत्वादि च फलमुपपद्यते श्रुतिर्वा । मिथ्याज्ञानमेव हि साक्षादशुभस्वरूपं कुतोऽन्यस्मादशुभान्मोक्षणं न हि तम
स्तमसो निवर्तकं भवति । ननु कर्मणि यदकर्मदर्शनं कर्मणि चाकर्मदर्शनं न तन्मिथ्याज्ञानं किं तर्हि गौणं फलभावाभावनिमित्तं न का
र्माकर्मविज्ञानादपि गौणात्फलं स्याच्छ्रवणान्नापि श्रुतहान्यश्रुतकल्पनायां कश्चिद्विशेष उपलभ्यते स्वशब्देनापि शक्यं वक्तुं नित्यक
र्मणां फलं नास्त्यकरणाच्च तेषां नरकपातः स्यादिति तत्र व्याजेन परव्यामोहरूपेण कर्मण्यकर्म यः पश्येदित्यादिना किं तत्रैवं व्याच
क्षाणेन भगवता वाक्यं न्लोकव्यामोहार्थमिति व्यक्तं कल्पितं स्यान्नचैतच्छद्मरूपेण वाक्येन रक्षणीयं वस्तु नापि शब्दांतरेण पुनः पु
नरुच्यमानं सुबोधं स्यादित्येवं वक्तुं युक्तं कर्मण्येवाधिकारस्ते इत्यत्र स्फुटतरमुक्तत्वान्न पुनर्वक्तव्यं भवति सर्वत्र च प्रशस्तं बोद्धव्यं
च कर्तव्यमेव निःप्रयोजनं बोद्धव्यमित्युच्यते न च मिथ्याज्ञानं बोद्धव्यं भवति तत्प्रत्युपस्थापितं वा वस्त्वाभासं । नापि नित्यानामकरणाद
भावात्प्रत्यवायभावोत्पत्तिः । नासतो विद्यते भाव इति कथमसतः सज्जायेतेति च दर्शितं असतः सदुत्पत्तिं ब्रुवता सदेव सद्भवेत्सच्चासद्भ
वेदित्युक्तं स्यात्तच्चायुक्तं सर्वप्रमाणविरोधात् । न च निष्फलं विदध्यात्कर्म शास्त्रं दुःखस्वरूपत्वाद्दुःखस्य च बुद्धिपूर्वकतया कार्यत्वानुपप
त्तेः तदकरणे च नरकपाताभ्युपगमे तदर्थ्यैवोभयथापि करणे करणे च शास्त्रं कल्पितं स्यात्तथाचाभ्युपगमविरोधश्च नित्यं निःफलं कर्मेत्य
भ्युपगम्य मोक्षफलायेति ब्रुवतस्तस्माद्यथाश्रुत एवार्थः कर्मण्यकर्म यः इत्यादेस्तथा च व्याख्यातोऽस्माभिः श्लोकः ॥१८॥ तदेतत्कर्मण्यकर्मद

शनं स्तूयते॥ ॥यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः॥ ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः॥१९॥ यस्य यथोक्तदर्शनस्य सर्वे
यावंतः समारंभाः सर्वाणि कर्माणि समारभ्यंत इति समारंभाः कामसंकल्पवर्जिताः कामैस्तत्कारणैः संकल्पैश्च वर्जिताः मुधैव चेष्टामा
त्रा अनुष्ठीयंते प्रवृत्तेन चेल्लोकसंग्रहार्थं निवृत्तेन चेज्जीवनमात्रार्थं ज्ञानाग्निदग्धकर्माणं कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्निस्तेन
ज्ञानाग्निना दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तमाहुः परमार्थतः पंडितं बुधाः ब्रह्मविदः यस्त्वकर्मादिदर्शी सोऽकर्मादिद
र्शनादेव निःकर्मा संन्यासी जीवनमात्रार्थचेष्टः कर्मणि न प्रवर्त्तते यद्यपि प्राग्विवेकतः प्रवृत्तो यस्तु प्रारब्धकर्मा सन्नुत्तरकाल
नं॰६ उत्पन्नात्मसम्यग्दर्शनः स्यात्स कर्मणि प्रयोजनमपश्यन् ससाधनं कर्म परित्यजत्येव स कुतश्चिन्निमित्तात्कर्मपरित्यागासंभ
वे सति तत्फले च संगरहिततया स्वप्रयोजनाभावाल्लोकसंग्रहार्थं पूर्ववत्॥ कर्मणि प्रवृत्तोपि नैव किंचित्करोति ज्ञानाग्निदग्धकर्म
त्वात्तदीयं कर्माकर्मैव संपद्यत इत्येतमर्थं दर्शयिष्यन्नाह॥ ॥त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः॥ कर्मण्यभिप्रवृत्तोपि नै
व किंचित्करोति सः॥२०॥ त्यक्त्वा कर्मस्वभिमानं फलासंगं च यथोक्तेन ज्ञानेन नित्यतृप्तो नित्यतृप्तो निराकांक्षो विषयेष्वित्यर्थः॥
निराश्रय आश्रयरहितः आश्रयो नाम यदाश्रित्य पुरुषार्थं सिसाधयिषति दृष्टादृष्टेष्टफलसाधनाश्रयरहित इत्यर्थः॥ एवंभू
तेन प्रयोजनाभावात्ससाधनं कर्म त्यक्तव्यमेवेति प्राप्ते ततो निर्गमासंभवात् लोकसंग्रहचिकीर्षया शिष्टविगर्हणापरिजिही
र्षया वा पूर्ववत्कर्मण्यभिप्रवृत्तोपि निःक्रियात्मदर्शनसंपन्नत्वान्नैव किंचित्करोति सः॥२०॥ यः पुनः पूर्वोक्तविपरीतः प्रागेव कर्मारं

मात्मत्वब्रह्मणि सर्वांतरे प्रत्यगात्मनि निष्क्रिये संजातात्मदर्शनः स दृष्टादृष्टेष्टविषयाशीर्विवर्जिततया दृष्टादृष्टार्थे कर्मणि प्र
योजनमपश्यन्ससाधनं कर्म संन्यस्य शरीरयात्रामात्रचेष्टो यतिर्ज्ञाननिष्ठो मुच्यत इत्येतमर्थं दर्शयितुमाह ॥ ॥निराशीर्यतचि
त्तात्मा त्यक्तसर्वपरिग्रहः ॥ शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं ॥२१॥ निराशीः निर्गता आशिषो यस्मात् स निराशीः । यतचित्ता
त्मा चित्तमंतःकरणमात्मा बाह्यः कार्यकारणसंघातः तावुभावपि यतौ संयतौ येन स यतचित्तात्मा त्यक्तसर्वपरिग्रहः त्यक्तः सर्वः परिग्र
गी ५ हो येन स त्यक्तसर्वपरिग्रहः । शारीरं शरीरस्थितिमात्रप्रयोजनं केवलं कर्म तत्राप्यभिमानवर्जितं कुर्वन्नाप्नोति किल्बिषमनिष्टरूपं पापं
धर्मं च धर्मोपि मुमुक्षोः किल्बिषमिव बंधनं । किंच ॥ शारीरं केवलं कर्मेत्यत्र किं शरीरनिर्वर्त्यं शारीरं कर्माभिप्रेतमाहोस्वित् शरीरस्थि
तिमात्रप्रयोजनं शारीरं कर्मेति यदा शरीरनिर्वर्त्यं कर्म शारीरमभिप्रेतं स्यात् तदा दृष्टादृष्टप्रयोजनं कर्म प्रतिषिद्धमपि शरीरेण
कुर्वन्नाप्नोति किल्बिषमित्यपि ब्रुवतो [illegible] विरुद्धाभिधानं प्रसज्येत शास्त्रीयं च कर्म दृष्टादृष्टप्रयोजनं शरीरेण कुर्वन्नाप्नो
ति किल्बिषमित्यपि ब्रुवतो प्राप्तप्रतिषेधप्रसंगः शारीरं कर्म कुर्वन्निति विशेषणात् केवलशब्दप्रयोगाच्च वाङ्मनसाभ्यां निर्वर्त्यं विधिप्र
तिषेधविषयं धर्माधर्मशब्दवाच्यं कुर्वन्नाप्नोति किल्बिषमित्युक्तं स्यात् तत्रापि वाङ्मनोभ्यां विहितानुष्ठानपक्षे किल्बिषप्राप्तिवचनं विरु
द्धमापद्येत प्रतिषिद्धसेवापक्षेपि भूतार्थानुवादमात्रमनर्थकं स्यात् ॥ यदा तु शरीरस्थितिमात्रप्रयोजनं शारीरं कर्माभिप्रेतं भवेत् तदा दृ
ष्टादृष्टप्रयोजनं कर्म विधिप्रतिषेधगम्यं शारीरं वाङ्मनोनिर्वर्त्यमन्यदकुर्वंस्तैरेव शरीरादिभिः शरीरस्थितिमात्रप्रयोजनं केवलं

शब्दप्रयोगादहं करोमीत्यभिमानवर्जितः शरीरादिचेष्टामात्रं लोकदृष्ट्या कुर्वन्नाप्नोति किल्बिषमेवंभूतस्य पापशब्दवाच्यकिल्बि-
ल्बिषप्राप्त्यसंभवात्किल्बिषं संसारं न प्राप्नोति ज्ञानाग्निदग्धसर्वकर्मत्वादप्रतिबंधेन मुच्यत एवेति पूर्वोक्तः सम्यग्दर्शनफलानुवा-
द एवैषः। एवं शारीरं केवलं कर्मेत्यस्यार्थस्य परिग्रहे निरवद्यं भवति॥२१॥ त्यक्तसर्वपरिग्रहस्य यतेरन्नादेः शरीरस्थितिहेतोः
परिग्रहस्याभावाद्याचनादिना शरीरस्थितौ कर्तव्यतायां प्राप्तायामयाचितमसंक्लृप्तमुपपन्नं यदृछयेत्यादिवचनेनानुज्ञातं यतेः
शरीरस्थितिहेतोरन्नादेः प्राप्तिद्वारमाविःकुर्वन्नाह॥ ॥यदृछालाभसंतुष्टो द्वंद्वातीतो विमत्सरः॥ समः सिद्धावसिद्धौ च कृ-
त्वापि न निबध्यते॥२२॥ यदृछयालाभसंतुष्टोऽप्रार्थितउपपन्नो लाभो यदृछालाभस्तेन संतुष्टः संजातालंप्रत्ययः द्वंद्वातीतो द्वंद्वैः शी-
तोष्णादिभिर्हन्यमानोप्यविषण्णचेता द्वंद्वातीत उच्यते। विमत्सरो निर्वैरबुद्धिः समस्तुल्यो यदृछालाभस्य सिद्धावसिद्धौ च य ए-
वंभूतो यतिरन्नादेः शरीरस्थितिहेतोर्लाभालाभयोः समो हर्षविषादवर्जितः कर्मादावकर्मादिदर्शी यथाभूतात्मदर्शननिष्ठः शरी-
रस्थितिमात्रप्रयोजने भिक्षाटनादौ कर्मणि शरीरादिनिर्वर्त्ये नैव किंचित्करोम्यहं॥ गुणा गुणेषु वर्त्तंत इत्येवं सदा परिचक्षाण आत्मनः
कर्तृत्वाभावं पश्यन्नैव किंचिद्भिक्षाटनादिकं कर्म करोति लोकव्यवहारसामान्यदर्शनेन तु लौकिकैरारोपितकर्तृत्वे भिक्षाटनादौ कर्म-
णि कर्त्ता भवति भिक्षाटनादिचेष्टास्वप्यकर्तृत्वानुसंधानमेव विदुषः सर्वदा स्वानुभवेन तु शास्त्रप्रमाणजनितेनाकर्त्तैव। स एवं पराध्यारो-
पितकर्तृत्वः शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्म कृत्वापि न निबध्यते बंधहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निना दग्धत्वादि॥

त्युक्तानुवादएवैषः त्यक्त्वाकर्मफलासंगमित्यनेनश्लोकेनयःप्रारब्धकर्मासन्नुत्पन्नात्मनिःक्रियब्रह्मात्मदर्शनसंपन्नःस्यात्तदातस्या
त्मनःसर्वकर्मप्रयोजनाभावदर्शिनःकर्मपरित्यागेप्राप्तेकुतश्चिन्निमित्तात्तदसंभवेसतिपूर्ववत्तस्मिन्कर्मण्यभिप्रवृत्तस्यापिनैवकिं
चित्करोतिसइतिकर्माभावप्रदर्शितोयस्यैवंकर्माभावोदर्शितस्तस्यैव॥२२॥ ॥गतसंगस्यमुक्तस्यज्ञानावस्थितचेतसः॥यज्ञाया
चरतःकर्मसमग्रंप्रविलीयते॥२३॥गतसंगस्यसर्वतोनिवृत्तासक्तेर्मुक्तस्यनिवृत्तधर्माधर्मादिबंधकस्यज्ञानावस्थितचेतसःज्ञान
एवावस्थितंचेतोयस्यज्ञानावस्थितचेतास्तस्ययज्ञाययज्ञनिर्वृत्त्यर्थमाचरतोनिर्वर्त्तयतःकर्मसमग्रंसहाग्रेणफलेनवर्त्ततइ
तिसमग्रंकर्मतत्समग्रंप्रविलीयतेविनश्यतीत्यर्थः॥२३॥कस्मात्पुनःकारणात्क्रियमाणंकर्मस्वकार्यारंभमकुर्वन्समग्रंप्रविलीय
यतइत्युच्यतेयतः॥ ॥ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं॥ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिना॥२४॥ब्रह्मार्पणंयेन
करणेनब्रह्मविद्धविरग्नावर्पयतितद्ब्रह्मैवेतिपश्यतितस्यात्मव्यतिरेकेणाभावंपश्यतियथाशुक्तिकायांरजताभावंतद्वदुच्यते
ब्रह्मैवार्पणमितियथायद्रजतंतत्शुक्तिकैवेतिब्रह्मार्पणमित्यसमस्तेपदेयदर्पणबुध्यागृह्यतेलोकेतदस्यब्रह्मविदोब्रह्मैवेत्यर्थः
॥ब्रह्महविस्तथायद्धविर्बुध्यागृह्यमाणंतद्ब्रह्मैवास्यात्तथाब्रह्माग्नावितिसमस्तंपदमग्निरपिब्रह्मैव॥यत्रहूयतेब्रह्मणाकर्त्राब्रह्मैव
कर्त्रेत्यर्थः।यदनेनहुतंहवनक्रियापिब्रह्मैवयत्तेनतेनगंतव्यंफलंतदपिब्रह्मैवब्रह्मकर्मसमाधिनाब्रह्मैवकर्मब्रह्मकर्मतत्रब्रह्मकर्म
णिसमाधिर्यस्यसब्रह्मकर्मसमाधिस्तेनब्रह्मकर्मसमाधिनाब्रह्मैवगंतव्यमेवंलोकसंग्रहंचिकीर्षुणापिक्रियमाणंकर्मपरमार्थतोऽकर्मब्र

ब्रह्मत्वात ?

ज्ञानस्य ब्रह्मयज्ञत्वसंपादनाभावेः

ह्मबुद्ध्युपमर्दितत्वान्निवृत्तकर्मणोऽपि सर्वकर्मसन्यासिनः सम्यग्दर्शनस्तुत्यर्थं ब्रह्मयज्ञत्वसंपादनं ज्ञानस्य सुतरामुपपद्यते यदर्पणा
द्यधियज्ञे प्रसिद्धं तदस्याध्यात्मं ब्रह्मैव परमार्थदर्शिन इति॥ अन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं
स्यात्तस्माद्ब्रह्मैवेदं सर्वमिति जानतः सर्वकर्माभावः कारकबुद्ध्यभावाच्च न हि कारकबुद्धिरहितं यज्ञाख्यं कर्म दृष्टं सर्वमेवाग्निहोत्रादिकं
कर्मशब्दसमर्पितं देवताविशेषसंप्रदानादिकारकबुद्धिमत्कर्त्रभिमानफलाभिसंधिमच्च दृष्टं नोपमर्दितक्रियाकारकफलभेदबुद्धिम
त्कर्तृत्वाभिमानफलाभिसंधिरहितं वा इदं तु ब्रह्मबुद्ध्युपमर्दितार्पणादिकारकक्रियाफलभेदबुद्धि कर्मातोऽकर्मैव तथा च दर्शितं
कर्मणे कर्म यः पश्येत्कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः। गुणा गुणेषु वर्त्तन्ते नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्। इत्यादि
भिस्तथा च दर्शयंस्तत्र तत्र क्रियाकारकभेदबुद्ध्युपमर्दं करोति। दृष्टं च काम्याग्निहोत्रादौ कामोपमर्देन काम्याग्निहोत्रादिहानिस्तथा मतिपूर्व
कत्वादीनां कर्मणां कार्यविशेषस्यारंभकत्वं दृष्टं तथेहापि ब्रह्मबुद्ध्युपमर्दितार्पणादिकारकक्रियाफलभेदबुद्धेर्बाह्यचेष्टामात्रेण कर्मापि वि
दुषोऽकर्म संपद्यते तदुक्तं समग्रं प्रविलीयत इति। अत्र केचिदाहुः। यद्ब्रह्मार्पणादीनि ब्रह्मैव किलार्पणादिना पंचविधेन कारकात्मनाव
स्थितं सत्तदेव कर्म करोति तत्र नार्पणादिबुद्धिर्निवर्त्यते किंत्वर्पणादिषु ब्रह्मबुद्धिराधीयते यथा प्रतिमादौ विष्ण्वादिबुद्धिर्यथा नामा
दौ ब्रह्मबुद्धिरेवं सत्यमपि स्याद्यदि ज्ञानयज्ञस्तुत्यर्थं प्रकरणं न स्यादत्र तु सम्यग्दर्शनं ज्ञानयज्ञशब्दितमनेकान्यज्ञशब्दितान्क्रियावि
शेषानुपन्यस्य श्रेयान्द्रव्यमयाद्यज्ञात्ज्ञानयज्ञ इति ज्ञानं स्तौति। अत्र च समर्थमिदं वचनं ब्रह्मार्पणमित्यादि ज्ञानस्य यज्ञत्वसंपादने

अन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषत्वेन ब्रह्मत्वाभिधानमनर्थकं स्यात्। ये त्वर्पणादिषु प्रतिमायां विष्णुदृष्टिवत् ब्रह्मदृष्टिं क्षिपंति ना-
मादिष्विव चेति ब्रुवते न तेषां ब्रह्मविद्योक्तेह विव[illegible]र्पणादिविषयत्वात् ज्ञानस्य न च दृष्टिसंपादनज्ञानेन मोक्षफलं प्राप्यते। ब्रह्मैव तेन गंतव्यमिति चो-
च्यते। विरुद्धं च सम्यग्दर्शनमंतरेण मोक्षफलं प्राप्यत इति प्रकृतविरोधश्च सम्यग्दर्शनं च प्रकृतं कर्मण्यकर्म यः पश्येदित्यत्रांते च सम्यग्दर्श-
नस्यैवोपसंहारात्। श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञो ज्ञानं लब्ध्वा परां शांतिमित्यादिना सम्यग्दर्शनस्तुतिमेव कुर्वन्नुपक्षीणोऽध्यायस्तत्राकस्मा-
दर्पणादौ ब्रह्मदृष्टिरप्रकरणे प्रतिमायामिव विष्णुदृष्टिरुच्यत इत्यनुपपन्नं तस्माद्यथाव्याख्यातार्थ एवायं श्लोकः॥२४॥ तत्राधुना सम्यग्दर्श-
नस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थमन्येऽपि यज्ञा उपक्षिप्यंते दैवमेवेत्यादिना॥ ॥दैवमेवापरे यज्ञं योगिनः पर्युपासते॥ ब्रह्माग्नावपरे यज्ञं
यज्ञेनैवोपजुह्वति॥२५॥ दैवमेव देवा इज्यंते येन यज्ञेनासौ दैवो यज्ञस्तमेवापरे यज्ञं योगिनः कर्मिणः पर्युपासते कुर्वंतीत्यर्थः॥
ब्रह्माग्नौ सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्म यत्साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वांतर इत्यादिवचनोक्तमशनाया[illegible]दिसर्वसं-
सारधर्मवर्जितं नेति नेतीति निरस्ताशेषविशेषं ब्रह्मशब्देनोच्यते। ब्रह्म च तदग्निश्च स होमाधिकरणत्वविवक्षया ब्रह्माग्निस्तस्मिन्ब्र-
ह्माग्नावपरेऽन्ये ब्रह्मविदो यज्ञं ब्रह्मयज्ञशब्दवाच्यमात्मानं आत्मनामसु यज्ञशब्दस्य पाठात्तमात्मानं यज्ञं परमार्थतः परमेव ब्र-
ह्मसंतं बुद्ध्याद्युपाधिसंयुक्तमध्यस्तसर्वोपाधिधर्मकमाहुतिरूपं यज्ञेनैवात्मनैवोक्तलक्षणेनोपजुह्वति प्रक्षिपंति सोपाधिकस्यात्म-
नो निरुपाधिकेन परं ब्रह्मस्वरूपेणैव यद्दर्शनं स तस्मिन्होमस्तं कुर्वंति ब्रह्मात्मैकत्वदर्शननिष्ठाः संन्यासिन इत्यर्थः। [illegible] सोऽयं सम्य-

३३ गी॰ग्रं॰

रुद्र

गदर्शनलक्षणो यज्ञो देवयज्ञादिषु यज्ञेषु पठ्यते। ब्रह्मार्पणमित्यादिश्लोकैः श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञ इत्यादिरित्यर्थः॥
२५॥ श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति। शब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति॥२६॥ श्रोत्रादीनींद्रियाण्यन्ये योगिनः संयमाग्नि
षु प्रतींद्रियं संयमोऽग्निश्च इति अग्निष्विति बहुवचनं संयमा एवाग्नयस्तेषु जुह्वति इंद्रियसंयममेव कुर्वंतीत्यर्थः॥ शब्दादीन्विषयानन्ये इंद्रिया
ग्निषु इंद्रियाग्निषु इंद्रियाण्येवाग्नयस्तेष्विंद्रियाग्निषु जुह्वति श्रोत्रादिभिरविरुद्धविषयग्रहणं होमं मन्यंते॥२६॥ सर्वाणींद्रियकर्माणि
प्राणकर्माणि चापरे। आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते॥२७॥ सर्वाणींद्रियकर्माणि इंद्रियाणां कर्माणि तथा प्राणकर्माणि प्राणो
वायुस्तदाध्यात्मिकस्तत्कर्माण्याकुंचनप्रसारणादीनि तानि चापरे आत्मसंयमयोगाग्नौ आत्मनि संयमः आत्मसंयमः स एव योगो अग्निस्त
स्मिन् आत्मसंयमयोगाग्नौ जुह्वति प्रक्षिपंति ज्ञानदीपिते स्नेहेनेव प्रदीपो विवेकविज्ञानेनोज्ज्वलभावमापादिते जुह्वति प्रविलापयंतीत्य
र्थः॥२७॥ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे। स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः॥२८॥ द्रव्ययज्ञास्तीर्थेषु द्रव्यविनियोगं यज्ञ
बुद्ध्या कुर्वंति ये ते द्रव्ययज्ञाः तपो यज्ञो येषां तपस्विनस्ते तपोयज्ञाः योगयज्ञाः प्राणायामप्रत्याहारादिलक्षणो योगो येषां ते योगयज्ञास्तथापरे
स्वाध्याययज्ञा ज्ञानयज्ञाश्च स्वाध्यायो यथाविधि ऋगादिपाठाभ्यासो येषां ते स्वाध्याययज्ञाः। ज्ञानयज्ञाः ज्ञानं शास्त्रार्थपरिज्ञानं यज्ञो येषां ते ज्ञानय
ज्ञाश्च यतयो यतनशीलाः संशितव्रताः सम्यक्शितानि तनूकृतानि तीक्ष्णीकृतानि व्रतानि येषां ते संशितव्रताः॥२८॥ किंच॥ ॥अपाने
जुह्वति प्राणं प्राणेऽपानं तथापरे। प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥२९॥ अपाने प्राणवृत्तौ जुह्वति प्रक्षिपंति प्राणं प्राणवृत्तिं पर

द्रौ

३३ गी॰ग्रं॰

कारव्यं प्राणायामं कुर्वंतीत्यर्थः ॥ प्राणेऽपानं तथापरे जुह्वति रेचकाख्यं प्राणायामं कुर्वंतीत्येतत् प्राणापानगती रुद्ध्वा मुखनासिकाभ्यां
वायोर्निर्गमः प्राणस्य गतिः तद्विपर्ययेणाधोगमनमपानस्य ते प्राणापानगती एते रुद्ध्वा निरुध्य प्राणायामपरायणाः प्राणायामतत्परा
कुंभकप्राणायामं कुर्वंतीत्यर्थः ॥ २९ ॥ किंच ॥ अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ॥ सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥
अपरे नियताहाराः नियतः परिमित आहारो येषां ते नियताहाराः संतः प्राणान्वायुभेदान्प्राणेष्वेव जुह्वति यस्य यस्य वायोर्जयः क्रियते इ
तरान्वायुभेदान्तस्मिंस्तस्मिन्जुह्वति ते तत्र प्रविष्टा इव भवंति सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः यज्ञैर्यथोक्तैः क्षपितो ना
शितः कल्मषो येषां ते यज्ञक्षपितकल्मषाः ॥ ३० ॥ एवं यथोक्तान्यज्ञान्निर्वर्त्य ॥ ॥ यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनं ॥ नायं लो
कोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥ यज्ञशिष्टामृतभुजो यज्ञानां शिष्टं यज्ञशिष्टं यत्तदमृतं च तत् भुंजते इति यज्ञशिष्टामृतभुजो
यांति गच्छंति ब्रह्म सनातनं चिरंतनं मुमुक्षवश्चेत्कालादिक्रमापेक्षयेति । सामर्थ्याद्गम्यते नायं लोकः सर्वप्राणिसाधारणोऽस्ति यथोक्तानां यज्ञा
नामेकोऽपि यज्ञो यस्य नास्ति सोऽयज्ञस्तस्य कुतोऽन्यो विशिष्टसाधनसाध्यः कुरुसत्तम ॥ ३१ ॥ एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ॥ कर्मजा
न्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥ एवं यथोक्ता बहुविधा बहुप्रकारा यज्ञा वितता विस्तीर्णा ब्रह्मणो वेदस्य मुखे द्वारे वेदद्वारेणावगम्यमा
नाः ब्रह्मणो मुखे वितता उच्यंते तद्यथा वाचि हि प्राणं जुहुयाम इत्यादयः कर्मजान् कायिकमानसवाचिककर्मोद्भवान् विद्धि तान्सर्वान् [illegible] तज्जा
त्वानिर्व्यापारो ह्यात्म एवं ज्ञात्वा विमोक्ष्यसे अशुभात् न मद्व्यापारा एते निर्व्यापारो ह्यहमुदासीन इत्येवं ज्ञात्वा तस्मात्सम्यग्दर्शनान्मोक्ष्यसे

ज्ञानादेव मुक्तिरिति शब्दसामर्थ्यान्न गम्यते

भुंजते

यथोक्तान्यज्ञान्कृत्वा तत् शिष्टे काले न य
यथाविधि चैवं दितमन्नममृतनाख्यं

संसारबंधनादित्यर्थः ॥३२॥ ब्रह्मार्पणमित्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं संपादितं । यज्ञाश्चानेक उपदिष्टास्तैः सिद्धपुरुषार्थप्रयोज-
नैर्ज्ञानं स्तूयते कथं ॥ ॥श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ॥ सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥ श्रेयान्द्रव्यमयाद्द्र
व्यसाधनसाध्यात् यज्ञात् ज्ञानयज्ञः परंतप द्रव्यमयो हि यज्ञः फलस्यारंभको न ज्ञानयज्ञः फलारंभकोऽतः श्रेयान्प्रशस्यतरः कथं यतः सर्वं
कर्म समस्तमखिलं कर्म वेदोक्तं पार्थ ज्ञाने मोक्षसाधने परिसमाप्यते तत्र भवतीत्यर्थः ॥ यथा च ॥ कृताय विजितायाधरेयाः संयंत्येवमेनं सर्वं त
दभिसमेति यत्किंचित्प्रजाः साधु कुर्वंति यस्तद्वेद यत्स वेदेति श्रुतेः ॥३३॥ तदेवं विशिष्टं ज्ञानं तर्हि केन प्राप्यत इत्युच्यते ॥ ॥तद्विद्धि प्रणि
पातेन परिप्रश्नेन सेवया ॥ उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ॥३४॥ तद्विद्धि जानीहि येन विधिना प्राप्यत इत्याचार्यानभिगम्य प्रणि
पातेन प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारस्तेन कथं बंधः कथं मोक्षः का विद्या का चाविद्येति परिप्रश्नेन सेवया गुरुशुश्रूषया ये
त्येवमादिना प्रश्रयेण आवर्जिता आचार्या उपदेक्ष्यंति कथयिष्यंति ते ज्ञानं यथोक्तविशेषणं ज्ञानिनो ज्ञानवंतोऽपि केचिद्यथावत्तत्त्वदर्शनशीलि शास्त्रीयज्ञानवंतः ५
नोऽपरे नातो विशिनष्टि तत्त्वदर्शिन इति ये सम्यग्दर्शिनस्तैरुपदिष्टं ज्ञानं कार्यक्षमं भवति नेतरदिति भगवतो मतं तथा च सतीदमपि समर्थं ॥
व चनं ॥ ॥यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव ॥ येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥३५॥ यज्ज्ञात्वा यत् ज्ञानं तैरुपदिष्टमधि
गम्य पुनर्भूयो मोहमेवं यथेदानीं मोहं गतोऽसि पुनरेवं न यास्यसि हे पांडव किंच येन ज्ञानेन भूतान्यशेषेण ब्रह्मादिस्तंबपर्यंतानि द्रक्ष्यसि
साक्षादात्मनि प्रत्यगात्मनि मत्संस्थानीमानि भूतानीति अथो अपि मयि वासुदेवे परमेश्वरे च इमानीति क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसि

ॐ द्रक्ष्यसीत्यर्थः॥३५॥ किं चैतस्य ज्ञानस्य माहात्म्यं॥ ॥अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः॥ सर्वं ज्ञानप्लवेनैव वृजिनं सं-
तरिष्यसि॥३६॥ अपि चेदसि पापेभ्यः पापकृद्भ्यः सर्वेभ्योतिशयेन पापकृत् पापकृत्तमः। सर्वं ज्ञानप्लवेनैव वृजिनार्णवं सर्वपापसमुद्रं सं-
तरिष्यसि॥३६॥ धर्मोपीह मुमुक्षोः पापमुच्यते ज्ञानं कथं नाशयति पापमिति दृष्टांतमाह॥ ॥यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेऽ-
र्जुन॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥३७॥ यथैधांसि काष्ठानि समिद्धः सम्यगिद्धो दीप्तोग्निः भस्मसाद्भस्मीभावं कुरुते
ऽर्जुन एवं ज्ञानमेवाग्निर्ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा निर्बीजीकरोतीत्यर्थः॥३७॥ नहि साक्षादेव ज्ञानाग्निः कर्माणींध- मर्वेध
नवत् भस्मीकर्तुं शक्नोति तस्मात्सम्यग्दर्शनं सर्वकर्मणां निर्बीजत्वकारणमित्यभिप्रायः। सामर्थ्यात् येन कर्मणा शरीरमारब्धं त-
दं त्प्रवृत्तफलत्वादुपभोगेनैव क्षीयते। अतो यान्यप्रवृत्तफलानि ज्ञानोत्पत्तेः प्राक्कृतानि ज्ञानसहभावीनि च अतीतानेकजन्मकृतानि च
तान्येव [illegible] सर्वाणि कर्माणि भस्मसात्कुरुते यत एवमतः॥ ॥नहि ज्ञानेन सदृशं पवित्र-
मिह विद्यते॥ तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति॥३८॥ नहि ज्ञानेन सदृशं तुल्यं पवित्रं पावनं शुद्धिकरमिह विद्यते तत् ज्ञानं स्व-
यमेव योगसंसिद्धो योगेन कर्मयोगेन च संसिद्धः संस्कृतो योग्यतामापन्नः सन् मुमुक्षुः कालेन महता आत्मनि विंदति लभत इत्यर्थः॥३८॥
येनैकांतेन ज्ञानप्राप्तिर्भवति स उपाय उपदिश्यते॥ ॥श्रद्धावान् लभते ज्ञानं तत्परः संयतेंद्रियः॥ ज्ञानं ल[illegible]ब्ध्वा परां शांतिमचिरेणा-
धिगच्छति॥३९॥ श्रद्धावान् श्रद्धालुः लभते ज्ञानं श्रद्धालुत्वेपि भवति कश्चिन्मंदप्रस्थानः तत आह। तत्परो गुरूपासनादावभियुक्तो ज्ञानल-

समाधियोगेनच२

बुद्ध्यु॰ पाये श्रद्धावान्। तत्परो ऽप्यजितेन्द्रियः स्यादित्यत आह। संयतेंद्रियः संयतानि विषयेभ्यो निवर्तितानि यस्येंद्रियाणि स संयतें-
द्रियो य एवंभूतः श्रद्धावान् तत्परः संयतेंद्रियः सो ऽवश्यं ज्ञानं लभते प्रणिपातादिस्तु बाह्यो ऽनैकांतिको ऽपि भवति। मायावित्वादिना-
पि संभवात् न तु तथा श्रद्धावत्त्वादावित्येकांततो ज्ञानलब्ध्युपायः किं पुनर्ज्ञानलाभात्स्यादित्युच्यते॥ ज्ञानं लब्ध्वा परां मो॰ क्षाख्यां
शांतिमुपरतिमचिरेण क्षिप्रमेवाधिगच्छति॥३९॥ सम्यग्दर्शनात्क्षिप्रं मोक्षो भवतीति सर्वशास्त्रार्थन्यायप्रसिद्धः सुनिश्चितो ऽर्थः। अत्र
ज्ञा॰ संशयो न कर्तव्यः पापिष्ठो हि संशयः कथमित्युच्यते॥ ॥अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति॥ नायं लोको ऽस्ति न परो न सुखं
संशयात्मनः॥४०॥ अज्ञश्चानात्मज्ञो ऽश्रद्दधानश्च संशयात्मा च विनश्यति। अज्ञाश्रद्दधानो यद्यपि विनश्यतो न तथा यथा यथा सं-
शयात्मा तु पापिष्ठः सर्वेषां कथं नायं साधारणो ऽपि लोको ऽस्ति तथा न परो लोको न सुखं तत्रापि संशयोपपत्तेः संशयात्मनः संशयाच्चत्तस्य
तस्मात्संशयो न कर्तव्यः॥४०॥ कस्मात्॥ ॥योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं॥ आत्मवंतं न कर्माणि निबध्नंति धनंजय॥४१॥ यो-
गसंन्यस्तकर्माणं परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि कर्माणि येन परमार्थदर्शिना धर्माधर्माख्यानि तं योगसंन्यस्तकर्माणं कथं यो-
४ गसंन्यस्तकर्मेत्याह। ज्ञानेनात्मेश्वरैकत्वदर्शनलक्षणेन संछिन्नः संशयो यस्य स ज्ञानसंछिन्नसंशयः एवं योगसंन्यस्तकर्माणं तमात्मवंत-
मप्रमत्तं गुणचेष्टारूपेण दृष्टानि कर्माणि न निबध्नंति। अनिष्टादिरूपं फलं नारंभंते इत्यर्थः॥ हे धनंजय॥४१॥ यस्मात्कर्मयोगानुष्ठाना-
दशुद्धिक्षयहेतुकज्ञानसंछिन्नसंशयो न निबध्यते कर्मभिः॥ ज्ञानाग्निदग्धकर्मत्वादेव यस्माच्च ज्ञानकर्मानुष्ठानविषये संशयवान् विनश्यति॥ ॥

४१

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ॥ छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥४२॥ तस्मात्पापिष्ठमज्ञानसंभूतमज्ञानादविवेकाज्जा-
तं हृत्स्थं हृदि बुद्धौ स्थितं ज्ञानासिना शोकमोहादिदोषहरं सम्यग्दर्शनं ज्ञानं तदेवासिः तेन ज्ञानासिनात्मनः स्वस्यात्मविषयत्वात्सं-
शयस्य न हि परस्य संशयः परस्य छेत्तव्यतां प्राप्तः येन स्वस्येति विशेषितत्वात् ॥ विशेष्यते ॥ आत्मविषयोपि स्वस्यैव भवति ॥ छित्त्वैनं सं-
शयं स्वविनाशहेतुभूतं योगं सम्यग्दर्शनोपायं कर्मानुष्ठानमातिष्ठ कुर्वित्यर्थः उत्तिष्ठ च युद्धायेदानीं भारत ॥४२॥ ॥इति श्रीगोविंद-
भगवत्पूज्यपादशिष्यपरमहंसपरिव्राजिकाचार्यस्य शंकरभगवतः कृतौ भगवद्गीताभाष्ये कर्मसंन्यासयोगो नाम चतुर्थोध्यायः ॥
४॥ ॥कर्मण्यकर्म यः पश्येदित्यारभ्य स युक्तः कृत्स्नकर्मकृत् ज्ञानाग्निदग्धकर्माणं शारीरं केवलं कर्म कुर्वन् यदृच्छालाभसंतुष्टे
ब्रह्मार्पणं ब्रह्म हविः कर्मजान्विद्धि तान्सर्वान् सर्वं कर्माखिलं पार्थ ज्ञानाग्निः सर्वकर्माणि योगसंन्यस्तकर्माणमित्येतैर्वचनैः सर्वक-
र्मणां संन्यासमवोचद्भगवान् छित्त्वैनं संशयं योगमातिष्ठेत्यनेन वचनेन योगं च कर्मानुष्ठानलक्षणमनुतिष्ठेत्युक्तवान् ॥ उभयोश्च
कर्मानुष्ठानकर्मसंन्यासयोः स्थितिगतिवत्परस्परविरोधादेकेन सह कर्तुमशक्यत्वात् कालभेदेन चानुष्ठानविधानाभावादर्थादेत-
योरन्यतरकर्तव्यताप्राप्तौ सत्यां यत्प्रशस्यतरमेतयोः कर्मानुष्ठानकर्मसंन्यासयोस्तत्कर्तव्यं नेतरदित्येवं मन्यमानः प्रशस्यतरबुभुत्स-
यार्जुन उवाच ॥ ॥संन्यासं कर्मणां कृष्णेत्यादिना ननु चात्मविदो ज्ञानयोगेन निष्ठां प्रतिपादयिष्यन् पूर्वोदाहृतैर्वचनैर्भगवान्कर्मसंन्या-
न ५ समवोचत् ॥ तनात्मज्ञस्यातश्च कर्मानुष्ठानकर्मसंन्यासयोर्भिन्नपुरुषविषयत्वादन्यतरप्रशस्यतरत्वबुभुत्सयायं प्रश्नोऽनुपपन्नः स-

कुरीकृयतेर

त्यमेवं तु तदभिप्रायेण प्रश्नो नुपपद्यते प्रष्टुः स्वाभिप्रायेण पुनः प्रश्नो युज्यत एवेति वदामः। कथं पूर्व्वोदाहृतैर्वचनैर्भगवता कर्म्मसंन्या
सस्य कर्त्तव्यतया विवक्षितत्वात् प्राधान्यमन्तरेण च कर्त्तारं तस्य कर्त्तव्यत्वासंभवादनात्मविदपि कर्त्ता पक्षे प्राप्तो नूद्यत एव न पुनरा
त्मवित्कर्तृकत्वमेव संन्यासस्य विवक्षितमित्येवं मत्वा तस्यार्जुनस्य कर्म्मानुष्ठानकर्म्मसंन्यासयोरविद्वत्पुरुषकर्तृकत्वमप्यस्तीति
पूर्व्वोक्तेन प्रकारेण तयोः परस्परविरोधादन्यतरस्य कर्त्तव्यत्वे प्राप्ते प्रशस्यतरं च कर्त्तव्यं नेतरदिति प्रशस्यतरविविदिषया प्रश्नो ना
नुपपन्नः। प्रतिवचनवाक्यार्थनिरूपणेनापि प्रष्टुरभिप्राय एवमेवेति गम्यते कथं संन्यासकर्म्मयोगौ निःश्रेयसकरौ तयोस्तु कर्म्मयोगो वि
शिष्यत इति प्रतिवचनमेतन्निरूप्यं किमनेनात्मवित्कर्तृकयोः संन्यासकर्म्मयोगयोर्निःश्रेयसकरत्वप्रयोजनमुक्त्वा तयोरेव कुतश्चिद्वि
शेषात्कर्म्मयोगस्य विशिष्टत्वमुच्यते। आहोस्विदनात्मवित्कर्तृकयोः संन्यासकर्म्मयोगयोस्तदुभयमुच्यत इति। अत्रोच्यते॥ आत्मवित्कर्तृ
कयोः संन्यासकर्म्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्ववचनं तदीयाच्च कर्म्मसंन्यासात्। कर्म्मयोगस्य विशिष्टत्वाभिधानमित्येतदुभ
यं चानुपपन्नं। यद्यनात्मविदः कर्म्मसंन्यासस्तत्प्रतिकूलश्च कर्म्मानुष्ठानलक्षणः कर्म्मयोगः संभवेतां तदा तयोर्निःश्रेयसकरत्वोक्तिः कर्म्मयो
गस्य च कर्म्मसंन्यासाद्विशिष्टत्वाभिधानमित्येतदुभयमुपपद्यते आत्मविदस्तु कर्म्मसंन्यासकर्म्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्वाभि
धानं कर्म्मसंन्यासाच्च कर्म्म विशिष्यत इति चानुपपन्नं। अत्राह॥ किमात्मविदः कर्म्मसंन्यासकर्म्मयोगयोर्द्वयोरप्यसंभवः आहोस्विदन्यतरस्य
यदा चान्यतरस्यासंभवस्तदा किं कर्म्मसंन्यासस्योत कर्म्मयोगस्येत्यसंभवकारणं च वक्तव्यमिति। अत्रोच्यते॥ आत्मविदो निवृत्तमिथ्याज्ञानत्वाद्विप
र्ययज्ञानमूलस्य कर्म्मयोगस्यासंभवः स्यात् जन्मादिसर्व्वविक्रियारहितत्वेन निःक्रियमात्मानमात्मत्वेन यो वेत्ति तस्यात्मविदः सम्यग्दर्शनेनापास्त॥

कर्म्मसं
न्यासा
त ?

ना ५

३६
गी॰भा॰

मिथ्याज्ञानस्य निःक्रियात्मस्वरूपावस्थानलक्षणां सर्वकर्मसंन्यासमुक्त्वा तद्विपरीतस्य मिथ्याज्ञानमूलकर्तृत्वाभिमानपुरःसरस्य सक्रिया
त्मावस्थानरूपस्य कर्मयोगस्येह शास्त्रे तत्र तत्रात्मस्वरूपनिरूपणप्रदेशेषु सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधादभावः प्रतिपाद्यते य
स्मात्तस्मादात्मविदो निवृत्तमिथ्याज्ञानस्य विपर्ययज्ञानमूलः कर्मयोगो न संभवतीति युक्तमुक्तं स्यात्केषु केषु पुनरात्मस्वरूपनिरूपणप्रदेशे
ष्वात्मविदः कर्माभावः प्रतिपाद्यत इत्युच्यते। अविनाशि तु तद्विद्धीति प्रकृत्य य एनं वेत्ति हंतारं वेदाविनाशिनं नित्यमित्यादौ तत्र तत्रात्मवि
दः कर्माभाव उच्यते। ननु च कर्मयोगोऽप्यात्मस्वरूपनिरूपणप्रदेशेषु तत्र तत्र प्रतिपाद्यत एव तद्यथा। तस्माद्युध्यस्व भारत स्वधर्ममपि चा
वेक्ष्य कर्मण्येवाधिकारस्ते इत्यादौ अतः कथमात्मविदः कर्मयोगस्यासंभवः स्यादिति। अत्रोच्यते सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यवि
रोधात्। ज्ञानयोगेन सांख्यानामित्यनेन सांख्यानामात्मतत्त्वविदामनात्मवित्कर्तृककर्मयोगनिष्ठातो। निष्क्रियात्मस्वरूपावस्था
नलक्षणाया ज्ञानयोगनिष्ठायाः पृथक्करणात् कृतकृत्यत्वेनात्मविदः प्रयोजनांतराभावात्। तस्य कार्यं न विद्यत इति कर्तव्यांतराभा
ववचनाच्च। न कर्मणामनारंभात् संन्यासस्तु महाबाहो दुःखमाप्तुमयोगत इत्यादिना चात्मज्ञानांगत्वेन कर्मयोगस्याभिवादितत्वात्। यो
गारूढस्य तस्यैव शमः कारणमुच्यते। इत्यनेन चोत्पन्नसम्यग्दर्शनस्य कर्मयोगाभाववचनात्। शारीरं केवलं कर्म कुर्वन्नाप्नोति च
शरीरस्थितिकारणातिरिक्तस्य कर्मणो निवारणात्। नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् इत्यनेन च शरीरस्थिति
मात्रप्रयुक्तेष्वपि दर्शनश्रवणादिकर्मस्वात्मयाथात्म्यविदः करोमीति प्रत्ययस्य समाहितचेतस्तदा कर्तव्यत्वोपदेशादात्मतत्त्वविदः

सथा। १

म्यग्दर्शनविरुद्धो मिथ्याज्ञानहेतुकः कर्मयोगः स्वप्नेऽपि न संभावयितुं शक्यते यस्मात्तस्मादनात्म॰ वित्कर्तृकयोरेव संन्यासक
र्मयोगयोर्निःश्रेयसकरत्ववचनं तदीयाच्च कर्मसंन्यासात्पूर्वोक्तात्मवित्कर्तृकसर्वकर्मसंन्यासविलक्षणात्सत्येव कर्तृत्वविज्ञा
ने कर्मैकदेशविषयात् यमनियमादिसहितत्वेन च दुरनुष्ठेयात्सुकरत्वेन च कर्मयोगस्य विशिष्टत्वाभिधानमित्येवं प्रतिवचनवा
क्यार्थनिरूपणेनापि पूर्वोक्तः प्रष्टुरभिप्रायो निश्चीयत इति स्थितं ज्यायसी चेत्कर्मणस्ते इत्यत्र ज्ञानकर्मणोः सहासंभवे यच्छ्रेय
एतयोस्तन्मे ब्रूहीति एवं पृष्टोऽर्जुनेन भगवान् ज्ञानयोगेन सांख्यानां निष्ठा कर्मयोगेन योगिनां निष्ठा प्रोक्तेति निर्णयं चकार ॥
न च संन्यसनादेव केवलात्सिद्धिं समधिगच्छतीति वचनात् ज्ञानसहितस्य तस्य सिद्धिसाधनत्वमिष्टं । कर्मयोगस्य च विधानात् ॥
ज्ञानरहितस्य संन्यासः श्रेयान् किं वा कर्मयोगः श्रेयानित्येतयोर्विशेषबुभुत्सयार्जुन उवाच ॥ ॥ संन्यासं कर्मणां कृष्ण पुन
र्योगं च शंससि । य॰च्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं ॥१॥ संन्यासं परित्यागं कर्मणां शास्त्रीयाणां प्रनुष्ठानविशेषाणां शं
ससि प्रशंससि कथयसीत्येतत् पुनः पुनर्योगं च तेषामेवानुष्ठानमवश्यकर्तव्यत्वं च शंससि । तयोरेकतरच्छ्रेय इति संशयः किं कर्मानु
ष्ठानं श्रेयः किं तत्त्यागमिति प्रशस्यतरं चानुष्ठेयमतः श्रेयश्च यः प्रशस्यतरमेतयोः कर्मसंन्यासकर्मानुष्ठानयोर्यदनुष्ठानाच्छ्रेयोऽ
वाप्तिर्मम स्यादिति मन्यसे तदेकमन्यतरत्सहैकपुरुषानुष्ठेयत्वासंभवान्मे ब्रूहि सुनिश्चितमभिप्रेतं तवेति ॥१॥ स्वाभिप्रायमाचक्षाणो
निर्णयाय भगवानुवाच ॥ ॥ संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ॥ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥२॥ संन्यासः क

र्मणां परित्यागः कर्मयोगश्च तेषामनुष्ठानं तावुभावपीति निःश्रेयसकरौ मोक्षं कुर्वाते ज्ञानोत्पत्तिहेतुत्वेन तथैव यद्यपि निःश्रेयसकरे
तथापि तयोस्तु निःश्रेयसहेत्वोः कर्मसंन्यासात्केवलात्कर्मयोगो विशिष्यते ॥२॥ कर्मयोगं स्तौति कस्मादित्याह ॥ ज्ञेयः स नित्यसंन्या
सी यो न द्वेष्टि न कांक्षति ॥ निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ॥३॥ ज्ञेयो ज्ञातव्यः स कर्मयोगी नित्यसंन्यासीति यो
न द्वेष्टि किंचित्न कांक्षति सुखदुःखे तत्साधने चैवंविधो यः कर्मणि वर्तमानोपि स नित्यसंन्यासीति ज्ञातव्य इत्यर्थः ॥ निर्द्वं
द्वो द्वंद्ववर्जितो हि यस्मान्महाबाहो सुखं बंधादनायासेन बंधात्प्रमुच्यते ॥३॥ ननु संन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेय
योर्विरुद्धयोः फले विरोधो युक्तो न पुनस्तयोर्निःश्रेयस करत्वमेवेति प्राप्त इदमुच्यते ॥ ॥ सांख्ययोगौ पृथग्बा
लाः प्रवदंति न पंडिताः ॥ एकमप्यास्थितः सम्यगुभयोर्विंदते फलं ॥४॥ सांख्ययोगौ पृथग्विरुद्धौ भिन्नफलौ बालाः प्रवदंति
न पंडिताः पंडितास्तु विवेकिनो जानंति नः एकं फलमविरुद्धमिच्छंति कथमेकमपि सांख्ययोगयोः सम्यगास्थितः सम्यगनु
२ ष्ठितवानित्यर्थः ॥ उभयोर्विंदते फलमुभयोस्तदेव हीति निःश्रेयसफलमतो न फले विरोधः ॥४॥ ननु संन्यासकर्मयोगशब्देन प्रस्तु
त्य सांख्ययोगयोः फलैकत्वं कथमिह प्रस्तुतं ब्रवीति नैष दोषः ॥ यद्यप्यर्जुनेन संन्यासं कर्मयोगं च केवलमभिप्रेत्य प्रश्नः कृ
तो भगवांस्तु तदपरित्यागेनैव स्वाभिप्रेतं सविशेषं संयोज्य शब्दांतरवाच्यतया प्रतिवचनं ददौ सांख्ययोगाविति। तावेव संन्या
सकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ सांख्ययोगशब्दवाच्याविति भगवतो मतं। अतो न प्रकृतप्रक्रियेति। एकस्या
पि सम्यगनुष्ठानात्कथमुभयोः फलं विंदतीत्युच्यते ॥ ॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं सांख्यं च योगं च

यः पश्यति स पश्यति ॥५॥ यस्मात्सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिः प्राप्यते स्थानं मोक्षाख्यं तद्योगैरपि ज्ञानप्राप्त्युपायत्वेनेश्वरे समर्प्य कर्मा
ण्यात्मनः फलमनभिसंधायानुतिष्ठंति ते योगिनस्तैरपि परमार्थज्ञानसंन्यासप्राप्तिद्वारेण गम्यत इत्यभिप्रायः तस्मादेकं सांख्यं च
योगं च यः पश्यति स पश्यति फलैकत्वात्सम्यक् पश्यतीत्यर्थः ॥५॥ एवं तर्हि योगात्संन्यास एव विशिष्यते कथं तर्हीदमुक्तं तयोस्तु
कर्मयोगो विशिष्यत इति शृणु तत्र कारणं त्वया पृष्टं केवलं कर्मसंन्यासं कर्मयोगं चाभिप्रेत्य तयोरन्यतरः कः श्रेयानिति तदनुरूपं
प्रतिवचनं मयोक्तं केवलात्कर्मसंन्यासात्कर्मयोगो विशिष्यत इति ज्ञानं अपेक्ष्य ज्ञानसव्यपेक्षस्तु संन्यासः सांख्यमिति मयाभि
प्रेतः ॥ परमार्थयोगश्च स एव वयस्तु कर्मयोगो वैदिकः स तादर्थ्यात् योगः संन्यास इति चोपचर्यते ॥ कथं तादर्थ्यमित्युच्यते ॥ ॥ सं
न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ॥ योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥६॥ संन्यासस्तु पारमार्थिको दुःखमाप्तुम
योगतो योगेन विना योगयुक्तो वैदिकेन कर्मयोगेन ईश्वरसमर्पितरूपेण फलनिरपेक्षेण युक्तो मननादीश्वरस्वरूपस्य मुनिः ॥ ब्र
ह्म परमात्मज्ञाननिष्ठालक्षणं त्वात्प्रकृतः संन्यासो ब्रह्मोच्यते न्यास इति ब्रह्मा हि पर इति श्रुतेः ॥ ब्रह्म परमार्थसंन्या
सं परमात्मज्ञाननिष्ठालक्षणं नचिरेण क्षिप्रमेवाधिगच्छति प्राप्नोति ॥६॥ अतो मयोक्तं कर्मयोगो विशिष्यत इति यदा पुनरयं सम्य
ग्दर्शनप्राप्त्युपायेन ॥ ॥ योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः ॥ सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥ योगे
न युक्तो योगयुक्तो विशुद्धात्मा विशुद्धसत्त्वः विजितात्मा विजितदेहो जितेंद्रियश्च सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादीनां स्तंबपर्यंतानां भूता
नामात्मभूतात्मा प्रत्यक्चेतनो यस्य सः सर्वभूतात्मभूतात्मा सर्वप्रत्यग्दर्शीत्यर्थः ॥ स तत्रैवं वर्तमानो लोकसंग्रहार्थं कुर्वन्नपि न लिप्य

सम्यग्दर्शीत्यर्थः ॥ ६ ॥

५५

तेयोगयुक्तोनकर्मभिर्निबध्यतइत्यर्थः॥ नचासौपरमार्थतःकरोत्यतः॥ नैवकिंचित्करोमीतियुक्तोमन्येततत्त्ववित्॥ नैवकिंचि
त्करोमीतिसयुक्तःसमाहितःसन्मन्येतचिंतयेत्तत्त्ववित्आत्मनोयाथात्म्यंतत्त्वंवेत्तीतितत्त्ववित्परमार्थदर्शीत्यर्थः॥ कदा
कथंवातत्त्वमवधारयन्मन्येततदुच्यते॥ ॥पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन्॥८॥ प्रलपन्विसृज
न्गृह्णन्नुन्मिषन्निमिषन्नपि॥ इंद्रियाणींद्रियार्थेषुवर्त्तंतइतिधारयन्॥९॥ मन्येतेतिपूर्वेणैवसंबंधः॥ तस्यैवंतत्त्ववि
दःसर्वकार्यकारणचेष्टासुकर्मस्वकर्मैवपश्यतःसम्यग्दर्शिनस्तस्यसर्वकर्मसंन्यासएवाधिकारःकर्मणोऽभावदर्शना
त्नहिमृगतृष्णिकायामुदकबुद्ध्यापानायप्रवृत्तउदकाभावज्ञानेपितत्रैवपानप्रयोजनायप्रवर्त्तते॥ यस्तुपुनरतत्त्ववित्प्रवृ
त्तश्चकर्मयोगे॥ ॥ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वाकरोतियः॥ लिप्यतेनसपापेनपद्मपत्रमिवांभसा॥१०॥ ब्रह्मणीश्वरेआ
२ धायनिक्षिप्यतदर्थंकर्मकरोमीतिभृत्यइवस्वाम्यर्थंसर्वाणिकर्माणिमोक्षेपिफलेसंगंत्यक्त्वाकरोतियःसर्वकर्माणिलिप्य
तेनसपापेनसंबध्यते॥ पद्मपत्रमिवांभसोदकेन॥१०॥ केवलंसत्त्वशुद्धिमात्रमेवफलंतस्यकर्मणःस्यात्वयस्मात्॥ ॥कायेनमनस
साबुद्ध्याकेवलैरिंद्रियैरपि॥ योगिनःकर्मकुर्वंतिसंगंत्यक्त्वात्मशुद्धये॥११॥ कायेनदेहेनमनसाबुद्ध्याकेवलैर्ममत्ववर्जितैरी
श्वरायैवकरोमिनममफलायेतिममताबुद्धिशून्यैरिंद्रियैः केवलशब्दःकायादिभिरपिप्रत्येकंसंबध्यते॥ सर्वव्यापारेषुममतावर्जिता॥
योगिनःकर्मिणःकर्मकुर्वंतिसंगंत्यक्त्वाफलविषयमात्मशुद्धयेसत्त्वशुद्धयइत्यर्थः॥११॥ तस्मात्तत्रैवतवाधिकारःकुरुकर्मैवइतिय

स्यात्॥ ॥युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं॥ अयुक्तः कामकारेण फले सक्तो निबध्यते॥१२॥ युक्त ईश्वराय कर्माणि न मम फ
लायेत्येवं समाहितः सन् कर्मफलं त्यक्त्वा परित्यज्य शांतिं मोक्षाख्यां प्राप्नोति नैष्ठिकीं निष्ठायां भवां सत्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यास
ज्ञाननिष्ठाक्रमेणेति वाक्यशेषः। यस्तु पुनरयुक्तो ऽसमाहितः कामकारेण करणं कारः कामस्य कारः कामकारः तेन कारेण कामप्रेरि
ततयेत्यर्थः मम फलाय एवं करोमि कर्मेत्येवं फले सक्तो निबध्यते अतस्त्वं युक्तो भवेदित्यर्थः॥१२॥ यस्तु परमार्थदर्शी सः॥ ॥सर्वकर्माणि म
नसा संन्यस्यास्ते सुखं वशी॥ नवद्वारे पुरे देही नैव कुर्वन्न कारयन्॥१३॥ सर्वाणि कर्माणि सर्वकर्माणि मनसा संन्यस्य परित्यज्य
नित्यं नैमित्तिकं काम्यं प्रतिषिद्धं च सर्वाणि कर्माणि मनसा विवेकबुद्ध्या कर्मादावकर्मदर्शनेन संत्यजेत्यर्थः आस्ते तिष्ठति सुखं त्यक्त
वाङ्मनःकायचेष्टो यातिनिरायासः प्रसन्नचित्त आत्मनोन्यत्र निवृत्तबाह्यसर्वप्रयोजन इति सुखमास्ते इत्युच्यते वशी जितेंद्रिय इत्य
र्थः क्व कथमास्ते इत्यत आह॥ नवद्वारे सप्त शीर्षण्यान्यात्मन उपलब्धिद्वाराणि अर्वाक् द्वे मूत्रपुरीषविसर्गार्थे तैः द्वारैर्नवद्वारं पुरं
उच्यते शरीरं पुरमिव पुरं आत्मैकस्वामिकं तदर्थप्रयोजनैश्चेंद्रियमनोबुद्धिविषयैरनेकफलविज्ञानस्योत्पादकैः पौरैरिवाधिष्ठितं त
स्मिन्नवद्वारे पुरे देही सर्वकर्मसंन्यासी किं विशेषणं सर्वो हि देही संन्यस्यसन्यासी वा देह एवास्ते तत्रानर्थकं विशेषणमित्युच्यते॥ य
स्त्वज्ञो देही देहेंद्रियसंघातमात्रात्मदर्शनः स सर्वो [illegible] गेहे भूमौ वाऽऽसने वास्ते इति मन्यते नहि देहमात्रात्मदर्शिनो गेह इव देहे
आस्ते इति प्रत्ययः संभवति देहादिसंघातात्मव्यतिरिक्तात्मदर्शिनस्तु देहे आस्ते इति प्रत्यय उपपद्यते परकर्मणां च परस्मिन्नात्मनि

अविद्ययाध्यारोपितानां विद्यया विवेकज्ञानेन मनसा संन्यास उपपद्यते। उत्पन्नविवेकज्ञानस्य सर्वकर्मसंन्यासिनोऽपि देहाद्याव
नवद्वारे पुरे आसनं प्रारब्धकर्मसंस्कारशेषानुवृत्त्या देहाद्यावविशेषविज्ञानोत्पत्तेः देहाद्यावास्तु अत्यन्तव्यवविशेषणफलं विद्वदवि
द्वत्प्रत्ययभेदापेक्षत्वात्। यद्यपि कार्यकारणकर्माणि अविद्ययात्मन्यध्यारोपितानि संन्यस्येति आत्मसमवायि तु कर्तृत्वं कारयि
तृत्वं च स्यादित्याशंक्याह॥ नैव कुर्वन्न च स्वयं न च कार्यकारणानि कारयन् क्रियासु प्रवर्तयन्। किं यत्तत्कर्तृत्वं कारयितृत्वं च देहिनः
स्वात्मसमवायि सत् संन्यासान्न भवति यथा गच्छतो गतिर्गमनव्यापारपरित्यागेन स्यात्तद्वत् किं वा स्वत एवात्मनो नास्तीत्युच्यते। ना
स्यात्मनि स्वतः कर्तृत्वं कारयितृत्वं वा उक्तं ह्यविकार्योऽयमुच्यते शरीरस्थोऽपि न करोति न लिप्यत इति ध्यायतीव लेलायतीव श्रुतेः
॥१३॥ न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः॥ न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥१४॥ न कर्तृत्वं स्वतः कुर्विति नापि कर्माणि रथ
घटप्रासादादीनि ईप्सिततमानि लोकस्य सृजति उत्पादयति प्रभुरात्मा। नापि रथादिकृतवतस्तत्फलेन संयोगं। यदि किंचिदपि स्व
इति उच्यते। तो न करोति न कारयति च देही कस्तर्हि कुर्वन्प्रवर्तते स्वभावस्तु स्वभावो अविद्यालक्षणा प्रकृतिर्माया प्रवर्तते॥१४॥ परमार्थतस्तु॥ ॥
नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः॥१५॥ नादत्ते न गृह्णाति भक्तस्यापि कस्यचित्पापं न चैवा
दत्ते सुकृतं भक्तैः प्रयुक्तं विभुः। किमर्थं तर्हि भक्तैः पूजादिलक्षणं यागदानहोमादि च सुकृतं प्रयुज्यत इत्याशंक्याह॥ अज्ञानेनावृतं ज्ञानं विवे
कज्ञानं तेन मुह्यंति करोमि कारयामि भोक्ष्ये भोजयामीत्येवं मोहं गच्छंत्यविवेकिनः संसारिणो जंतवः॥१५॥ ॥ज्ञानेन तु तदज्ञानं येषां नाशित

मात्मनः॥ तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं॥१६॥ ज्ञानेन तु येन ज्ञानेनावृता मुह्यंति जंतवस्तदज्ञानं येषां जंतूनां विवेकज्ञानेनात्मवि
विषयेण नाशितमात्मनो भवति तेषां आदित्यवत् यथा आदित्यः समस्तं रूपजातं अवभासयति तद्वत् ज्ञानं ज्ञेयं वस्तु सर्वं प्रकाशयति तत्परं प
रमार्थतत्वं॥१६॥ यत्परं ज्ञानं प्रकाशितं॥ ॥तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥१७॥
तस्मिन्गता बुद्धिर्येषां ते तद्बुद्धयः तदात्मानस्तदेव परं ब्रह्मात्मा येषां ते तदात्मानः तन्निष्ठा निष्ठाभिनिवेशः तात्पर्यं सर्वाणि कर्माणि संन्य
स्य ब्रह्मण्येवावस्थानं येषां ते तन्निष्ठा तत्परायणाश्च तदेव परायणं परा गतिर्येषां भवति ते तत्परायणाः केवलात्मारतय इत्यर्थः॥ गच्छंत
त्येवंविधा अपुनरावृत्तिमपुनर्देहसंबंधं ज्ञानेन निर्धूतकल्मषा यथोक्तेन ज्ञानेन निर्धूतो निर्हतो नाशितो कल्मषः पापादिसंसारकारण
दोषस्ते ज्ञाननिर्धूतकल्मषाः यतयः इत्यर्थः॥१७॥ ॥येषां ज्ञानेन नाशितमात्मनो ज्ञानं ते पंडिताः कथं तत्वं पश्यंतीत्युच्यते॥ ॥विद्यावि
नयसंपन्ने ब्राह्मणे गवि हस्तिनि॥ शुनि चैव श्वपाके च पंडिताः समदर्शिनः॥१८॥ विद्याविनयसंपन्ने विद्या आत्मनो बोधो विनय उपशमो वि
द्या च विनयश्च ताभ्यां विद्याविनयाभ्यां संपन्नो विद्वान्विनीतश्च यो ब्राह्मणस्तस्मिन् ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शि
नो विद्याविनयसंपन्ने उत्तमसंस्कारवति ब्राह्मणे सात्विके मध्यमायां राजस्यां गवि संस्कारहीनायामत्यंतमेव केवलतामसे हस्त्यादौ सत्वादि
गुणैः तज्जैश्च संस्कारैरत्यंतमेवास्पृष्टं सममेकमविक्रियं ब्रह्म तद्द्रष्टुं शीलं येषां ते पंडिताः समदर्शिनः॥१८॥ ननु ते भोज्यान्ना दोषवंतः का
र्यसमासमाभ्यां विषमसमे पूजातः इति स्मृतेः॥ न दोषवंतः॥ कथं॥ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः॥ निर्दोषं हि समं ब्रह्म तस्मा

मात्मनः॥ तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं॥१६॥ ज्ञानेन तु येन ज्ञानेनावृता मुह्यंति जंतवस्तदज्ञानं येषां जंतूनां विवेकज्ञानेन
नोत्मविषयेण नाशितमात्मनो ऽभवति तेषां आदित्यवत् यथा आदित्यः समस्तं रूपजातं अवभासयति तद्वत् ज्ञानं ज्ञेयं वस्तु सर्वं प्रकाशय
ति तत्परं परमार्थतत्वं॥१६॥ यत्परं ज्ञानं प्रकाशितं॥ ॥तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतक
ल्मषाः॥१७॥ तस्मिन्नात्मबुद्धिर्येषां ते तद्बुद्धयः तदात्मानस्तदेव परब्रह्मात्मा येषां ते तदात्मानः तन्निष्ठा निष्ठा अभिनिवेशः तात्पर्यं सर्वाणि
कर्माणि संन्यस्य ब्रह्मण्येवावस्थानं येषां ते तन्निष्ठाः तत्परायणाः आत्मा तदेव परायणं परा गतिर्येषां भवति ते तत्परायणाः केवलात्मार
तपरत्यर्थः॥ गच्छंत्येवंविधा अपुनरावृत्तिमपुनर्देहसंबंधं ज्ञानेन निर्धूतकल्मषा यथोक्तेन ज्ञानेन निर्धूतो निर्हतो नाशितो कल्मषः पा
पादिसंसारकारणदोषस्ते ज्ञाननिर्धूतकल्मषाः यतयः इत्यर्थः॥१७॥ येषां ज्ञानेन नाशितमात्मनो ऽज्ञानं ते पंडिताः कथं तत्वं पश्यंतीत्यु
च्यते॥ ॥विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि॥ शुनि चैव श्वपाके च पंडिताः समदर्शिनः॥१८॥ विद्याविनयसंपन्ने विद्या आत्मनो बो
धो विनय उपशमो विद्या च विनयश्च ताभ्यां विद्याविनयाभ्यां संपन्नो विद्याविनीत अपो ब्राह्मणस्तस्मिन् ब्राह्मणे गवि हस्तिनि शुनि चैव
श्वपाके च पंडिताः समदर्शिनो विद्याविनयसंपन्ने उत्तमसंस्कारवति ब्राह्मणे सात्विके मध्यमायां राजस्यां गवि संस्काररहितायामत्यंतमे
व केवलतामसे हस्त्यादौ सत्वादिगुणैस्तज्जैश्च संस्कारैरत्यंतमेवास्पृष्टं सममेकमवि क्रियं ब्रह्म तद्द्रष्टुं शीलं येषां ते पंडिताः समद
र्शिनः॥१८॥ ननु ते अभोज्यान्नास्ते दोषवंतः कथं समासमाभ्यां विषमसमे पूजातः इति स्मृतेः न दोषवंतः॥ कथं॥ ॥इहैव तैर्जितः सर्गो॥

येषां साम्ये स्थितं मनः ॥ निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥ इहैव जीवद्भिरेव समदर्शिभिः पंडितैर्जितो वशीकृतः
सर्गो येषां साम्ये स्थितं मनः सर्वभूतेषु ब्रह्मणः समभावे स्थितं निश्चलीभूतं मनोऽन्तःकरणं निर्दोषं यद्यपि दोषवत्सु श्वपाकादि
षु मूढैस्तद्दोषैर्दोषवदिव विभाव्यते तथापि तद्दोषैरस्पृष्टमिति निर्दोषं दोषवर्जितं हि यस्मान्नापि स्वगुणभेदभिन्नं निर्गुणत्वाच्चैतन्
न्यस्य वक्ष्यति शरीरतेषां च भगवानिच्छादीनां क्षेत्रधर्मत्वमनादित्वान्निर्गुणत्वादिति च नाप्यंत्या विशेषा आत्मनो भेदकाः सन्ति प्रतिश
आत्मनि अवि शेषा गुणाः ५ रीरं तेषां सत्त्वे प्रमाणानुपपत्तेः अतः समं ब्रह्म एकं च तस्माद्ब्रह्मण्येव ते स्थिताः तस्मान्न दोषगंधमात्रमपि तान्स्पृशति देहादिसंघा
तात्मदर्शनाभिमानाभावात् देहादिसंघातात्मदर्शनाभिमानवद्विषयं तु तत्सूत्रं ॥ समासमाभ्यां विषमसमे पूजातः इति ॥ पूजाविषयत्वे
न विशेषणात् दृश्यते हि ब्रह्मवित्षडंगविच्चतुर्वेदविदिति पूजादानादौ गुणविशेषसंबंधः कारणं ब्रह्म तु सर्वगुणदोषवर्जितमि
त्यतो ब्रह्मणि ते स्थिता इति युक्तं कर्मविषयं च समासमाभ्यामित्यादि इदं तु सर्वकर्मसंन्यासविषयं प्रस्तुतं सर्वकर्माणि मनसेत्यार
भ्याध्यायपरिसमाप्तेः ॥१९॥ यस्मात्समं निर्दोषं ब्रह्म आत्मा तस्मात् ॥ ॥न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियं ॥ स्थिरबु
द्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥२०॥ न प्रहृष्येत्प्रहर्षं न कुर्यात्प्रियमिष्टं प्राप्य नोद्विजेत्प्राप्य चाप्रियं अनिष्टं लब्ध्वा देहा
त्मदर्शिनां हि प्रियाप्रियप्राप्ती हर्षविषादौ स्यातां न तु केवलात्मदर्शिनस्तस्य प्रियाप्रियप्राप्त्यसंभवात् किंच सर्वभूतेष्वेकः समो निर्दोष
आत्मेति स्थिरा निर्विचिकित्सा बुद्धिर्यस्य स स्थिरबुद्धिः असंमोहवर्जितश्च स्यात् यथोक्तब्रह्मवित् ब्रह्मणि स्थितोऽकर्मकृत्सर्वक

मे संन्यासीत्यर्थः॥२०॥ किंच ब्रह्मणि स्थितः॥ ॥बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं॥ स ब्रह्मयोगयुक्तात्मा सुखम
क्षयमश्नुते॥२१॥ बाह्याश्च ते स्पर्शाश्च बाह्यस्पर्शाः स्पृश्यंत इति स्पर्शाः शब्दादयो विषयास्तेषु बाह्यस्पर्शेष्वसक्तोऽनासक्तोंऽतः
करणं यस्य सोऽयमसक्तात्मा विषयेषु प्रीतिवर्जितः स विंदते लभते आत्मनि यत्सुखं तद्विंदतीत्येतत् स ब्रह्मयोगयुक्तात्मा ब्रह्म
णि योगः समाधिः ब्रह्मयोगस्तेन ब्रह्मयोगेन युक्तः समाहितस्तस्मिन्व्यापृत आत्मांतःकरणं यस्य स ब्रह्मयोगयुक्तात्मा सु
खमक्षयमश्नुते व्याप्नोति तस्माद्बाह्यविषयप्रीतेः क्षणिकायाः इंद्रियाणि निवर्त्तयेदात्मन्यक्षयसुखार्थी इत्यर्थः॥२१॥ ॥
इतश्चानिवर्त्तयेत्॥ ॥ये हि संस्पर्शजा भोगा दुःखयोनय एव ते॥ आद्यंतवंतः कौंतेय न तेषु रमते बुधः॥२२॥ ये हि य
स्मात् संस्पर्शजा विषयेंद्रियसंस्पर्शेभ्यो जाता भोगा भुक्तयो दुःखयोनय एव ते अविद्याकृतत्वात् दृश्यंते ह्याध्यात्मिकादीनि
दुःखानि तन्निमित्तान्येव यथेहलोके तथा परलोकेपीति गम्यते एवशब्दात् न संसारे सुखस्य गंधमात्रमप्यस्तीति बुद्ध्वा विष
यमृगतृष्णिकाया इंद्रियाणि निवर्त्तयेत् न केवलं दुःखयोनयः आद्यंतवंतश्च आद्यो विषयेंद्रियसंयोगो भोगानामंतश्च तद्वियो
ग एव ते आद्यंतवंतोऽनित्या मध्यक्षणभाविन इत्यर्थः कौंतेय न तेषु भोगेषु रमते बुधो विवेकी अवगतपरमार्थतत्वः॥२२॥
अत्यंतमूढानामेव हि विषयेषु रतिर्दृश्यते यथा पशुप्रभृतीनाम पंचश्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतु
र्दुर्निवार्यश्चेति तत्परिहारे यत्नाधिक्यं कर्त्तव्यमित्याह भगवान्॥ ॥शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात्॥

कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥ शक्नोत्युत्सहते इहैव जीवन्नेव यतः सोढुं प्रसहितुं प्राक् पूर्वं शरीरविमोक्ष
णात् आमरणात् मरणसीमाकरणं जीवतोवश्यंभावी हि कामक्रोधोद्भवो वेगः अनन्तनिमित्तवान् हि सः इति यावन्मरणं तावत्
न विस्रंभणीय इत्यर्थः तदर्थं कामः इंद्रियगोचरप्राप्ते इष्टे विषये श्रूयमाणे स्मर्यमाणे वानुभूते सुखहेतौ या गर्द्धिः तृष्णा स का
मः क्रोधश्चात्मनः प्रतिकूलेषु दुःखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वा यो द्वेषः स क्रोधः तौ कामक्रोधौ उद्भवो य
स्य वेगस्य स कामक्रोधोद्भवो वेगः रोमांचनहृष्टनेत्रवदनादिलिंगोंतःकरणप्रक्षोभरूपः कामोद्भवो वेगः ।गात्रप्रकंपप्रस्वेदसं
दष्टोष्ठपुटरक्तनेत्रादिलिंगः क्रोधोद्भवो वेगः तं कामक्रोधोद्भवं वेगं यः प्रसहते सोढुं स युक्तो योगी सुखी चेह लोके नरः ॥
२३॥ कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्याह ॥ ॥ योंतःसुखोंतरारामस्तथांतर्ज्योतिरेव [illegible] यः ॥ स योगी ब्रह्मनि
र्वाणं ब्रह्मभूतोधिगच्छति ॥२४॥ योंतः सुखमंतरात्मनि सुखं यस्य स अंतःसुखः तथांतरेवात्मन्यारामः आरमणं आक्री
डो यस्य सोंतरारामः तथांतरात्मन्येव ज्योतिः प्रकाशो यस्य सोंतर्ज्योतिरेव यः ईदृशः स योगी ब्रह्मनिर्वाणं ब्रह्मनिर्वृतिं मिह जीवन्नेव
ब्रह्मभूतः सन्नधिगच्छति [illegible] प्राप्नोति ॥२४॥ किंच ॥ लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ॥ छिन्नद्वैधा यतात्मा
नः सर्वभूतहितेरताः ॥२५॥ लभंते ब्रह्मनिर्वाणं मोक्षमृषयः सम्यग्दर्शिनः संन्यासिनः क्षीणकल्मषाः क्षीणपापादिदोषाः
छिन्नद्वैधाः छिन्नसंशयाः यतात्मानः संयतेंद्रियाः सर्वभूतहितेरताः सर्वेषां भूतानामनुकूल्ये निरता अहिंसका ॥२५॥

किंच ॥ कामक्रोधवियुक्तानां यतीनां यतचेतसां ॥ अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनां ॥२६॥ कामश्च क्रोधश्च कामक्रोधौ ता-
भ्यां युक्तानां यतीनां संन्यासिनां चेतसां संयतांतःकरणानां अभितउभयतो जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्त्तते ॥ वि-
दितात्मनां विदितो ज्ञात आत्मा येषां ते विदितात्मानस्तेषां सम्यग्दर्शिनामित्यर्थः ॥ सम्यग्दर्शननिष्ठानां संन्यासिनां सद्यो मुक्तिरुक्त-
तो कर्मयोगश्चेश्वरार्पितसर्वभावेनेश्वरे ब्रह्मण्याधायक्रियमाणः सत्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासक्रमेण मोक्षायेति भ-
गवान्पदे पदे ब्रवीत् वक्ष्यति च ॥ अथेदानीं ध्यानयोगं सम्यग्दर्शनस्यांतरंगं विस्तरेण वक्ष्यामीति तस्य सूत्रस्थानीयान् श्लोका-
नुपादिशति स्म ॥ ॥ स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः ॥ प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥२७॥
स्पर्शान्शब्दादीन्कृत्वा बहिर्बाह्यान् श्रोत्रादिद्वारेणांतर्बुद्धौ प्रवेशिताः शब्दादयो विषयास्तान् ॥ अचिंतयतस्ते बाह्या बहिरे-
व कृता भवंति तानेव बहिः कृत्वा चक्षुश्चैवांतरे भ्रुवोः कृत्वेत्यनुषज्यते ॥ तथा प्राणापानौ नासाभ्यंतरचारिणौ समौ कृत्वा ॥२७॥ ॥
यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥ यतेंद्रियमनोबुद्धिः संयतानींद्रियाणि
मनो बुद्धिश्च यस्य सः स यतेंद्रियमनोबुद्धिर्मननान्मुनिः संन्यासी मोक्षपरायणः एवं देहसंस्थानो मोक्षपरायणो मोक्ष एव परं प
मयनं परा गतिर्यस्य सोयं मोक्षपरायणो मुनिर्भवेत् विगतेच्छाभयक्रोधः इच्छा च भयं च क्रोधश्च इच्छाभयक्रोधास्ते विगता यस्मात्स
४१ विगतेच्छाभयक्रोधः य एवं वर्त्तते सदा संन्यासी मुक्त एव सः ॥ न तस्य मोक्षायान्यत्कर्त्तव्यमस्ति ॥२८॥ एवं समाहितचित्तेन किं ज्ञेयमिति

चोच्यते॥ ॥भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं॥ सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति॥२९॥ भोक्तारं यज्ञानां तपसां च क
र्तृरूपेण देवतारूपेण च सर्वलोकमहेश्वरं सर्वलोकानां महांतमीश्वरं सर्वलोकमहेश्वरं सुहृदं सर्वभूतानां सर्वप्राणिनां प्रत्यु
पकारनिरपेक्षतयोपकारिणं सर्वभूतानां हृदयेशयं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं मां ज्ञात्वा शांतिं सर्वसंसारोप
तिमृच्छति प्राप्नोति॥२९॥ ॥इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य श्रीशं॰ शंकरभगवतः कृतौ
भगवद्गीताभाष्ये प्रकृतियोगो नाम पंचमोऽध्यायः॥५॥ ॥श्रीभगवानुवाच॥ अतीतानंतराध्याये ध्यानयोगस्य सम्यग्द
र्शनं प्रत्यंतरंगस्य सूत्रभूताः श्लोकाः स्पर्शान्कृत्वा बहिर्बाह्यानित्यादय उपदिष्टाः तेषां वृत्तिस्थानीयोऽयं षष्ठोध्याय आरभ्यते॥ त
त्र ध्यानयोगस्य बहिरंगं कर्मेति यावद्ध्यानयोगारोहणसमर्थस्तावद्गृहस्थेनाधिकृतेन कर्त्तव्यमेव कर्मेत्यतस्तत्स्तौति
ननु किमर्थं ध्यानयोगारोहण [illegible] सीमाकरणं यावतानुष्ठेयमेव विहितं कर्म यावज्जीवं न आरुरुक्षोर्मुनेर्योगं
कर्म कारणमुच्यते इति विशेषणादारूढस्य च शमेनैव संबंधकरणादारुरुक्षोरारूढस्य च शमः कर्म चोभयं कर्त्तव्यत्वेनाभि
प्रेतं चेत्स्यात्तदारुरुक्षोरारूढस्येति शमकर्मविषयभेदेन विशेषणं विभागकरणं चानर्थकं स्यात् तत्राश्रमिणां कश्चिद्योगमारु
रुक्षुर्भवत्यारूढश्च कश्चितान्ये नारुरुक्षवो न चारूढास्तानपेक्ष्यारुरुक्षोरारूढस्य चेति विशेषणं विभागकरणं चोपपद्यत एवेति
चेत् न तस्यैवेति वचनात् पुनर्योगग्रहणाच्च योगारूढस्येति य आसीत्पूर्वं योगमारुरुक्षुस्तस्यैवारूढस्य शम एव कर्त्तव्यः कार

णां योगफलं प्रत्युच्यत इति अतो न यावज्जीवं कर्तव्यत्वप्राप्तिः कस्यचिदपि कर्मिणः योगविभ्रष्टवचनाद्गृहस्थस्य चेत्कर्मि
णो योगो विहितः षष्ठेध्याये स योगविभ्रष्टो कर्मिणः [illegible] गतिं कर्मफलं प्राप्नोतीति तस्य नाशाशंकानुपपन्ना स्यात् अ
वश्यं हि कृतं कर्म काम्यं नित्यं वा मोक्षस्य नित्यत्वादनारभ्यत्वेपि स्वकं फलमारभत एव नित्यस्य च कर्मणो वेदप्रमाणावबुद्धत्वात्फलेन
भवितव्यमित्यवोचाम अन्यथा वेदस्यानर्थक्यप्रसंगादिति न च कर्मणि सत्युभयविभ्रष्टवचनमर्थवत् कर्मणो विभ्रंशकारणानुपपत्तेः
कर्म कृतमीश्वरे संन्यस्यत्य[illegible]तः कर्तारि कर्मफलं नारभत इति चेत् न ईश्वरे संन्यासस्याधिकतरफलहेतुत्वोपपत्तेः मोक्षायैवेति चेत्
स्वकर्मणां कृतानामीश्वरे न्यासो मोक्षायैव न फलांतराय योगसहितः योगाच्च विभ्रष्ट इति अतस्तं प्रति नाशाशंकानुपपन्नैवेति चेत् न
एकाकी यतचित्तात्मा निराशीरपरिग्रहो ब्रह्मचारिव्रते स्थित इति कर्मसंन्यासविधानात् [illegible] न चात्र ध्यानकाले स्त्रीसहायत्वा
शंका येनैकाकित्वं विधीयते न च गृहस्थस्य निराशीरपरिग्रहत्वादिवचनमनुकूलमित्युभयभ्रष्टप्रश्नानुपपत्तेः अनाश्रित
इत्यनेन कर्मिण एव संन्यासित्वं योगित्वं चोक्तं प्रतिषिद्धं च निरग्नेरक्रियस्य संन्यासित्वं योगित्वं चेति चेत् न ध्यानयोगं प्रति बहिरंगस्य सतः क
र्मणः फलाकांक्षासंन्यासस्तुतिपरत्वात् न केवलं निरग्निरक्रिय एव संन्यासी योगी च किं तर्हि कर्म्यपि च कर्मफलासंगं संन्यस्य कर्मि
योगमनुतिष्ठन्सत्त्वशुद्ध्यर्थं स संन्यासी स योगी च भगवतातिस्तूयते न चैकेन वाक्येन कर्म[णः] फलासंगसंन्यासस्तुतिश्चतुर्थाश्रमप्रति
षेधश्चोपपद्यते न च प्रसिद्धं निरग्नेरक्रियस्य च परमार्थसंन्यासिनः श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रविहितं संन्यासित्वं योगित्वं च प्र

तिषेधात् भगवतस्त्ववचनविरोधाच्च सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते मौनी संतुष्टो येन केनचित् अनिकेत
स्थिरमतिर्विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः । सर्वारम्भपरित्यागीति च भगवतास्ववचनानि तत्र तत्र प्रदर्शितानि तैर्विरु
ध्येते चतुर्थाश्रमप्रतिषेधस्तस्मादर्जुनयोगमारुरुक्षोः प्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादिकर्मफलानिरपेक्षमनुष्ठीयमानं कर्मयोगा
योगारोहणसाधनत्वं सत्त्वशुद्धिद्वारेण प्रतिपद्यत इति संन्यासी च योगी च स्तूयते ॥ ॥अनाश्रितः कर्मफलं कार्यं कर्म करोति ध्यान १
यः ॥ स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ ॥ अनाश्रितः । न आश्रितः अनाश्रितः किं कर्मफलं कर्मणां फलं कर्म
फलं यत्तदनाश्रितः कर्मतृष्णारहित इत्यर्थः यो हि कर्मफले तृष्णावान्स कर्मफलमाश्रितो भवति अयं तु तद्विपरीतोऽतोऽना
श्रितः कर्मफलं एवंभूतः सन् कार्यं कर्तव्यं नित्यं काम्यविपरीतमग्निहोत्रादिकं करोति निर्वर्तयति यः कश्चिदीदृशः कर्मी
स कर्मान्तरेभ्यो विशिष्यतरस्त्वेवमर्थमाह । स संन्यासी च योगी चेति संन्यासः परित्यागः स यस्यास्ति स संन्यासी च योगी च योगो
गश्चित्तसमाधानं स यस्यास्ति स योगी चेति ० एवंगुणसंपन्नोऽयं मंतव्यः । न केवलं निरग्निरक्रिय एव संन्यासी योगी चेति मंत
व्यः । निर्गताग्नयः कर्माङ्गभूता यस्मात्स निरग्निः अक्रियश्चानग्निसाधनाप्यविद्यमानाः क्रियास्तपोदानादिका यस्यासावक्रि
यः ॥ ननु निरग्नेरक्रियस्यैव श्रुतिस्मृतियोगशास्त्रेषु संन्यासित्वं योगित्वं च प्रसिद्धं कथमिह साग्नेः सक्रियस्य
संन्यासित्वं योगित्वं चाप्रसिद्धमुच्यत इति ० नैष दोषः कयाचिद्गुणवृत्त्योभयस्य संपादयिषितत्वात् तत्कथं कर्मफलसंकल्पस

न्यासात्संन्यासित्वं योगांगत्वेन च कर्मानुष्ठानात्कर्मफलसंकल्पस्य चित्तविक्षेपहे तोः परित्यागात्योगित्वं चेति गौण
मुभयं न पुनर्मुख्यं संन्यासित्वं योगित्वं चाभिप्रेतमित्येतमर्थं दर्शयितुमाह ॥ ॥यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव ॥ न ह्य
संन्यस्तसंकल्पो योगी भवति कश्चन ॥२॥ यं सर्वकर्मतत्फलपरित्यागलक्षणं परमार्थसंन्यासमिति प्राहुः श्रुतिस्मृतिविदः ॥
योगं कर्मानुष्ठानलक्षणं तं परमार्थसंन्यासं विद्धि जानीहि हे पांडव कर्मयोगस्य प्रवृत्तिलक्षणस्य तद्विपरीतनिवृत्तिलक्षणेन पर
मार्थसंन्यासेन कीदृशं साम्यमंगीकृत्य तद्भाव उच्यते इत्यपेक्षायामिदमुच्यते । अस्ति हि परमार्थसंन्यासेन सादृश्यं संकर्त्तृद्वारकं क
र्मयोगस्य यो हि परमार्थसंन्यासी स त्यक्तसर्वसाधनतया सर्वकर्मतत्फलविषयं संकल्पं प्रवृत्तिहेतुकामकारणं संन्यस्यति । अयम
पि कर्मयोगी कर्म कुर्वाण एव फलविषयं संकल्पं संन्यस्यतीत्येतमर्थं दर्शयिष्यन्नाह । न हि यस्माद संन्यस्तः असंकल्पः असंन्यस्तो
परित्यक्तः फलविषयः संकल्पोऽभिसंधिर्येन सोऽसंन्यस्तसंकल्पः कश्चन कश्चिदपि कर्मयोगी समाधानवान्भवति संन्यस्तसंकल्प
एव भवतीत्यर्थः । फलसंकल्पस्य चित्तविक्षेपहेतुत्वात् । तस्माद्यः कश्चन कर्मी संन्यस्तफलसंकल्पो भवेत्स योगी
समाधानवानविक्षिप्तचित्तो भवेत् चित्तविक्षेपहेतोः फलकल्पस्य संन्यस्तत्वादित्यभिप्रायः ॥२॥ योगांगत्वेन कर्मानुष्ठानात्कर्मसंकल्प ध्यात
स्य स्य च चित्तविक्षेपहेतोः परित्यागाद्योगित्वं चेति सं न्यासित्वं चेत्यभिप्रेतमुच्यते । एवं परमार्थसंन्यासकर्मयोगयोः कर्मतो रं कर्तृद्वारं
मेके संन्यासमसाम्यमपेक्ष्य यं संन्यासमिति प्राहुर्योगं त विद्धि पांडवेति कर्मयोगस्य स्तुत्यर्थं संन्यासत्वमुक्तं ध्यानयोगस्य फलं निर
पेक्षाकर्मफलत्यागकरणं कर्मिरूपपर्यवसायीतं तथाकर्मत्यागोपि संन्यासिरूपकर्तृधी
तः ॥२

ध्यानयोगस्य साधनं कर्मयोग इत्याह।

येदाः कर्मयोगो बहिरंगं साधनमिति संन्यासले नस्तुत्वाधुना ध्यानयोगसाधनं तं दर्शयति॥ ॥आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्य
ते॥ योगारूढस्य तस्यैव शमः कारणमुच्यते॥३॥ आरुरुक्षोः आरोढुमिच्छतः अनारूढस्य ध्यानयोगेऽवस्थातुमसमर्थस्येत्यर्थः॥
कस्यारुरुक्षोर्मुनेः कर्मफलसंन्यासिन इत्यर्थः। कर्मारुरुक्षोर्योगं कर्म कारणं साधनमुच्यत इत्यर्थः। योगारूढस्य पुनस्तस्यैव शमः
सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढत्वस्य साधनमुच्यत इत्यर्थः। यावद्यावत्कर्मभ्य उपरमते तावत्तावन्निरायासस्य जितेंद्रियस्य चि
त्तं समाधीयते। तथा सति कु[illegible]ट इति स योगारूढो भवति तथा चोक्तं व्यासेन। नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता चा शी
अहिंसा तं
लं स्थितिर्दंडविधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः॥३॥ अथेदानीं कदा योगारूढो भवतीत्युच्यते॥ ॥यदा हि नेंद्रियार्थेषु न कर्मस्वनुष
२
ज्जते॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते॥४॥ यदा समाधीयमानचित्तो योगी इंद्रियार्थेषु इंद्रियाणामर्थाः शब्दादयः। तेषु इं
द्रियार्थेषु कर्मसु च नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या नानुषज्जते। अनुषंगं कर्तव्यताबुद्धिं न करोतीत्यर्थः। स
र्वसंकल्पसंन्यासी सर्वान्संकल्पानिह अमुत्रार्थकामहेतून्संन्यसितुं शीलमस्येति सर्वसंकल्पसंन्यासी योगारूढः प्राप्तयोग इ
त्येतत्तदा तस्मिन्काल उच्यते सर्वसंकल्पसंन्यासीति वचनात्। सर्वांश्च कामान्सर्वाणि च कर्माणि संन्यसे[illegible]दित्यर्थः। संकल्पमूला हि
सर्वे कामाः। संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः। काम जानामि ते मूलं संकल्पात्किल जायते॥ न त्वां संकल्पयिष्यामि समूलो न
भविष्यसि इत्यादिस्मृतेः। सर्व[illegible]कामपरित्यागे च सर्वकर्मसंन्यासः सिद्धो भवति॥ स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्क
र्म कुरुते इत्यादिश्रुतिभ्यो यद्यद्धि कुरुते जंतुस्तत्तत्कामस्य चेष्टितमित्यादिस्मृतिभ्यश्च न्याया[illegible]न हि सर्वसंकल्पसंन्यासे कश्चित्स्पंद्य

दितुमपि शक्तास्तस्मात्सर्वसंकल्पसंन्यासीति वचनात्सर्वान्कामान्सर्वाणि च कर्माणि त्याजयति भगवान् ॥४॥ यदैवं योगी रूढस्तदा तेन
आत्मनात्मनोऽधःपतनं भवति संसारानर्थसमूहादतः ॥ ॥उद्धरेत् संसारसागरनिमग्नं नात्मानं नात्मानमवसादयेत् ॥ आत्मैव ह्यात्मनो
बंधुरात्मैव रिपुरात्मनः ॥५॥ उद्धरेत् संसारसागरे निमग्नमात्मनात्मानं ततऊर्द्ध्वं हरेत् । उद्धरेत् योगारूढतामापादयेदित्यर्थः । नात्मान
मवसादयेत् । नाधो नयेत् आत्मैव हि यस्मादात्मनो बंधुर्न ह्यन्यः कश्चिद्बंधुर्यः संसारमुक्तये भवति । बंधुरपि तावन्मोक्षं प्रति प्रति
कूल एव । स्नेहादिबंधनायतनत्वात्तस्माद्युक्तमवधारणमात्मैवेति । योऽन्योऽपकारी बाह्यः शत्रुः सोऽपि आत्मप्रयुक्त एवेति युक्तमवधा
रणमात्मैव रिपुरात्मन इति ॥५॥ आत्मैव बंधुरात्मैव रिपुरात्मन इत्युक्तं तत्र किंलक्षण आत्मनो बंधुः किंलक्षणो वा आत्मनो रिपु
रित्युच्यते ॥ ॥ बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ॥ अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥६॥ बंधुरात्मात्मनस्तस्य आ
त्मनः स आत्मा बंधुः येनात्मनात्मैव जितः आत्मा कार्यकारणसंघातो येन वशीकृतो जितेंद्रिय इत्यर्थः । अनात्मनः अजितात्मनस्तु श
त्रुत्वे शत्रुभावे वर्तेत आत्मैव यथानात्मा शत्रुरात्मनोऽपकारी तथात्मात्मनोऽपकारे वर्तेत इत्यर्थः ॥६॥ जितात्मनः प्रशांतस्य परमा
त्मा समाहितः ॥ शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥७॥ जितात्मनः कार्यकारणसंघात आत्मा जितो येन स जितात्मा तस्य
जितात्मनः । प्रशांतस्य उपशांतस्य परमात्मा समाहितः साक्षादात्मभावेन वर्तत इत्यर्थः ॥ किं च ॥ शीतोष्णसुखदुःखेषु तथा मा
नापमानयोः पूजापरिभवयोः समः स्यात् ॥ ॥ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः ॥ युक्त इत्युच्यते योगी समलोष्टाश्म

काँचनः॥८॥ज्ञानविज्ञानतृप्तात्मा ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानं विज्ञानं शास्त्रतस्तो ज्ञातानां तथैव स्वानुभवकरणं ताभ्यां ज्ञानविज्ञा
नाभ्यां तृप्तः संजातालंप्रत्ययः आत्मा अंतःकरणं यस्य स ज्ञानविज्ञानतृप्तात्मा कूटस्थो अप्रकंपो भवतीत्यर्थः। विजितेंद्रियश्च यईदृशो
युक्तः समाहित इति स उच्यते कथ्यते स योगी समलोष्टाश्मकांचनः। लोष्टाश्मकांचनानि समानि यस्य स समलोष्टाश्मकांचनः॥८॥
किं च॥ सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु॥ साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते॥९॥ सुहृदिति प्रत्युपकारानिरपेक्षो उप
कर्ता मित्रं स्नेहवत् अरिः शत्रुः उदासीनो न कस्यचित्पक्षं भजते मध्यस्थो यो विरुद्धयोरुभयोर्हितैषी द्वेष्य आत्मनोऽप्रियः बंधुः
संबंधी तेषु साधुषु शास्त्रानुवर्तिषु अपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृतबुद्धिरित्यर्थः॥
विशिष्यते विमुच्यते इति पाठांतरं। योगारूढानां सर्वेषामयमुत्तम इत्यर्थः॥९॥ अतएव उत्तमफलप्राप्तये॥ ॥योगी युंजीत सततमा
त्मानं रहसि स्थितः॥ एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥१०॥ योगी ध्यायी युंजीत समादध्यात् सततं सर्वदा आत्मानं अं
तःकरणं रहस्येकांते गिरिगुहादौ स्थितः सन् एकाकी च असहायो रहसि स्थितः॥ एकाकी चेति विशेषणात् संन्यासं कृत्वेत्यर्थः॥ यतचित्ता
त्मा चित्तमंतःकरणं आत्मा देहश्च संयतौ यस्य स यतचित्तात्मा निराशीर्विगततृष्णोऽपरिग्रहश्च परिग्रहरहितः संन्यासित्वेपि त्यक्तस
र्वपरिग्रहः सन् युंजीतेत्यर्थः॥१०॥ अथेदानीं योगं युंजतः आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः प्राप्तयोगलक्षणं
तत्फलादि चेत्यत आरभ्यते। तत्रासनमेव तावत्प्रथममुच्यते॥ ॥शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः॥ नात्युच्छ्रितं नातिनी

चं चैलाजिनकुशोत्तरम्॥११॥ शुचौ विशुद्धे स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरमचलमात्मन आसनं नात्युच्छ्रितं
नात्युच्छ्रितं नातिनीचं तच्च चैलाजिनकुशोत्तरं चैलमजिनं कुशाश्च कुशाश्च उत्तरे यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरं पाठ
क्रमात्॥ विपरीतस्त्वत्रार्थक्रमश्चैलादीनां तच्चैलाजिनकुशोत्तरं॥११॥ किंच॥ तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः॥ उपवि
श्यासने युंज्याद्योगमात्मविशुद्धये॥१२॥ तत्र तस्मिन्नासने उपविश्य योगं युंज्यात्। कथं सर्वविषयेभ्य उपसंहृत्यैकाग्रं मनः कृत्वा
यतचित्तेंद्रियक्रियः चित्तं च इंद्रियाणि च चित्तेंद्रियाणि तेषां क्रियाः संयता यस्य स यतचित्तेंद्रियक्रियः॥ स किमर्थं योगं युंज्यादित्याह॥
आत्मविशुद्धये अंतःकरणस्य शुद्ध्यर्थमित्येतत् बाह्यमासनमुक्तम्॥१२॥ अधुना शरीरधारणं कथमित्युच्यते॥ ॥समं कायशिरोग्रीवं
धारयन्नचलं स्थिरः॥ संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥१३॥ समं कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं तत्समं धारय
न्नचलं च समं धारयतश्चलनं संभवत्यतो विशिनष्टि अचलमिति स्थिरः स्थिरो भूत्वेत्यर्थः॥ स्वं नासिकाग्रं संप्रेक्ष्य सम्यक् प्रेक्षणं द
र्शनं कृत्वेव तीव शब्दो लुप्तो द्रष्टव्यः॥ न हि स्वनासाग्रसंप्रेक्षणमि [illegible] ॥ह विवक्षितं किं तर्हि चक्षुषो दृष्टेः सन्निपातो तः करणस
माधानापेक्षो विवक्षितः नासिकाग्रसंप्रेक्षणमेव चेद्विवक्षितं॥ मनः तत्रैव समाधीयेत नात्मनि॥ आत्मनि हि मनसः समाधानं वक्ष्यत्या
त्मसंस्थं मनः कृत्वेति तस्मादिवशब्दलोपेनाक्ष्णोः दृष्टिसन्निपात एव संप्रेक्ष्यमुच्यते॥ स्वां दिशश्चानवलोकयन् दिशां चावलोकनमकुर्वन्नि
त्यंतरायमकुर्वन्नित्येतत्॥१३॥ किंच॥ प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः॥ मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥१४॥ प्रशां

तात्मा प्रकर्षेण प्रशांतः आत्मा अंतःकरणं यस्य सोऽयं प्रशांतात्मा विगतभीः विगतभयो ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणो व्रतं ब्रह्मच
र्यं गुरुशुश्रूषा भिक्षान्नभोजनादि तस्मिन् स्थितः सन् तदनुष्ठाता भवेदित्यर्थः॥ मनः संयम्य मनसो वृत्तीरुपसंहृत्य तत्त्वमो मच्चित्तो मयि परमेश्व
रे चित्तं यस्य सोऽयं मच्चित्तः युक्तः समाहितः सन्नासीत उपविशेत्। मत्परः अहं परो यस्य सोऽयं मत्परो भवति कश्चिद्रागी स्त्रीं चिंतयन् न तु स्त्रिय
मेव परत्वेन गृह्णाति किंतु हि राजानं महादेवं वा अयं तु मच्चित्तो मत्परश्च॥१४॥ अथेदानीं योगफलमुच्यते॥ ॥युंजन्नेवं सदात्मानं यो
गी नियतमानसः॥ शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति॥१५॥ युंजन् समाधानं कुर्वन्नेवं यथोक्तेन विधानेन योगी नियतमानसः
सः नियतं स्वाधीनं मानसं मनो यस्य सोऽयं नियतमानसः स शांतिमुपरतिं निर्वाणपरमां निर्वाणं मोक्षः स एव परमा निष्ठा यस्याः शांतेः सा नि
र्वाणपरमा तां मत्संस्थां मदधीनामधिगच्छति प्राप्नोति॥१५॥ योगिन आहारादिनियममुच्यते॥ ॥नात्यश्नतस्तु योगोऽस्ति न चैकांतमन
श्नतः॥ न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन॥१६॥ अत्यश्नतः आत्मसंमितमन्नपरिमाणमतीत्याश्नतः न योगोऽस्ति न चैकां
रा तमनश्नतो योगोऽस्ति यदु ह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवतीति श्रुतेः॥ तस्माद्योगी ना
त्मसंमितादधिकं न्यूनं वाश्नीयात्। अथवा योगिनो योगशास्त्रपरिपठितादन्नपरिमाणादतिमात्रमश्नतो योगो नास्ति उक्तं हि अर्धमश
नस्य सव्यंजनस्य तृतीयमुदकस्य वायोः संचारणार्थं चतुर्थमवशेषयेदित्यादि परिमाणं। तथा न चातिस्वप्नशीलस्य योगो भवति
न चैव अतिमात्रं जाग्रतो योगो भवति चार्जुन॥१६॥ कथं पुनर्योगो भवतीत्युच्यते॥ ॥युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु॥
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥१७॥

युक्ताहारविहारस्य आह्रियत इत्याहारोऽन्नं विहरणं विहारः पादक्रमः तौ युक्तौ नियतपरिमाणौ यस्य तस्य युक्तचेष्टस्य तथान्याश्च
नियता चेष्टा यस्य कर्मसु तथा युक्तस्वप्नावबोधस्य युक्तौ स्वप्नश्चावबोधश्च तौ नियतकालौ यस्य तस्य युक्तस्वप्नावबोधस्य योगिनो योगो
भवति दुःखहा दुःखानि निर्वाणि हंतीति दुःखहा सर्वसंसारदुःखक्षयकृद्योगो भवतीत्यर्थः ॥१७॥ अथ पुनः कदा युक्तो भवतीत्युच्य
ते ॥ ॥यदा विनियतं चित्तमात्मन्येवावतिष्ठते ॥ निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥१८॥ यदा विनियतं चित्तं विशेषेण
नियतं संयमेकतामापन्नं चित्तं हित्वा बाह्यचिंतामात्मन्येव केवले प्रवतिष्ठते स्वात्मनि स्थितिं लभत इत्यर्थः ॥ निस्पृहः सर्वकामेभ्यो
भ्यो निर्गता दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः स युक्तः समाहित इत्युच्यते तदा योगिनस्समाहितचित्तस्योपमो
च्यते ॥१८॥ यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ॥ योगिनो यतचित्तस्य युंजतो योगमात्मनः ॥१९॥ यथा दीपः प्रदीपो
निवातस्थो निवाते वातवर्जिते देशे स्थितो नेंगते न चलति सा उपमा उपमीयते नयेत्युपमा योगज्ञैश्चित्तप्रचारदर्शिभिः स्मृता चिं
तिता योगिनो यतचित्तस्य संयतांतःकरणस्य युंजतो योगमनुतिष्ठत आत्मनः समाधानमनुतिष्ठत इत्यर्थः ॥१९॥ एवं योगा
भ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सत् ॥ ॥यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥ यत्र चैवात्मनात्मानं पश्यन्नात्म
नि तुष्यति ॥२०॥ यत्र यस्मिन्काले उपरमते चित्तमुपरतिं गच्छति निरुद्धं सर्वतो निवारितप्रचारं योगसेवया योगानुष्ठानेन यत्र
चैव यस्मिन्काले आत्मना समाधिपरिशुद्धेनांतःकरणेनात्मानं परं चैतन्यं सर्वतो ज्योतिःस्वरूपं पश्यन्नुपलभमानः स्वा
त्मनि तुष्यति तुष्टिं भजते ॥२०॥ किंच ॥ सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं ॥ वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥२१॥ ॥

सुखमात्यंतिकमत्यंततमेव भवतीत्यात्यंतिकमनंतमित्यर्थः॥ ततु बुद्धिग्राह्यं बुद्ध्यैवेंद्रियनिरपेक्षया ग्राह्यं तत इति बुद्धिग्राह्यं अतींद्रि
यं इंद्रियगोचरातीतं तच्च विषयजनितमित्यर्थः॥ वेत्ति तदीदृशं सुखमनुभवति यत्र यस्मिन्काले च अयं विद्वानात्मस्वरूपे स्थितस्तस्मा
न्नैव चलति ततत्वस्मा[illegible]त्वरूपान्न प्रच्यवत इत्यर्थः॥२१॥ किंच॥ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः॥ यस्मिन्स्थितो न दुःखे
न गुरुणापि विचाल्यते॥२२॥ यं लब्ध्वा यं आत्मलाभं लब्ध्वा प्राप्यापरमन्यल्लाभांतरं ततोऽधिकमस्तीति न मन्यते न चिंतयति। किंच॥ य
स्मिन्नात्मतत्वे स्थितो दुःखेन शस्त्रनिपातादिलक्षणेन गुरुणा महतापि न विचाल्यते॥२२॥ यत्रोपरमत इत्याद्यारभ्य यावद्भिर्विशे
षणैर्विशिष्टः आत्मावस्थाविशेषो योग उक्तः॥ ॥ तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं॥ स निश्चयेन योक्तव्यो योगोऽनिर्वि
ण्णचेतसा॥२३॥ तं विद्याद्विजानीयात् दुःखसंयोगवियोगं दुःखैः संयोगो दुःखसंयोगस्तेन वियोगस्तं दुःखसंयोगवियोगं योग इ
त्येव संज्ञितं विपरीतलक्षणेन विद्यात् विजानीयादित्यर्थः॥ योगफलमुपसंहृत्य पुनरन्वारंभेण योगस्य कर्त्तव्यतोच्यते निश्चय
निर्वेदत्वयोः साधनत्वविधानार्थं स यथोक्तफलो योगो निश्चयेनाध्यवसायेन योक्तव्यो निर्विण्णचेतसा न निर्विण्णमनिर्विण्णं किंतद्
तस्मै तन्निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः॥२३॥ किंच॥ ॥ संकल्पप्र[illegible]भवान्कामांस्त्यक्त्वा सर्वानशेषतः॥ मनसैवेंद्रियग्रामं
विनियम्य समंततः॥२४॥ संकल्पप्रभवान्संकल्पः प्रभवो येषां कामानां ते संकल्पप्रभवाः कामास्तांस्त्यक्त्वा परित्यज्य सर्वानशेष
तो॥ किंच॥ मनसैव विवेकयुक्तेनेंद्रियग्राममिंद्रियसमुदायं विनियम्य नियमनं कृत्वा समंततः सर्वतः॥२४॥ शनैः शनैरुपरमेद्बुद्ध्या

धृतिगृहीतया ॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥२५॥ शनैः शनैर्न सहसा उपरमेत् । उपरतिं कुर्यात् । केन बुद्ध्या किंवि
शिष्टया धृतिगृहीतया धृत्या गृहीतया धैर्ययुक्तयेत्यर्थः ॥ आत्मसंस्थमात्मनि संस्थितम् आत्मैव सर्वं न ततोऽन्यत् किंचिदस्तीत्येवमात्मसंस्थं
मनः कृत्वा न किंचिदपि चिंतयेत् । एष योगस्य परमो विधिः ॥२५॥ तत्रैवमात्मसंस्थं मनः कर्त्तुं प्रवृत्तो योगी ॥ ॥यतो यतो निश्चरति मनश्चं
चलमस्थिरं ॥ ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥ यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चरति निर्गच्छति । स्वभावदोषा
त् मनश्चंचलं अत्यंतचलम् अत एवास्थिरं ॥ ततस्ततस्तस्मात्तस्माच्छब्दादेर्निमित्तान्नियम्य तत्तन्निमित्तं याथात्म्यनिरूपणेनाभासीकृत्य वैराग्य
भावनया चैतन्मन आत्मन्येव वशं नयेत् । आत्मवश्यत्वमापादयेत् ॥२६॥ एवं योगाभ्यासबलाद्योगिन आत्मन्येव प्रशाम्यति मनः ॥ ॥प्रशां
तमनसं ह्येनं योगिनं सुखमुत्तमं ॥ उपैति शांतरजसं ब्रह्मभूतमकल्मषं ॥२७॥ प्रशांतमनसं प्रशांतं मनो यस्य स प्रशांतमनास्तं प्रशांतमनसं
ह्येनं योगिनं सुखमुत्तमं निरतिशयमुपैत्युपगच्छति शांतमनसं क्षीणमोहादिक्लेशरजसमित्यर्थः । ब्रह्मभूतं जीवन्मुक्तं ब्रह्मैव सर्वतरत्येव
निश्चयं ब्रह्मभूतमकल्मषमधर्मादिवर्जितं ॥२७॥ ॥युंजन्नेवं सदात्मानं योगी विगतकल्मषः ॥ सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते ॥२८॥ यु
ंजन्नेवं यथोक्तक्रमेण योगी योगांतरायवर्जितः सदात्मानं विगतकल्मषो विगतपापः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणा परेण संस्पर्शो
यस्य तद्ब्रह्मसंस्पर्शमत्यंतमुत्कृष्टं निरतिशयं सुखमश्नुते व्याप्नोति ॥२८॥ इदानीं योगस्य यत्फलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकार
णं तत्प्रदर्शयति ॥ ॥सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ॥ ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥२९॥ सर्वभूतस्थं सर्वभूतेषु स्थि

सर्वभूतेषु गुणरूपसंस्कारमस्तु विक्रियारहितं समं निर्विशेषं ब्रह्मात्मैकत्वविषयं दर्शनं यस्य स सर्वत्र॥

तं स्वमात्मानं सर्वभूतानि ब्रह्मादीनि च स्तंबपर्यंतानि सर्वभूतान्यात्मन्येकतां गतानीक्षते पश्यति कः योगयुक्तात्मा समाहितांतःकरणः
सर्वत्र समदर्शनः सर्वेषु ब्रह्मादिस्थावरांतेषु सर्वत्र समदर्शन॥२९॥ एतस्यात्मैकत्वदर्शनस्य फलमुच्यते॥ ॥यो मां पश्यति सर्वत्र
सर्वं च मयि पश्यति॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यति॥३०॥ यो मां पश्यति वासुदेवं सर्वस्यात्मानं सर्वत्र सर्वभूतेषु सर्वं च ब्रह्मादि
भूतजातं मयि सर्वात्मनि पश्यति तस्यैवमात्मैकत्वदर्शिनोहमीश्वरो न प्रणश्यामि न परोक्षतां गमिष्यामि स च मे न प्रणश्यति स च विद्वा
न्मम वासुदेवस्य न प्रणश्यति न परोक्षो भवति॥३०॥ तस्य च मम चैकात्मत्वात्स्वात्मा हि नाम आत्मनः प्रकाश एव भवति। यस्माच्चाहमे
व सर्वस्यात्मैकत्वदर्शी॥ ॥सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः॥ सर्वथा वर्त्तमानोपि स योगी मयि वर्त्तते॥३१॥ इत्येत
त्पूर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षो विधीयते। सर्वथा सर्वप्रकारैर्वर्त्तमानोपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्त्त
ते नित्यमुक्त एवासौ। न मोक्षं प्रति केनचित्प्रतिबध्यत इत्यर्थः॥३१॥ किंचान्यत्॥ आत्मौपम्येन सर्वत्र समं पश्यति योर्जुन॥ सुखं
वा यदि वा दुःखं स योगी परमो मतः॥३२॥ आत्मस्वयमेवोपमीयते रत्युपमा तया भाव औपम्यं तेनात्मौपम्येन सर्वत्र सर्वभूतेषु समं तु
ल्यं पश्यति योर्जुन। स च किं समं पश्यतीत्युच्यते यथा मम सुखमिष्टं तथा सर्वप्राणिनां सुखमनुकूलं वा शब्दोर्थे यदि वा यच्च दुः श्लो २
खं मम प्रतिकूलमनिष्टं यथा तथा सर्वप्राणिनां दुःखमनिष्टं प्रतिकूलमित्येवमात्मौपम्येन सुखदुःखे चानुकूलप्रतिकूले तु
ल्यतया सर्वभूतेषु समं पश्यति न कस्यचित्प्रतिकूलमाचरति अहिंसक इत्यर्थः। य एवमहिंसकः सम्यग्दर्शननिष्ठः स योगी परमः

मुक्तोऽसौ मतोऽभिमतः॥३२॥ सर्वयोगिनां मे तस्य यथोक्तस्य समदर्शनलक्षणस्य योगस्य दुःखसंपाद्यतामालक्षयन्नर्जुनस्तत्प्रा
प्त्युपायं॥ अर्जुन उवाच॥ ॥योयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन॥ एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां॥३३॥ योयं
योगस्त्वया प्रोक्तः साम्येन समत्वेन मधुसूदन एतस्य योगस्याहं न पश्यामि नोपलभे ॰ चंचलत्वान्मनसः। किंच। स्थिरामचलां स्थि
तिं प्रसिद्धमेतत्॥३३॥ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुःकरं॥३४॥ चंचलं हि मनः कृष्ण
इति कृषतेर्विलेखनार्थस्य रूपं भक्तजनपापादिदोषाकर्षणात्कृष्ण न केवलमत्यर्थं चंचलं प्रमाथि च प्रमथनशीलं प्रमथ्नाति
शरीरमिंद्रियाणि च विक्षिप्तं परवशीकरोति। किंच। बलवन्नकेनचिन्नियंतुं शक्यं किंच दृढं तंतुनागवत्तस्यैवंभूतस्य मनसो निग्र
हं निरोधं मन्ये वायोरिव दुःकरं निग्रहस्ततोपि दुःकरं मन्ये इत्यभिप्रायः॥३४॥ श्रीभगवानुवाच॥ एवमेव यथा ब्रवीषि॥ ॥असंशयं
महाबाहो मनो दुर्निग्रहं चलं॥ अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते॥३५॥ असंशयं संशयो नास्ति मनो दुर्निग्रहं चलमित्यत्र तु। संय
किंतु अभ्यासेनाभ्यासो नाम चित्तभूमौ कस्यांचित्समानप्रत्ययावृत्तिश्चित्तस्य वैराग्यं दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्यं तेन च वै
वैराग्येण गृह्यते विक्षेपरूपः प्रचारः चित्तस्यैवं तन्मनो निगृह्यते निरुध्यत इत्यर्थः॥३५॥ असंयतात्मना योगो दुःप्राप इति मे मतिः॥ पः पुनरः
वश्यात्मना तु यतता शक्योवाप्तुमुपायतः॥३६॥ असंयतात्मना अभ्यासवैराग्याभ्यामसंयतमंतःकरणं यस्य सोयमसंयतात्मा संयतात्मा
तेनासंयतात्मना योगो दुःप्राप्यो दुःखेन प्राप्य इति मे मतिः॥ यस्तु पुनर्वश्यात्माभ्यासवैरा॰ग्याभ्यां वश्यत्वमापादितमात्मा मनो तेन

पस्य सोऽयं वश्यात्मा तेन वश्यात्मना तु यतता भूयोऽपि प्रयत्नं कुर्वता शक्योऽवाप्तुं योग उपायतो यथोक्तादुपायात् ॥३६॥ तत्र योगाभ्या
सांगीकरणेन परलोक इहलोकप्राप्तिनिमित्तानि कर्माणि संन्यस्तानि योगसिद्धिफलं च मोक्षसाधनं सम्यग्दर्शनं प्राप्तमिति योगी यो
गमार्गान्मरणकाले चलितचित्त इति तस्य नाशमाशंक्यैव ॥ अर्जुन उवाच ॥ ॥अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ॥ अप्राप्य यो
गसंसिद्धिं कां गतिं कृष्ण गच्छति ॥३७॥ अयतिरप्रयत्नवान् योगमार्गे श्रद्धयास्तिक्यबुद्ध्या चोपेतो योगादंतकाले च चलितं मानसं मनो
यस्य स चलितमानसो भ्रष्टस्मृतिः सोऽप्राप्य योगसंसिद्धिं योगफलं सम्यग्दर्शनं कां गतिं कृष्ण गच्छति ॥३७॥ ॥कच्चिन्नोभयविभ्रष्टश्छि
न्नाभ्रमिव नश्यति ॥ अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥३८॥ कच्चित्किं नोभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्च भ्रष्टः सन् छि
छिन्नाभ्रमिव नश्यति न नश्यति वा किं अप्रतिष्ठो निराश्रयो हे महाबाहो विमूढः सन् ब्रह्मणः पथि ब्रह्ममार्गप्राप्तौ ॥३८॥ ॥एत
न्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ॥ त्वदन्यः संशयस्यास्य छेत्ता ह्युपपद्यते ॥३९॥ ॥एतन्मे संशयं कृष्ण छेत्तुमपनेतुमर्हसि अशे
षतः त्वदन्यस्त्वत्तोऽन्य ऋषिर्देवो वा छेत्ता नाशयिता संशयस्यास्य न हि यस्मादुपपद्यते न संभवति अतस्त्वमेव छेत्तुमर्हसीत्यर्थः ॥३९॥
श्रीभगवानुवाच ॥ ॥पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ॥ न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥४०॥ पार्थ नैवेहलोके ॥ अमुत्र
परस्मिन्वा विनाशस्तस्य विद्यते नास्ति नाशो नाम पूर्वस्माद्धीनजन्मप्राप्तिः स योगभ्रष्टस्य नास्ति न हि यस्मात्कल्याणकृत् कश्चिद्दुर्गतिं
कुत्सितां गतिं हे तात तनोत्यात्मानं पुत्ररूपेणेति पिता तात उच्यते पितैव पुत्र इति पुत्रोऽपि तात उच्यते शिष्योऽपि पुत्रो यतः न गच्छति किंत्वस्य नव

ति॥४०॥ ॥प्राप्य पुण्यकृतांल्लोकानुषित्वा शाश्वतीः समाः॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते॥४१॥ योगमार्गे प्रवृत्तः
संन्यासी सामर्थ्यात् प्राप्य गत्वा पुण्यकृताम् अश्वमेधादियाजिनां लोकान् तत्र चोषित्वा समनुभूय शाश्वतीर्नित्याः समाः संवत्सरान् तद्भो
गक्षये शुचीनां यथोक्तकारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टोऽभिजायते इति॥४१॥ ॥अथवा योगिनामेव कुले भवति धीम
ताम्॥ एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्॥४२॥ अथवा श्रीमतां कुलादन्यस्मिन् योगिनामेव दरिद्राणां कुले भवति जायते धीमतां बुद्धिम
तां॥ एतद्धि जन्म दरिद्राणां योगिनां कुले दुर्लभतरं दुःखलभ्यतरं पूर्वमपेक्ष्य लोके जन्म यदीदृशं यथोक्तविशेषणे कुले॥४२॥ यस्मात्॥
॥तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्॥ यतते च ततो भूयः संसिद्धौ कुरुनंदन॥४३॥ तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्ध्या संयोगं ल
भते पौर्वदेहिकं पूर्वदेहे भवं पौर्वदेहिकं यतते च प्रयत्नं च करोति ततस्तस्मात् पूर्वकृतात् संस्कारात् भूयो बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे
कुरुनंदन॥४३॥ कथं बुद्धिसंयोगमित्युच्यते॥ ॥पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः॥ जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते॥
४४॥ यः पूर्वजन्मनि कृतोऽभ्यासः स पूर्वाभ्यासस्तेनैव बलवता ह्रियते हि यस्मादवशोऽपि स योगभ्रष्टो न कृतं चेत्योगाभ्याससंजातसं
स्कारात् बलवत्तरम् अधर्मादिलक्षणं कर्म तदा योगाभ्यासजनितेन संस्कारेण ह्रियते। अधर्मश्चेद्बलवत्तरः कृतस्तेन योगजोऽपि सं
स्कारोऽभिभूयत एव तत्क्षये तु योगजः स्वसंस्कारः स्वयमेव कार्यमारभते न दीर्घकालस्थस्यापि विनाशस्तस्यास्तीति। अतो जिज्ञासुर
पि योगस्य स्वरूपं ज्ञातुमिच्छन्नपि योगमार्गे प्रवृत्तः संन्यासी योगभ्रष्टः सामर्थ्यात् सोऽपि शब्दब्रह्म वेदोक्तकर्मानुष्ठानफलमतिवर्त्तते

किमुत बुद्ध्वा योगं तन्निष्ठस्तदभ्यासं कुर्यात्॥४४॥ कुतश्च योगित्वं श्रेय इति॥ ॥प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः॥ अनेकजन्म
संसिद्धस्ततो याति परां गतिम्॥४५॥ प्रयत्नादधिकयत्नात् यतमानः इत्यर्थः। तत्र तु योगी संशुद्धकिल्बिषः संशुद्धपापोऽनेकेषु जन्म
सु किंचित्किंचित्संस्कारजातं उपचित्य तेनोपचितेनानेकजन्मकृतेन संसिद्धोऽनेकजन्मसंसिद्धस्ततो लब्धसम्यग्दर्शनः सन् याति परां
प्रकृष्टां गतिं॥४५॥ यस्मादेवं तस्मात्॥ ॥तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः॥ कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जु
न॥४६॥ तपस्विभ्यः कृतोपवासादिनाशरीरसंशोषकारिणस्तपस्विनस्तेभ्योऽप्यधिको योगी ज्ञानिभ्योऽपि ज्ञानमत्र शास्त्रपाण्डित्यं त
द्वद्भ्योऽपि मतो ज्ञातोऽधिक इति। कर्मिभ्योऽग्निहोत्रादिकर्म तद्वद्भ्योऽधिको योगी तस्माद्योगी भवार्जुन॥४६॥ ॥योगिनामपि सर्वेषां म
द्गतेनांतरात्मना॥ श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥४७॥ योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां मद्गतेन मयि
वासुदेवे समाहितेनांतरात्मना अंतःकरणेन श्रद्धावान् श्रद्दधानः सन् भजते सेवते। यो मां स मे मम युक्ततमोऽतिशयेन युक्तो मतोऽभि
मत इति॥४७॥ ॥इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ गीताभाष्ये ध्यान
योगो नाम षष्ठोऽध्यायः समाप्तः॥ ॥६॥ ॥योगिनामपि सर्वेषां मद्गतेनांतरात्मना॥ श्रद्धावान् भजते यो मां स मे युक्ततमो मत इति प्रश्नबीजं
उपन्यस्य स्वयमेवेदृशं मदीयं तत्त्वमेवं मद्गतांतरात्मा स्यादित्येतद्विवक्षुर्भगवानुवाच॥ मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः॥ असं
शयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥१॥ मयि वक्ष्यमाणविशेषणे परमेश्वरे आसक्तं मनो यस्य स मय्यासक्तमनाः पार्थ योगं युंजन्मनःस्य

माधानं कुर्वन् मदाश्रयो रहमेव परमेश्वरः आश्रयो यस्य स मदाश्रयः। यो हि पुरुषार्थेन केनचिदर्थी स्यात्तत्साधनं कर्माग्निहोत्रादि तपो दानं वा किंचि
दाश्रयं प्रतिपद्यते अयं तु योगी मामेवाश्रयं प्रतिपद्यते हित्वान्यत्साधनांतरं मय्येवासक्तमना भवति। यस्त्वेवंभूतः सन् असंशयं समग्रं समस्त
विभूतिबलशक्त्यैश्वर्यादिगुणसंपन्नं मां यथा येन प्रकारेण ज्ञास्यसि संशयमंतरेणैवमेव भगवानिति तच्छृणु उच्यमानं मया तच्च मद्विष
यं॥१॥ ॥ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते॥२॥ ज्ञानं ते तुभ्यमहं सविज्ञानसहितं स्वानु
भवसंयुक्तमिदं वक्ष्यामि कथयिष्याम्यशेषतः कार्त्स्न्येन तत्र ज्ञानं विवक्षितं स्तौति श्रोतुरभिमुखीकरणाय यज्ज्ञात्वा तत्ज्ञानं ज्ञात्वा नेह भूयः पु
नरन्यज्ज्ञातव्यं पुरुषार्थसाधनमवशिष्यते नावशेषो भवतीति मत्तत्त्वज्ञो यः स सर्वज्ञो भवतीत्यर्थः॥२॥ अतो विशिष्टफलत्वाद् दुर्लभं मतं ज्ञानं कथ
मित्युच्यते॥ ॥मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥३॥ मनुष्याणां मध्ये सहस्रेष्वनेकेषु
कश्चिद्यतति प्रयत्नं करोति सिद्धये सिद्ध्यर्थं तेषां यततामपि सिद्धानां सिद्धा एव हि ते ये मोक्षाय यतंते तेषां कश्चिदेव मां वेत्ति तत्त्वतो यथावत्॥ अ
श्रोतारं प्ररोचनेनाभिमुखीकृत्याह॥ ॥भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥४॥ भूमिरिति पृथि
वीतन्मात्रमुच्यते॥ न स्थूला भिन्ना प्रकृतिरष्टधेति वचनात् तथाऽबादयोऽपि तन्मात्राण्येव आपोऽनलो वायुः खं मनो मन इति मनसः कारणमहंकारो
प्रधानमि त्यर्थः २ गृह्यते बुद्धिरित्यहंकारकारणं महत्तत्त्वं अहंकार इत्यविद्यासंयुक्तमव्यक्तं यथा विषसंपृक्तमन्नं विषमित्युच्यते। एवमहंकारवासनावद् अव्यक्तं
मूलकारणमहंकार इत्युच्यते॥ प्रवर्त्तकत्वादहंकारस्याहंकार एव हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके इतीयं यथोक्ता प्रकृतिर्मे मे ईश्वरी मायाशक्ति

रित्येवाहंकारे ममकारे॥ भवति तयोरभावे सर्वाप्रवृत्तिरिति प्रसिद्धमित्यर्थः। १

अचेतनवर्गमेकीकर्तुं प्रकृतेरष्टधा प्रकारिणा मया अभिधाय विकारावधित्वं कार्यकलत्वं चेतनवर्गमेकीकर्तुं पुरुषस्य चेतनत्वस्याविद्याशक्त्यवधित्वस्यापि प्रकृतित्वमुक्तम्॥

रष्टधा भिन्ना भेदमागता॥४॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां॥ जीवभूतां महाबाहो ययेदं धार्यते जगत्॥५॥ अपरा न परा निकृष्टा अशु
द्धा नर्थकरी संसारकरी बंधनात्मिका इयमितो ऽस्या यथोक्तायास्तु अन्यां विशुद्धां प्रकृतिं मम आत्मभूतां विद्धि मे परां प्रकृष्टां जीवभूतां क्षेत्रज्ञल
क्षणां प्राणधारणनिमित्तभूतां महाबाहो यया प्रकृत्या इदं धार्यते जगदंतः प्रविश्य॥५॥ ॥एतद्योनीनि भूतानि सर्वा[illegible]णीत्युप
धारय॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥६॥ एतद्योनीनि एते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनी येषां भूतानां तान्येत
द्योनीनि भूतानि सर्वाणीत्येवमुपधारय जानीहि यस्मान्मम प्रकृती योनिः कारणं सर्वभूतानां अतो ऽहं कृत्स्नस्य समस्तजगतः प्र
भव उत्पत्तिः प्रलयो विनाशस्तथा प्रकृतिद्वयद्वारेणाहं सर्वज्ञ ईश्वरो जगतः कारणमित्यर्थः॥६॥ यस्मात्॥ ॥मत्तः परतरं नान्यत्किं
चिदस्ति धनंजय॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥७॥ मत्तः परमेश्व[illegible]रात्परतरमन्यत्कारणांत
रं किंचिन्नास्ति न विद्यते अहमेव जगत्कारणमित्यर्थः। हे धनंजय यस्मादेवं तस्मात्॥ मयि परमेश्वरे सर्वाणि भूतानि सर्वमिदं जगत्प्रोतम
नुगतं ग्रथितमित्यर्थः। दीर्घपटतंतुवत् सूत्रे मणिगणा इव॥७॥ केन केन धर्मेण विशिष्टे त्वयि सर्वं प्रोतमित्युच्यते॥ ॥रसोऽहमप्सु
कौंतेय प्र[illegible]भास्मि शशिसूर्ययोः॥ प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥८॥ रसः अहं अपां यः सारः सरतः तस्मिन् रसभूते मयि आपः
प्रोता इत्यर्थः॥ एवं सर्वत्र यथाहमप्सु रस एवं प्रभास्मि शशिसूर्ययोः। प्रणवः ओंकारः सर्ववेदेषु तस्मिन्प्रणवभूते मयि सर्वे वेदाः प्रोताः तथा
खे आकाशे शब्दः सारभूतः तस्मिन्मयि खं प्रोतं। तथा पौरुषं पुरुषस्य भावः यतः पुंबुद्धिर्नृषु तस्मिन्पौरुषे मयि पुरुषाः प्रोताः॥८॥ पुण्यो/

गंधः पृथिव्यां च तेजश्चास्मि विभावसौ॥ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु॥९॥ पुण्यः सुरभिर्गंधः पृथिव्यां चाहं तस्मिन्नपि गंधभूते पृथि
वी प्रोता। पुण्यत्वं गंधस्य स्वभावत एव पृथिव्यां दर्शितमबादिषु रसादेः पुण्यत्वोपलक्षणार्थं अपुण्यत्वं तु गंधादीनामविद्याधर्माद्यपेक्षं संसारि
णां भूतविशेषसंसर्गनिमित्तं भवतीति तेजो दीप्तिश्चास्मि विभावसावग्नौ तथा जीवनं सर्वभूतेषु येन जीवंति सर्वभूतानि तज्जीवनं तपश्चा
स्मि तपस्विषु॥ तस्मिंस्तपसि मयि तपस्विनः प्रोताः॥९॥ ॥बीजं मां सर्वभूतानां विद्धि पार्थ सनातनं॥ बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनाम
हं॥१०॥ बीजं प्ररोहकारणं मां विद्धि सर्वभूतानां हे पार्थ सनातनं चिरंतनं॥ किंच॥ बुद्धिर्विवेकशक्तिरंतःकरणस्य बुद्धिमतां विवेकशक्तिम
तामस्मि तेजः प्रागल्भ्यं तद्वतां तेजस्विनामहं॥१०॥ ॥बलं बलवतां चाहं कामरागविवर्जितं॥ धर्माविरुद्धो भूतेषु कामोस्मि भरतर्षभ॥११॥
बलं सामर्थ्यमोजः बलवतामहं तच्च बलं कामरागविवर्जितं कामश्च रागश्च कामरागौ कामः तृष्णा असंनिकृष्टेषु विषयेषु रागो रंज
नं प्राप्तेषु विषयेषु ताभ्यां कामरागाभ्यां विवर्जितं देहादिधारणमात्रार्थं बलमहमस्मि न तु संसारिणां तृष्णारागकारणं॥ किंच॥ धर्मावि
रुद्धः धर्मशास्त्राविरुद्धो यः प्राणिषु भूतेषु कामो यथा देहधारणमात्राद्यर्थे अशनपानादिविषयः कामोस्मि भरतर्षभ॥११॥ किंच॥ ॥
ये चैव सात्विका भावा राजसास्तामसाश्च ये॥ मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि॥१२॥ ये चैव सात्विका भावाः सत्वनिर्वृत्ता भावाः पदार्था रा
जसा रजोनिर्वृत्ताः तामसास्तमोनिर्वृत्ताश्च ये केचित्प्राणिनां स्वकर्मवशाज्जायंते तान्मत्त एव जायमानानिति एवं विद्धि सर्वान्समस्ताने
व यद्यपि ते मत्तो जायंते॥ तथापि न त्वहं तेषु तद[illegible]धीनस्तद्वशो यथा संसारिणस्ते पुनर्मयि मद्वशा मदधीनाः॥१२॥ एवंभूतमपि परमे

श्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्रदाहाय मां नाभिजानाति जगदित्यनुक्रोशं दर्शयति भगवा
न् तच्च किंनिमित्तं जगतोऽज्ञानमित्युच्यते॥ ॥त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्॥ मोहितं नाभिजानाति मामेभ्यः परमव्ययं॥१३॥ त्रि
भिर्गुणमयैर्विकारै रागद्वेषमोहादिप्रकारैर्भावैः पदार्थैरेभिर्यथोक्तैः सर्वमिदं प्राणिजातं जगन्मोहितमविवेकतामापादितं सन्नाभि
जानाति मामेभ्यो यथोक्तेभ्यो गुणेभ्यः परं व्यतिरिक्तं विलक्षणं चाव्ययं व्ययरहितं जन्मादिसर्वभावविकारवर्जितमित्यर्थः॥ कथं पुनर्दै
वीमेतां गुणात्मिकां वैष्णवीं मायामतिक्रामतीत्युच्यते॥ ॥दैवी ह्येषा गुणमयी मम माया दुरत्यया॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते॥१४॥
दैवी देवस्य ममेश्वरस्य विष्णोः स्वभावभूता हि यस्मात्तस्मादेषा यथोक्ता गुणमयी मम माया दुरत्यया दुःखेनात्ययो तिक्रमणं यस्याः
सा दुरत्यया तत्रैवं सति सर्वधर्मान्परित्यज्य मामेव मायाविनं स्वात्मभूतं सर्वात्मना ये प्रपद्यंते ते मायामेतां सर्वभूतमोहिनीं तरंत्यति
क्रमंति संसारबंधनात्मुच्यंते इत्यर्थः॥१४॥ यदि त्वां प्रपन्ना मायामेतां तरंति कस्मात्त्वामेव सर्वे न प्रपद्यंत इत्युच्यते॥ ॥न मां दुः
ष्कृतिनो मूढाः प्रपद्यंते नराधमाः॥ माययापहृतज्ञाना आसुरं भावमाश्रिताः॥१५॥ न मां परमेश्वरं दुःष्कृतिनः पापकारिणो मूढाः प्रपद्यं
ते नराणां मध्ये अधमा नराधमास्ते च माययापहृतज्ञानाः संमुषितज्ञाना आसुरं भावं हिंसानृतादिलक्षणमाश्रिताः॥१५॥ ये पुनर्न
रोत्तमाः पुण्यकर्माणः॥ ॥चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥१६॥ चतुर्विधाश्चतुःप्र
काराः भजंते मां जनाः सुकृतिनः पुण्यकर्माणो हे अर्जुन आर्त्तः आर्त्तिपरिगृहीतस्तस्करव्याघ्ररोगादिनाभिभूतः आपन्नो जि
ज्ञासुर्भगवत्तत्त्वं ज्ञातुमिच्छति यः अर्थार्थी धनकामो ज्ञानी विष्णोस्तत्त्ववित्च भरतर्षभ॥१६॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते॥ ॥

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥१७॥ तेषां चतुर्णां ज्ञानी तत्त्ववित्तत्त्ववित्त्वान्नित्ययुक्तो भवत्येकभक्तिश्चान्यस्य भजनीयस्या
दर्शनात्। अतः स एकभक्तिर्विशिष्यते विशेषमाधिक्यमापद्यते अतिरिच्यत इत्यर्थः ॥ प्रियो हि यस्मादहमात्मा ज्ञानिनः। तस्मात्तस्याह
मत्यर्थं प्रियः। प्रसिद्धं हि लोके आत्मा प्रियो भवतीति तस्मात् ज्ञानिन आत्मत्वाद्वासुदेवः प्रियो भवतीत्यर्थः ॥१७॥ स च ज्ञानी मम वासुदेवस्या
त्मैवेत्यतो ममात्यर्थं प्रियः। न तर्ह्यार्तादयो वासुदेवस्य प्रियाः न किं तर्हि ॥ ॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्। आस्थितः स हि युक्ता
त्मा मामेवानुत्तमां गतिम् ॥१८॥ उदारा उत्कृष्टाः सर्व एवैते त्रयोऽपि मम प्रिया इत्यर्थः ॥ न कश्चिन्मद्भक्तो मम वासुदेवस्याप्रियो भवति। ज्ञा
नी त्वत्यर्थं प्रियो भवतीति विशेषः। तत्कस्मादित्याह। ज्ञानी त्वात्मैव नान्यो मत्त इति मे मम मतं निश्चयः। आस्थित आरोढुं प्रवृत्तः स ज्ञानी
हि यस्मादहमेव भगवान्वासुदेवो नान्योऽस्मीत्येवं युक्तात्मा समाहितचित्तः सन्मामेव परं ब्रह्म गन्तव्यमनुत्तमां गतिं गन्तुं प्रवृत्त इत्यर्थः ॥
१८॥ ज्ञानी पुनरपि स्तूयते ॥ ॥ बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते। वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥१९॥ बहूनां जन्मनां ज्ञा
नार्थसंस्काराश्रयाणामन्ते समाप्तौ ज्ञानवान्प्राप्तपरिपाकज्ञानो मां वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रतिपद्यते। कथं वासुदेवः सर्वमि
ति। य एवं सर्वात्मानं प्रतिपद्यते स महात्मा न तत्समोऽन्योऽस्त्यधिको वा। अतः सुदुर्लभः ॥१९॥ मनुष्याणां सहस्रेष्वित्युक्तम्। आत्मैव सर्वं वासुदे
व इत्येवमप्रतिपत्तौ कारणमुच्यते ॥ ॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः। तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥२०॥ कामै
स्तैस्तैः पुत्रपशुस्वर्गादिविषयैर्हृतज्ञानाः अपहृतविवेकविज्ञानाः प्रपद्यन्तेऽन्यदेवताः वासुदेवादात्मनोऽन्यदेवताः तं तं नियमं देव

ताराधने प्रसिद्धो यो यो नियमः तं तमास्थायाश्रित्य प्रकृत्या स्वभावेन जन्मांतरार्जितसंस्कारविशेषेण नियताः नियमिताः स्वयाऽत्मीयया
तेषां च कामिनां ॥२०॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं ॥२१॥ यो यः कामी यां यां देव॥
तातनुं श्रद्धयासंयुक्तो भक्तः सन्नर्चितुं पूजयितुमिच्छति तस्य कामिनः अचलां स्थिरां श्रद्धां तामेव विदधामि स्थिरीकरोमि ॥२१॥ अश्रद्धया
पयैवं पूर्वं प्रवृत्तः स्वभावतो यां देवतातनुं अर्चितुमिच्छति ॥ ॥स तया श्रद्धया युक्तस्तस्याराधनमीहते ॥ लभते च ततः कामान्मयैव विहि
तान्हितान् ॥२२॥ स तया मद्विहितया श्रद्धया युक्तः सन् तस्या देवतातन्वा आराधनमीहते चेष्टते लभते च। ततस्तस्याऽराधिताया तन्वाः कामान् ×
मत्तान्मयैव परमेश्वरेण सर्वज्ञेन कर्मफलविभागज्ञेन ये विहिता निर्मिताः तान्। हि यस्माद्देवं भगवता विहिताः कामास्तस्मात्तानवश्यं ल
भत इत्यर्थः ॥ हितानिति पदछेदे हितत्वं कामानामुपचरितं कल्प्यं न हि कामा हिताः कस्यचित् ॥२२॥ यस्मादाद्यंतवत्साधनव्यापारा अवि
वेकिनः कामिन अतस्ततः ॥ ॥अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां ॥ देवान्देवयजो यांति मद्भक्ता यांति मामपि ॥२३॥ अंतवद्वि
नाशि तु फलं तेषां तद्भवत्यल्पमेधसां अल्पप्रज्ञानां देवान्देवयजो देवान्यजंतीति देवान्यांति मद्भक्ता यांति मामपि ॥२३॥ एवं समानेप्या
यासे मामेव न प्रपद्यंते अनंतफलाय अहो खलु कष्टं वर्त्तते इत्यनुक्रोशं दर्शयति भगवान् किंनिमित्तं त्वामेव न प्रपद्यंत इत्युच्यते ॥ ॥
अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः ॥ परं भावमजानंतो ममाव्ययमनुत्तमं ॥२४॥ अव्यक्तं अप्रकाशं व्यक्तिमापन्नं प्रकाशं गतं इदा
नीं मन्यंते मां नित्यप्रसिद्धमीश्वरमपि संतं अबुद्धयो विवेकिनः परं भावं परमात्मस्वरूपं अजानंतो विवेकतो ममाव्ययं व्ययरहितम

शरीरग्रहणात्पूर्वमिति शेषः २

नुत्तमं निरतिशयं मदीयं भावमजानंतो मन्यंत इत्यर्थः ॥२४॥ तदज्ञानं किंनिमित्तमित्युच्यते ॥ ॥नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥
मूढोयं नाभिजानाति लोको मामजमव्ययम् ॥२५॥ नाहं प्रकाशः सर्वस्य लोकस्य केषांचिदेव मद्भक्तानां प्रकाशोहमित्यभिप्रायः योगमा
यासमावृतः । योगो गुणानां युक्तिर्घटनं सैव माया तया योगमायया समावृतः संछन्नः चित्तसमाधिर्वा योगो भगवतस्तत्कृता माया यो
गमाया तया समावृतः संछन्न इत्यर्थः ॥ अत एव मूढो लोकोयं नाभिजानाति मामजमव्ययं ॥२५॥ यद्यपि योगमायया योगमायासमावृतं मां लो
को नाभिजानाति नासौ योगमाया मदीया सती मम ईश्वरस्य मायाविनो ज्ञानं प्रतिबध्नाति यथान्यस्यापि मायाविनो मायातद्वदेव मतः ॥ ॥
वेदाहं समतीतानि वर्त्तमानानि चार्जुन ॥ भविष्याणि च भूतानि मां तु वेद न कश्चन ॥२६॥ अहं तु वेद जाने समतीतानि समतिक्रांतानि भूतानि
तथा वर्त्तमानानि चार्जुन । भविष्याणि च भूतानि वेदाहं मां तु वेद न कश्चन ॥२६॥ मद्भक्तं मच्छरणमेकं मुक्त्वा मत्तत्त्ववेदनाभावादेव न मां भज
ते ॥ केन पुनर्मत्तत्त्ववेदप्रतिबंधेन प्रतिबद्धानि जायमानानि सर्वभूतानि मां न विदंतीत्यपेक्षायामाह ॥ ॥इच्छाद्वेषसमुत्थेन द्वंद्वमोहे
न भारत ॥ सर्वभूतानि संमोहं सर्गे यांति परंतप ॥२७॥ इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थस्तेन इच्छाद्वेषस
मुत्थेन केनेति विशेषापेक्षायामिदमाह ॥ द्वंद्वमोहेनेति द्वंद्वनिमित्तो मोहो द्वंद्वमोहस्तेन तावेवेच्छाद्वेषौ शीतोष्णवत्परस्परविरुद्धौ ॥
सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः संबध्यमानौ द्वंद्वशब्देनाभिधीयते ॥ तत्र यदेच्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्या ॥
प्त्यालब्धात्मकौ भवतस्तदा तौ सर्वभूतानां प्रज्ञायाः स्ववशापादानद्वारेण परमार्थात्मतत्त्वविषयज्ञानोत्पत्तिप्रतिबंधकारणं मोहं जनयतः नहि

च्छाद्वेषदोषवशीकृतचित्तस्य भूतार्थविषयं ज्ञानमुत्पद्यते वहिरपि किमुत वक्तव्यं ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि वहुप्रतिवंधे ज्ञानं नोत्पद्यते इत्यतस्तेनेच्छाद्वेषसमुत्थेन द्वंद्वमोहेन हे भारत भरतान्वयज सर्वभूतानि संमोहितानि संति संमोहं संमूढतां सर्गे जन्मन्युत्पत्तिकाले इत्येतद्यांति गच्छंति हे परंतप मोहवशान्येव सर्वभूतानि संमोहितानि [illegible] जायमानानि जायंते इत्यभिप्रायः ॥२७॥ यतस्त एवमतस्तेन द्वंद्वमोहेन रहप्रतिवद्धप्रज्ञानानि सर्वभूतानि संमोहितानि मामात्मभूतं न जानंति अत एवात्मभावेन मां न भजंते के पुनरनेन द्वंद्वमोहेन निर्मुक्ताः संतस्त्वां विदित्वा यथाशास्त्रमात्मभावेन भजंत इत्यपेक्षितमर्थं दर्शयितुमाह ॥ ॥ येषां त्वंतगतं पापं जनानां पुण्यकर्मणां ॥ ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥२८॥ येषां तु पुनरंतगतं समाप्तप्रायं क्षीणं पापं जनानां पुण्यकर्मणां पुण्यं कर्म येषां सत्वशुद्धिकारणं विद्यते ते पुण्यकर्माणस्तेषां पुण्यकर्मणां ते द्वंद्वमोहनिर्मुक्ताः भजंते मां परमात्मानं दृढव्रताः एवमेव परमार्थो नान्यथेत्येवं सर्वपरित्यागव्रतेन निश्चितविज्ञाना दृढव्रता उच्यंते ॥२८॥ ते किमर्थं भजंते इत्युच्यते ॥ ॥ जरामरणमोक्षाय मामाश्रित्य यतंति ये ॥ ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥२९॥ जरामरणमोक्षाय जरामरणमोक्षार्थं मां परमेश्वरं आश्रिताः मत्समाहितचित्ताः संतो यतंति प्रयतंते ये ते यद्ब्रह्म परं तद्विदुः कृत्स्नं समस्तमध्यात्मं प्रत्यगात्मविषयं वस्तु कृत्स्नं समस्तं तद्विदुः कर्म चाखिलं समस्तं विदुः ॥२९॥ साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ॥ प्रयाणकालेपि च मां ते विदुर्युक्तचेतसः ॥३०॥ अधिभूतं चाधिदैवं च अधिभूताधिदैवं तेन सह अधिभूताधिदैवेन साधिभूताधिदैवं च ये मां विदुः साधियज्ञं च सह अधियज्ञेन साधियज्ञं ये विदुः प्रयाणकालेपि च मरणकालेपि च मां ते विदुः युक्तचेतसः समाहितचित्ता इति ॥३०॥ ॥इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ

गीतासु भाष्ये ज्ञानयोगो नाम सप्तमोऽध्यायः ॥७॥ ते ब्रह्म तद्विदुः कृत्स्नमित्यादिना भगवतार्जुनस्य प्रश्नबीजान्युपदिष्टानि श्रुत्वा तत्स्वार्थमर्जु-
न उवाच ॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ॥ अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥१॥ अधियज्ञः कथं कोऽत्र देहेऽस्मिन्
मधुसूदन ॥ प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥२॥ एषां प्रश्नानां यथाक्रमं निर्णयाय श्रीभगवानुवाच ॥ अक्षरं ब्रह्म परमं स्व-
भावोऽध्यात्ममुच्यते ॥ भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥३॥ अक्षरः न क्षरतीति परमात्मा एतस्य वा अक्षरस्य प्रशासने गार्गि सू-
र्याचंद्रमसौ विधृतौ तिष्ठत इति श्रुतेः ॥ ओंकारस्य तु ओं इति एकाक्षरं ब्रह्मेति परेण विशेषणात् तदग्रहणं परममिति च निरतिशये अक्षरे
ब्रह्मणि उपपन्नतरं विशेषणं ॥ तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्रत्यगात्मभावः स्वभावः स्वो भावोऽध्यात्ममुच्यते आत्मानं देहमधिकृत्य
प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावोऽध्यात्ममुच्यते अध्यात्मशब्देनाभिधीयते ॥ भूतभावोद्भवकरो भूतानां भावो भूत-
भावस्तस्योद्भवो भूतभावोद्भवस्तं करोतीति भूतभावोद्भवकरो भूतवस्तूत्पत्तिकर इत्यर्थः ॥ विसर्गो विसर्जनं देवतोद्देशेन चरुपुरोडाशादेर्द्रव्यस्य प-
वितरणं परित्यागः स एव विसर्गलक्षणो यज्ञः कर्मसंज्ञितः कर्मशब्दित इत्यर्थः ॥ तस्माद्धि बीजभूताद्वृष्ट्यादिक्रमेण स्थावरजंगमानि भूतानि
उद्भवंति ॥३॥ अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं ॥ अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥४॥ अधिभूतं प्राणिजातमधिकृत्य भवतीति सो क्षरः
क्षरतीति क्षरो विनाशी भावो यत्किंचिज्जनिमद्वस्त्वित्यर्थः ॥ पुरुषः पूर्णमनेन सर्वमिति पुरुषः पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वं पुरिश-
यनाद्वा पुरुषः ॥ आदित्यांतर्गतो हिरण्यगर्भः सर्वप्राणिकरणानामनुग्राहकः सोऽधिदैवतं ॥ अधियज्ञः सर्वयज्ञाभिमानिनी देवता विष्ण्वाख्यः ॥

यज्ञो वै विष्णुरिति श्रुतेः ॥ स विष्णुरहमेवास्मिन्देहे यो यज्ञस्तस्याहमधियज्ञः । यज्ञो हि देहनिर्वर्त्यत्वेन देहसमवायीति देहाधिकरणो
भवतीति । देहे देहभृतां वर ॥ ४ ॥ ॥ अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरं ॥ यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥ ॥ अं
तकाले च मरणकाले मामेव परमेश्वरं विष्णुं स्मरन्मुक्त्वा परित्यज्य कलेवरं शरीरं यः प्रयाति गच्छति स मद्भावं वैष्णवं तत्त्वं या
ति । नास्ति न विद्यतेऽत्रास्मिन्नर्थे संशयो याति वा न वेति ॥ ५ ॥ न मद्विषय एवायं नियमः किं तर्हि ॥ ॥ यं यं वापि स्मरन्भावं त्यजत्यं ते ४
कलेवरं ॥ तं तमेवेति कौंतेय सदा तद्भावभावितः ॥ ६ ॥ यं यं वापि यं यं भावं देवताविशेषं स्मरन्चिंतयन्त्यजति परित्यजति अंत
काले प्राणवियोगकाले कलेवरं शरीरं तं तमेति नान्यं हे कौंतेय सदा सर्वदा तद्भावभावितः तस्मिन्भावस्तद्भावः स भावो भावितोऽभ्य
स्तो येन स तद्भावभावितः सन्[illegible] ॥ ६ ॥ यस्मादेवमंत्या भावना देहांतरप्राप्तिकारणं ॥ ॥ तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य
च ॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ७ ॥ तस्मात्सर्वेषु कालेषु मामनुस्मर यथाशास्त्रं युध्य च युद्धं स्वधर्मं कुरु ॥ मयि देवे
ऽर्पिते मनोबुद्धी यस्य तव स त्वं मय्यर्पितमनोबुद्धिः सन्मामेव यथास्मृतमेष्यस्यागमिष्यसि अत्र संशयं न संशयोऽत्र विद्यते ॥ ७ ॥ किंच ॥ ॥
अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ॥ परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥ ८ ॥ अभ्यासयोगयुक्तेन मयि चित्तादिसमर्पणं वि
षयकृततत्र एकस्मिंस्तुल्यप्रत्ययावृत्तिलक्षणो विलक्षणप्रत्ययानंतरितोऽभ्यासः स चाभ्यासो योगस्तेन युक्तेन तत्रैव व्यापृतं योगिनश्चे
तसा तेन चेतसा नान्यगामिना नान्यत्र विषयांतरे गंतुं शीलमस्येति नान्यगामी तेन नान्यगामिना ॥ परमं निरतिशयं पुरुषं दिव्यं दिवि

ऽर्थं मदुक्तेनैव याति गच्छति हे पार्थानुचिंतयन् शास्त्राचार्योपदेशमनुध्यायन्नित्येतत्॥८॥ किंविशिष्टं पुरुषं यातीत्युच्यते॥ ॥कविं पुराण
मनुशासितारमणोरणीयांसमनुस्मरेद्यः॥ सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात्॥९॥ कविं क्रांतदर्शिनं सर्वज्ञं पु
राणं चिरंतनं। अनुशासितारं सर्वस्य जगतः प्रशासितारं। अणोः सूक्ष्मादप्यणीयांसं सूक्ष्मतरमनुस्मरेत्। अनुचिंतयेद्यः कश्चित्सर्वस्य
कर्मफलजातस्य धातारं विधातारं विचित्रतया प्राणिभ्यो विभक्तारं। अचिंत्यरूपं नास्य रूपं विद्यमानमपि केनचिच्चिंतयितुं शक्यतेऽस्त्यचिं
त्यरूपस्तं। आदित्यवर्णं आदित्यस्येव नित्यचैतन्यप्रकाशो वर्णो यस्य तमादित्यवर्णं तमसः परस्तात् अज्ञानलक्षणान्मोहांधकारात्पर
स्तात्परं तमनुचिंतयन् यातीति पूर्वेण संबंधः॥९॥ किंच॥ प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव॥ भ्रुवोर्मध्ये प्राणमावे
श्य सम्यक् स तं परं पुरुषमुपैति दिव्यं॥१०॥ प्रयाणकाले मरणकाले मनसाचलेन चलनवर्जितेन भक्त्या युक्तो भजनं भक्तिस्तया युक्तो यो
गबलेन चैव योगस्य बलं समाधिजसंस्कारजनितं चित्तस्थैर्यलक्षणं योगबलं तेन युक्त इत्यर्थः। पूर्वं हृदयपुंडरीके वशीकृत्य चित्तं
तत ऊर्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोर्मध्ये प्राणमावेश्य स्थापयित्वा सम्यगप्रमत्तः सन्। एवंविद्वान् योगी कविं पुराणमि
त्यादिलक्षणं तं परं पुरुषमुपैति प्रतिपद्यते। दिव्यं द्योतनात्मकं॥१०॥ पुनरपि वक्ष्यमाणेनोपायेन प्रतिपित्सितस्य ब्रह्मणो वेदविद्वदनादिवि
शेषणविशेष्यस्याभिधानं करोति भगवान्॥ ॥यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः॥ यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं
संग्रहेण प्रवक्ष्ये॥११॥ यदक्षरं न क्षरतीत्यविनाशि वेदविदो वेदार्थज्ञाः वदंति॥ तद्वा एतदक्षरं गार्गि ब्राह्मणा अभिवदंतीति श्रुतेः॥

हिरण्यगर्भः४ यो॰२ गीताशास्त्रे१ मरणांतं२

सर्वविशेषनिवर्तकत्वेनाभिवदंत्यस्थूलमनण्वित्यादिना ॥ किंच ॥ विशंति सम्यग्दर्शनप्राप्तौ यद्यतयो यतनशीलाः संन्यासिनो वीतरागा वी-
तो गतो रागो येभ्यस्ते वीतरागाः । यच्चाक्षरमिच्छंतो ज्ञातुमिति वाक्यशेषः । ब्रह्मचर्यं गुरौ चरंति तत्पदं तदक्षराख्यं पदनीयं संग्रहेण संग्रहः
संक्षेपस्तेन ते तव प्रवक्ष्ये कथयिष्यामि स भो हवै तद्भगवन्मनुष्येषु प्रायणांतमोंकारमभिध्यायीत कतमं वाव स तेन लोकं जयति । एत-
द्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्मात् पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेत्यादिनो वचनेनो-
न्यत्र धर्मादित्युपक्रम्य सर्वे वेदा यत्पदमामनंति । तपांसि सर्वाणि च यद्वदंति । यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण ब्रवीम्योमि-
त्येतदक्षरमित्यादिभिश्च वचनैः परस्य ब्रह्मणो वाचकरूपेण प्रतिमावत्प्रतीकरूपेण वा परब्रह्मप्रतिपत्तिसाधनत्वेन मंदमध्यमबुद्धीनां वि-
वक्षितस्योंकारस्योपासनं कालांतरमुक्तिफलमुक्तं यत्तदेवेहापि कविं पुराणमनुशासितारं यदक्षरं वेदविदो वदंतीति चोपन्यस्तस्य
परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्योंकारस्य कालांतरमुक्तिफलमुपासनं योगधारणासहितं वक्तव्यं ॥ प्रसक्तानुप्रसक्तं च
यच्च किंचिदित्येवमर्थमुत्तरो ग्रंथ आरभ्यते ॥ ॥ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ॥ मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणां
॥१२॥ सर्वद्वाराणि सर्वाणि च तानि द्वाराणि चोपलब्धौ तानि सर्वाणि संयम्य संयमनं कृत्वा मनो हृदयपुंडरीके निरुध्य निरोधं कृ-
त्वा निःप्रचारमापाद्य तत्र वशीकृतेन मनसा हृदयादूर्ध्वमारुह्य मूर्ध्न्याधायात्मनः प्राणमास्थितः प्रवृत्तो योगधारणां धारयितुं तत्रै-
वं धारयन् ॥१२॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥ यः प्रयाति त्यजन्देहं स याति परमां गतिं ॥१३॥ ओमित्येकाक्षरं ब्रह्म व्या-

हे४

मंदबुद्धीनामोंकारस्योपासनं वाचकरूपेण मध्यमबुद्धीनां प्रतीकरूपेणोपासनं प्रोक्तमहः

ब्रह्मेत्युपासनं प्रतीकोपासनमहः

च

हरन् मामनुस्मरन् ब्रह्मणोऽभिधानभूतं ओंकारं व्याहरन् उच्चारयन् तदर्थभूतं मामीश्वरं अनुस्मरन् अनुचिंतयन् यः प्र
याति म्रियते संत्यजयन् परित्यजन् देहं शरीरं देहमिति प्रयाणविशेषणार्थं देहत्यागेन प्रयाणमात्मनो न स्वरूपनाशेनेत्यर्थः ॥
स एवं प्रयात्यधिगच्छति परमां प्रकृष्टां गतिं ॥१३॥ किं च अनन्यचेताः सततं यो मां स्मरति नित्यशः ॥ तस्याहं सुलभः पार्थ नित्ययुक्त
स्य योगिनः ॥१४॥ अनन्यचेताः नान्यविषये चेतो यस्य सोऽयमनन्यचेताः योगी सततं सर्वदा यो मां परमेश्वरं स्मरति नित्यशः सत
तमिति नैरंतर्यमुच्यते नित्यश इति दीर्घकालत्वमुच्यते न षण्मासं संवत्सरं वा किं तर्हि यावज्जीवं नैरंतर्येण यो मां स्मरतीत्यर्थः ॥
तस्य योगिनोऽहं सुलभः सुखेन लभ्यः हे पार्थ नित्ययुक्तस्य सदा समाहितचित्तस्य योगिनः यत एवमतोऽनन्यचेताः सन् मयि सदा स
माहितो भवेत् ॥१४॥ तव सौलभ्येन किं स्यादित्युच्यते शृणु तन्मम सौलभ्येन यद्भवति ॥ ॥ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं ॥ न
नाप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥१५॥ मामीश्वरं उपेत्य मद्भावमापद्य पुनर्जन्म पुनरुत्पत्तिं नाप्नुवंति किं विशिष्टं जन्म न प्राप्नुवंती
त्याह दुःखालयं दुःखानामाध्यात्मिकादीनामालयमाश्रयमालीयंते यस्मिन् दुःखानीति दुःखालयं जन्म केवलं यान् अशाश्वतं अनवस्थित
स्वरूपं च नाप्नुवंतीदृशं पुनर्जन्म महात्मानो यतयः संसिद्धिं मोक्षाख्यां परमां प्रकृष्टां गताः प्राप्ताः ॥१५॥ ये पुनर्मां न प्राप्नुवंति ते पुनराव
र्त्तंते किं पुनस्त्वत्तोऽन्यप्राप्ताः पुनरावर्त्तंत इत्युच्यते ॥ ॥ आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन ॥ मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ॥१६॥
आब्रह्मभुवनाल्लोका इत्यत्र भवंत्यस्मिन् भूतानीति भुवनं ब्रह्मणो भुवनं ब्रह्मलोक इत्यर्थः ॥ आब्रह्मभुवनात् सह ब्रह्मभुवनेन लोकाः सर्वे पुनराव

र्त्तिनः पुनरावर्त्तिस्वभावाः हे अर्जुन मामेकमुपेत्य तु कौंतेय पुनर्जन्म पुनरुत्पत्तिर्न विद्यते ॥१६॥ ब्रह्मलोकसहिताः लोकाः कस्मात्पुनरावर्त्ति
नः कालपरिच्छिन्नत्वात्कथं ॥ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः ॥१७॥ सहस्रयुगपर्यंतं सहस्रयुगा
नि पर्यंतः पर्यवसानं यस्यान्हस्तदहः सहस्रयुगपर्यंतं ब्रह्मणः प्रजापतेर्विराजो विदुः ॥ रात्रिमपि युगसहस्रांतामहः परिमाणामेव केचिद्विदुरित्या
ह। तेऽहोरात्रविदः कालसंख्याविदो जना इत्यर्थः ॥१७॥ यत एवं कालपरिच्छिन्नास्ते ततः पुनरावर्त्तिनो लोकाः प्रजापतेरहानियद्भवति रात्रौ
च तदुच्यते ॥ ॥अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे ॥ रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥१८॥ अव्यक्तात् अव्यक्तं प्रजापतेः स्वापाव
स्था तस्मादव्यक्ताद्व्यक्तयो व्यज्यंत इति व्यक्तयः स्थावरजंगमलक्षणाः प्रजाः सर्वाः प्रभवंत्यभिव्यज्यंते। अन्हः आगमो हरागमस्तस्मिन्नहरागमे
काले ब्रह्मणः प्रबोधे। तथा रात्र्यागमे ब्रह्मणः स्वापकाले प्रलीयंते सर्वा व्यक्तयस्तत्रैव पूर्वोक्ते अव्यक्तसंज्ञके ॥१८॥ अकृताभ्यागमकृतवि
प्रणाशदोषपरिहारार्थं बंधमोक्षशास्त्रप्रवृत्तिसाफल्यप्रदर्शनार्थमविद्यादिक्लेशमूलकर्माशयवशाच्चावशो भूतग्रामो भूत्वा भूत्वा प्र
लीयत इत्यतः संसारे वैराग्यप्रदर्शनार्थं चेदमाह ॥ ॥भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ॥ रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे
॥१९॥ भूतग्रामः भूतसमुदायः स्थावरजंगमलक्षणो यः पूर्वस्मिन्कल्प आसीत्स एवायं नान्यो भूत्वा भूत्वा अहरागमे प्रलीयते पुनः पुनः रात्र्या
गमे अन्हः क्षये अवशो अस्वतंत्र एव पार्थ प्रभवति जायते अवशः स एवाहरागमे ॥१९॥ यदुपन्यस्तमक्षरं तत्प्राप्त्युपायो निर्दिष्टः ओमित्येकाक्षरं ब्र
ह्मेत्यादिना। अथेदानीमक्षरस्यैव स्वरूपनिर्दिदिक्षया इदमुच्यते। अनेन योगमार्गेणैव गंतव्यमिति ॥ ॥परस्तस्मात्तु भावोऽन्योऽव्यक्तो
ऽव्यक्तात्सनातनः ॥ यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥ परो व्यतिरिक्तो भिन्नः कुतस्तस्मात्पूर्वोक्तात्तु शब्दो व्यक्ताक्षर

स्य विवक्षितस्याव्यक्ताद्वैलक्षण्यविशेषणार्थः। भावोऽक्षराख्यं परं ब्रह्म ब्रह्मव्यतिरिक्तत्वे सत्यपि सालक्षण्यप्रसंगोऽस्तीति तद्विनिवृत्त्यर्थ-
माह अन्य इति। अन्यो विलक्षणः। स चाव्यक्तो नेन्द्रियगोचरः परस्तस्मादित्युक्तं कस्मात्पुनः परः अव्यक्तात्सर्वोक्तभूतग्रामबीजभूतादविद्या-
लक्षणादन्यो विलक्षण इत्यभिप्रायः। सनातनश्चिरंतनः। यः स भावः सर्वेषु ब्रह्मादिषु नश्यत्सु न विनश्यति॥२०॥ ॥अव्यक्तोऽक्षर इत्युक्त-
स्तमाहुः परमां गतिं॥ यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम॥२१॥ योऽसावव्यक्तोऽक्षर इत्युक्तस्तमेवाक्षरसंज्ञकमव्यक्तं भावमाहुः। परमां
प्रकृष्टां गतिं। यं भावं प्राप्य गत्वा न निवर्त्तन्ते संसाराय तद्धाम स्थानं परमं प्रकृष्टं मम विष्णोः परमं पदमित्यर्थः॥२१॥ तल्लब्धेरुपाय उच्यते
॥ ॥पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया॥ यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्॥२२॥ पुरुषः पुरिशयनात्स्वधात्मविषयत्व-
न्स्फूर्तित्वाद्वा पुरुषः स परः पार्थ परो निरतिशयो यस्मात्पुरुषान्न परं किंचित्स त्वनन्यया लभ्यस्तु ज्ञानलक्षणयानन्यया आत्मविषयया। यस्यान्त-
स्थानि मध्यस्थानि कार्यभूतानि कार्यं हि कारणस्यान्तर्वर्ति भवति। येन पुरुषेण सर्वमिदं जगत् ततं व्याप्तमाकाशेनेव घटाकाशादि। तुशब्दो-
ऽक्षरस्य विवक्षितस्याव्यक्ताद्वैलक्षण्यविशेषणार्थः॥२२॥ प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालान्तरमुक्तिभाजां ब्रह्मप्रतिप-
त्तये उत्तरो मार्गो वक्तव्य इति यत्र काल इत्यादि विवक्षितार्थसमर्पणार्थमुच्यते॥ आवृत्तिमार्गोपन्यास इतरस्तुत्यर्थः॥ ॥यत्र
च काले त्वनावृत्तिमावृत्तिं चैव योगिनः॥ प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ॥२३॥ यत्र काले प्रयाता इति व्यवहितेन संबंधः।
यत्र यस्मिन्काले तु अनावृत्तिमपुनर्जन्म आवृत्तिं तद्विपरीतां चैव योगिन इति योगिनः कर्मिणश्चोच्यंते। कर्मिणस्तु गुणतः कर्मयोगेन

योगिनामिति विशेषणान्न तु विज्ञायंते योगिनः। यत्र काले प्रयाता मृता योगिनोऽनावृत्तिं यांति। यत्र च काले प्रयाता आवृत्तिं तं कालं वक्ष्यामि
भरतर्षभ॥२३॥ ॥अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं॥ तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः॥२४॥ अग्निः कालाभिमानि
नी देवता। तथा ज्योतिर्देवतैव कालाभिमानिनी। अथवा अग्निर्ज्योतिषी यथाश्रुते एव देवते भूयसा तु निर्देशो यत्र काले तं कालमित्या
म्रवनवत् यथा। अहर्देवता अहरभिमानिनी। शुक्लः शुक्लपक्षो देवता। षण्मासा उत्तरायणं। तत्रापि देवतैव मार्गभूतेति स्थितोऽन्यत्र न्यायस्त
त्र तस्मिन्मार्गे प्रयाता मृता गच्छंति ब्रह्म ब्रह्मविदो ब्रह्मोपासनपरा जनाः क्रमेणेति वाक्यशेषः। न हि सद्यो मुक्तिभाजां सम्यग्दर्शननिष्ठा
नां गतिर्वा क्वचिदस्ति। न तस्य प्राणा उत्क्रामंतीति श्रुतेः। ब्रह्मसंलीनप्राणा एव ते ब्रह्ममया ब्रह्मभूता एव ते॥२४॥ ॥धूमो रात्रिस्त
था कृष्णः षण्मासा दक्षिणायनं॥ तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते॥२५॥ धूमो रात्रिर्धूमाभिमानिनी राज्याभिमानिनी च देवता। त
था कृष्णः कृष्णपक्षो देवता। षण्मासा दक्षिणायनं इति पूर्ववद्देवतैव। तत्र चंद्रमसि भवं चांद्रमसं ज्योतिः फलं इष्टादिकारिणो योगी कर्मी प्राप्य भु
क्त्वा तत्क्षयादिह निवर्त्तते॥२५॥ ॥शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते॥ एकया यात्यनावृत्तिमन्यया वर्त्तते पुनः॥२६॥ शुक्लकृष्णे
शुक्ला च कृष्णा च शुक्लाकृष्णे ज्ञानप्रकाशकत्वात् शुक्ला तदभावात्कृष्णा एते शुक्लकृष्णे हि गती। जगत इत्यधिकृतानां ज्ञानकर्मणोर्न जगतः
सर्वस्यैवैते गती संभवतः। शाश्वते नित्ये संसारस्य नित्यत्वादिति। मते अभिप्रेते। तत्रैकया शुक्लया यात्यनावृत्तिं। अन्यया इतरया वर्त्तते पुनर्भूयः
२६॥ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन॥ तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन॥२७॥ नैते यथोक्ते सृती मार्गौ पार्थ जानन् संसा

रायेण त्यामोक्षायेतेति जानन्योगीन मुह्यति कश्चन कश्चिदपि तस्मात्सर्वेषु कालेषु योगयुक्तः समाहितो भवार्जुन ॥२७॥ शृ-
णु योगस्य माहात्म्यं ॥ ॥वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं । अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपै-
ति चाद्यम् ॥२८॥ वेदेषु सम्यगधीतेषु यज्ञेषु च साद्गुण्येनानुष्ठितेषु तपःसु च सुतप्तेषु दानेषु सम्यग्दत्तेषु ज्ञानन्नेषु यदेतेषु पुण्य-
फलं प्रादिष्टं शास्त्रेण अत्येति प्रतीत्य गच्छति तत्सर्वं फलजातमिदं विदित्वा सप्तप्रश्ननिर्णयद्वारेणोक्तं सम्यगवधार्यानुष्ठाय योगी
परं प्रकृष्टमैश्वरं स्थानमुपैति प्रतिपद्यते । आद्यमादौ भवं कारणं ब्रह्मेत्यर्थः ॥२८॥ ॥ इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरम-
हंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ भगवद्गीताभाष्ये अक्षरब्रह्मयोगो नामाष्टमोऽध्यायः ॥८॥ ॥अष्टमे नाडीद्वारे-
ण धारणायोगः सगुण उक्तः तस्य च फलमग्न्यर्चिरादिक्रमेण कालान्तरे ब्रह्मप्राप्तिलक्षणमेवानावृत्तिरूपं निर्दिष्टं तत्रानेनैव
प्रकारेण मोक्षप्राप्तिफलमधिगम्यते नान्यथेति तदाशंकाव्यावृत्त्यर्थं ॥ श्रीभगवानुवाच ॥ ॥इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ॥
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१॥ इदं ब्रह्मज्ञानं वक्ष्यमाणमुक्तं च पूर्वेष्वध्यायेषु तद्बुद्धौ संनिधीकृत्येदमित्याह तु-
शब्दो विशेषनिर्धारणार्थः । इदमेव तु सम्यग्ज्ञानं साक्षान्मोक्षप्राप्तिसाधनं वासुदेवः सर्वमित्यात्मैवेदं सर्वमेकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतिस्मृति-
भ्यो नान्यत् अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्तीत्यादिश्रुतिभ्यश्च ते तुभ्यं गुह्यतमं गोप्यतमं प्रवक्ष्यामि । अनसूयवे असूयारहि-
ताय । किं तत् ज्ञानं किंविशिष्टं विज्ञानसहितं यज्ज्ञात्वा प्राप्य मोक्ष्यसेऽशुभात्संसारबंधनात् ॥१॥ तच्च ॥ ॥राजविद्या राजगुह्यं पवि-

टीं
गी॰ प्रो॰

त्रमिदमुत्तमं॥ प्रत्यक्षावगमं धर्म्यं सुसुखं कर्त्तुमव्ययं॥२॥ राजविद्या विद्यानां राजा दीप्त्यतिशयवत्त्वाद्दीप्यते ह्ययमतिशयेन। ब्रह्मविद्या स
र्वविद्यानां। राजगुह्यं तथा गुह्यानां राजा। पवित्रं पावनमिदमुत्तमं सर्वेषां पावनानां शुद्धिकारणं। इदं ब्रह्मविज्ञानमुत्कृष्टतममनेकजन्मसहस्र
संचितमपि धर्माधर्मादि समूलं कर्मक्षणमात्राद्भस्मीकरोति। अतः किं तस्य पावनत्वं वक्तव्यं। किंच॥ प्रत्यक्षावगमं प्रत्यक्षेण सुखादेरिवावग
मो यस्य तत्प्रत्यक्षावगमं। अनेकगुणवतोपि धर्मविरुद्धत्वं दृष्टं श्येनयागवन्न तथात्मज्ञानं धर्मविरोधि किं तु धर्म्यं धर्मादनपेतं। एवमपि स्य
दुःसंपाद्यमित्यत आह। सुसुखं कर्त्तुं यथा रत्नविवेकविज्ञानं तज्ज्ञाल्पायासानां कर्मणां सुखसंपाद्यानामल्पफलत्वं। दुःकराणां च महाफल
त्वं दृष्टमितीदं तु सुखसंपाद्यत्वात्फलक्षयात् द्व्येतीति प्राप्तमत आह॥ अव्ययं नास्य फलतः कर्मवद्व्ययोस्तीति अव्ययमतः अ
द्धेयमात्मज्ञानं॥२॥ ये पुनः॥ ॥अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप॥ अप्राप्य मां निवर्त्तंते मृत्युसंसारवर्त्मनि॥३॥ अश्रद्दधा अश्रद्धा
विरहिताः। आत्मज्ञानस्यास्य स्वरूपे तत्फले च नास्तिकाः पापकारिणोऽसुराणामुपनिषद्ं देहमात्रात्मदर्शनमेव प्रतिपन्ना असुतृपः पुरु
षाः। परंतप अप्राप्य मां परमेश्वरं मत्प्राप्तौ नैवाशंका मत्प्राप्तिमार्गसाधनभेदभक्तिमात्रमप्यप्राप्येत्यर्थः॥ निवर्त्तंते निश्चयेनावर्त्तंते क्व
मृत्युसंसारवर्त्मनि मृत्युयुक्तः संसारो मृत्युसंसारस्तस्य वर्त्म नरकतिर्यगादिप्राप्तिमार्गस्तस्मिन्नेव वर्त्तंत इत्यर्थः॥३॥ इति ज्ञानं स्तुत्वा प्रकृ
तमभिमुखीकृत्याह॥ ॥मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिना॥ मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥४॥ मया मम यः परो भाव
स्तेन ततं व्याप्तं सर्वमिदं जगदव्यक्तमूर्त्तिना न व्यक्ता मूर्त्तिः स्वस्वरूपं यस्य मम सोऽहमव्यक्तमूर्त्तिस्तेन मयाऽव्यक्तमूर्त्तिना कारणाऽजो
चरस्वरूपेणेत्यर्थः। तस्मिन्मय्यव्यक्तमूर्त्तौ स्थितानि मत्स्थानि सर्वभूतानि ब्रह्मादीनि स्तंबपर्यंतानि। न हि निरात्मकं किंचिद्भूतं व्यव

टीं
गी॰ प्रो॰

हाराय कल्प्यते। अतो मत्स्थानि मयात्मना स्थानि वरं तानि आत्मत्वेनैवास्थितानि अतो मयि स्थितानीत्युच्यते तेषां भूतानामहमात्मेत्यत
स्तेषु स्थित इति मूढबुद्धीनामवभासते अतो ब्रवीमि न चाहं तेषु भूतेष्ववस्थितो मूर्तवत्संश्लेषाभावेनाकाशस्याप्यन्तरतरो ह्यहं न ह्य
संसर्गि वस्तु क्वचिदाधेयभावेनावस्थितं भवत्यत एवासंसर्गित्वान्मम॥ ॥न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं॥ भूतभृन्न च भूतस्थो ममा
त्मा भूतभावनः॥५॥ न च मत्स्थानि भूतानि ब्रह्मादीनि। पश्य मे योगं युक्तिं घटनां मे मम ऐश्वरं ईश्वरस्येदं ऐश्वरं योगं आत्मनो याथात्म्यमि
त्यर्थः। तथा च श्रुतिरसंसर्गित्वादसंगतां दर्शयति। असंगो न हि सज्जत इतीदं चाश्चर्यमन्यत्पश्य भूतभृदसंगोपि सन्भूतानि बिभर्ति। न च
भूतस्थो यथोक्तेन न्यायेन दर्शितत्वात् भूतस्थत्वानुपपत्तेः। कथं पुनरुच्यते असौ ममात्मेति। विभज्य देहादिसंघातं तस्मिन्नहंकारमध्या
रोप्य लोकबुद्धिमनुसरन्व्यपदिशति ममात्मेति। न पुनरात्मन आत्मान्य इति लोकवदजानन्। तथा भूतभावनो भूतानि भावयत्युत्प
दयतीति भूतभावनः॥५॥ यथोक्तेन श्लोकद्वयेनोक्तमर्थं दृष्टान्तेनोपपादयन्नाह॥ ॥यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्॥
तथा सर्वाणि भूतानि मत्स्थानीत्यु[पधारय]॥६॥ यथा लोके आकाशे स्थितो नित्यं सदा वायुः सर्वत्र गच्छतीति सर्वत्रगः महान्परिमा
णतस्तथाकाशवत्सर्वगते मय्यसंश्लेषेणैव स्थितानीत्येवमुपधारय जानीहि॥६॥ एवं वायुराकाश इव मयि स्थितानि भूतानि स्थितिकाले ता
नि॥ ॥सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकां॥ कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं॥७॥ सर्वभूतानि कौन्तेय प्रकृतिं त्रिगुणात्मि
कां अपरां यान्ति। मामिकां मदीयां कल्पक्षये ब्रह्मप्रलयकाले पुनर्भूयस्तानि उत्पत्तिकाले कल्पादौ विसृजाम्युत्पादयाम्यहं॥७॥ पूर्ववदेव
मविद्यालक्षणां॥ ॥प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः॥ भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥८॥ प्रकृतिं स्वामवष्टभ्य वश

६१
गी॰ग्रं॰

मि पुनः पुनः प्रकृतितो जातं भूतग्रामं भूतसमुदायमिमं वर्त्तमानं कृत्स्नं समस्तं अवशमस्वतंत्रमविद्यादिदोषैः परवशीकृतं प्रकृतेर्वशात्
स्वभाववशात् ॥८॥ तर्हि तस्यैवं परमेश्वरस्य भूतग्रामं विषमं विदधतः तन्निमित्ताभ्यां धर्माधर्माभ्यां संबंधः स्यादित्यत आह भगवान् ॥ ॥
न च मां तानि कर्माणि निबध्नंति धनंजय ॥ उदासीनवदासीनमसक्तं तेषु कर्मसु ॥९॥ न च मामीश्वरं भूतग्रामस्य विषमविसर्गनिमित्ता
नि कर्माणि निबध्नंति धनंजय। तत्र कर्मणामसंबंधे कारणमाह। उदासीनवदिति। यथा उदासीन उपेक्षकः कश्चित्तद्वदासीनमात्मनोऽवि
क्रियत्वमसक्तं फलासंगरहितमभिमानवर्जितमहं करोमीति तेषु कर्मसु अतोऽन्यस्यापि कर्तृत्वाभिमानाभावः फलासंगाभावश्चाबंधका
रणमन्यथा कर्मभिर्बध्यते मूढः कोशकारवदित्यभिप्रायः ॥९॥ तत्र भूतग्राममिमं विसृजाम्युदासीनमिति च विरुद्धमुच्यते इति तत्प
रिहारार्थमाह ॥ ॥मयाध्यक्षेण प्रकृतिः सूयते सचराचरं ॥ हेतुनानेन कौंतेय जगद्विपरिवर्त्तते ॥१०॥ मया सर्वतो दृशिमात्रस्वरूपे
णाविक्रियात्मनाध्यक्षेण मम माया त्रिगुणात्मिकाविद्यालक्षणा प्रकृतिः सूयते उत्पादयति सचराचरं जगत्। तथा च मंत्रवर्णः। एको देवः
सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति। हेतुना निमित्तेनानेनाध्यक्षत्वेन
कौंतेय जगत्सचराचरं व्यक्ताव्यक्तात्मकं विपरिवर्त्तते सर्वावस्थासु दृशिकर्मत्वोपपत्तिनिमित्ता हि जगतः सर्वा प्रवृत्तिरहमिदं भोक्ष्ये पश्यामीदं शृणो
मीदं सुखं दुःखमनुभवामि तदर्थमिदं करिष्ये इदं ज्ञास्यामीत्याद्यवगति निष्ठावसानैव। योऽस्याध्यक्षः परमे व्योमन्नित्यादयश्च मंत्रवर्णा
एवमर्थं दर्शयंति। ततश्चैकस्य देवस्य सर्वाध्यक्षभूतचैतन्यमात्रस्य परमार्थतः सर्वभोगानभिसंबंधिनोऽन्यस्य चेतनांतरस्याभावे भोक्तु

परस्याध्यक्षमात्रेण जगज्जन्मेत्यत्र प्रमाणमाह योस्येति २

कार्यकारतमकं २

तृतीया सप्तम्यर्थे मया चैतन्यरूपेण सति धानेन प्रकृतेणादुत्पादयतीत्यभिप्रायः ७

सोनमात्र ७

कथं तर्हि स च्छिरित्याशंक्याह तज्जाड्यीं तस्यां हृदि शितं चैत्ति न संचितमात्रेणसृज्यते स्थिते फलितमाह ततस्त्रेति किं निमित्तापरस्ये ॥ यं सच्छिन्नतावद्भोगार्थोपरस्य परमार्थ
धित्वात्तस्य सर्वसाक्षित्वात् चैतन्यमात्रत्वान्नान्योस्ति कर्त्ता चेतनो तरानावादीश्वरस्येकत्वादचेतनस्य भोक्तृत्वा
स्वकर्मार्थं तद्दूरोधित्वान्नैवं प्रश्नो वातदनुरूपं प्रतिवचनं वा युक्तं माया निर्वचने सर्गे तस्याः नवकाशादि
रन्यस्याभावात् किं निमित्तेयं सच्छिरित्यप्रश्नप्रतिवचने न्नुपपन्नैवेन्नो ॥ को अद्धा वेद क इह प्रावोचत् कुत आयाता कुतः इयं विसृष्टिः सच्छिरित्यादि श्रं
भगवत्तार ॥ श्रुतेर्व्यो दर्शितं च भगवता ज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतव इति ॥ १० ॥ एवं भूतं तत्यभुं द्रुमस्त्तास्वभावं सर्वेस्सर्वज्ञं तन्नात्मा नु
पि संतं ॥ ॥ अवजानंति मां मूढा मानुषीं तनुमाश्रितं ॥ परं भावमजानंतो मम भूतमहेश्वरं ॥ ११ ॥ अवजानंति अवज्ञां परिभवं कुर्वं
ति ॥ मां मूढाः अविवेकिनो मानुषीं मनुष्यत्वं बधिनीं तनुं देहमाश्रितं मनुष्यदेहेन व्यवहरंतमित्येतत्परं प्रकृष्टं भावं परमात्म
त्वमाकाशकल्पमाकाशादप्यंतरतमं अजानंतो मम भूतमहेश्वरं सर्वभूतानां महांतमीश्वरं स्वमात्मानं ॥ ११ ॥ ततश्च मम भावज्ञान
भावेन हतावराकास्ते कष्टं ॥ ॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ॥ राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥ मोघा अ
शा मोघा वृथा आशिषो येषां ते मोघाशाः । तथा मोघकर्माणो यानि चाग्निहोत्रादीनि तैरनुष्ठीयमानानि कर्माणि तानि च तेषां भगवत्प
रिभवात्स्वात्मभूतस्यावज्ञानात् मोघान्येव निष्फलानि कर्माणि भवंति । मोघकर्माणस्तथा मोघज्ञाना निष्फलज्ञाना ज्ञानमपि
तेषां निःफलं स्यात् ॥ विचेतसो विगतविवेकाश्च ते भवंतीत्यभिप्रायः ॥ किं च ते भवंति राक्षसीं रक्षसां प्रकृतिं स्वभावं आसुरीं असुराणां च प्र
कृतिं मोहिनीं मोहनकरीं देहात्माभिमानरूपां श्रिता आश्रिताः छिंधि भिंधि पिव खाद परस्वमपहर इत्येवं वदनशीलाः क्रूरकर्म कुर्वा प
णा भवंतीत्यर्थः ॥ असुर्या नाम ते लोका इति श्रुतेः ॥ १२ ॥ ये पुनः श्रद्धाना भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ताः ॥ ॥ महात्मानस्तु मां पा
र्थ दैवीं प्रकृतिमाश्रिताः ॥ भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं ॥ १३ ॥ महात्मानस्त्वक्षुद्रचित्ता मामीश्वरं हे पार्थ दैवीं देवानां प्र

तोमोगास्ते व
त्यानचसक्ति
त्यर्थः १

र्येति शमदमदयाश्रद्धादिलक्षणामाश्रिताः सन्तो भजंति सेवंते। अनन्यमनसो। अनन्यचित्ताः। ज्ञात्वा भूतादिं भूतानां वियदादीनां प्राणिनां आदि
कारणं अव्ययं अव्ययं॥१३॥ कथं॥ ॥सततं कीर्त्तयंतो मां यतंतश्च दृढव्रताः॥ नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते॥१४॥ सततं सर्वदा भगवं
तं ब्रह्मस्वरूपं मां कीर्त्तयंतो यतंतश्चेंद्रियोपसंहारशमदमदयाऽहिंसादिधर्मे दृढव्रताः। दृढं स्थिरं अचाल्यं व्रतं येषां ते दृढव्रताः। नमस्यंतश्च मां
हृदयेशयं आत्मानं भक्त्या नित्ययुक्ताः सन्त उपासते सेवंते। केन केन प्रकारेणोपासते इत्युच्यते॥ ॥ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते॥
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखं॥१५॥ ज्ञानयज्ञेन ज्ञानमेव भगवद्विषयं यज्ञस्तेन ज्ञानयज्ञेन यजंतः पूजयंतो मां ईश्वरं चाप्यन्ये अ
न्ये मामुपासते। परित्यज्य उपासते। तत्र ज्ञानमेकत्वेनैकमेव परं ब्रह्मेति परमार्थदर्शनेन यजंत उपासते। केचिच्च पृथक्त्वेन आदित्यचंद्रा
दिभेदेन स एव भगवान्विष्णुरादित्यादिस्वरूपेणावस्थित इति उपासते॥ केचिद्बहुधावस्थितः स एव भगवान्सर्वतोमुखो विश्वरूप इति
विश्वरूपं सर्वतोमुखं बहुधा बहुप्रकारेणोपासते॥१५॥ यदि बहुभिः प्रकारैरुपासते कथं त्वामेवोपासत इत्यत आह। अहं क्रतुरहं यज्ञः स्वधा
हमहमौषधं॥ मंत्रोहमहमेवाज्यमहमग्निरहं हुतम्॥१६॥ अहं क्रतुः श्रौतकर्मभेदोहमेव। अहं यज्ञः स्मार्त्तकर्म। किंच स्वधान्नमहं पितृभ्यो या
दीयते अहमौषधं सर्वप्राणिभिर्यदद्यते तदौषधशब्दवाच्यं अथवा स्वधेति साधारणमन्नमौषधमिति व्याध्युपशमार्थं भेषजं। मंत्रोहं येन
न पितृभ्यो देवताभ्यश्च हविर्दीयते॥ अहमेवाज्यं हविः॥ अहमग्निर्यस्मिन्हूयते सोग्निरहं॥ अहं हुतं हवनकर्म च॥१६॥ किंच॥ ॥पिताहम
स्य जगतो माता धाता पितामहः॥ वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च॥१७॥ ॥पिता जनयिता। अहमस्य जगतो माता जनयित्री। धा

तो कर्मफलस्य प्रापयिता वा विधाता॥ पितामहः पितुः पिता॥ वेद्यं वेदितव्यं॥ पवित्रं पावनं ओंकारः॥ ऋक् साम यजुरेव च॥१७॥ किं च॥ गतिर्भर्ता
प्रभुः साक्षी निवासः शरणं सुहृत्॥ प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं॥१८॥ ॥गतिः कर्मफलं॥ भर्ता पोष्टा॥ प्रभुः स्वामी॥ साक्षी प्रा
णिनां कृताकृतस्य॥ निवासो यस्मिन् प्राणिनो निवसंति॥ शरणमार्त्तानां मत्प्रपन्नानामार्त्तिहरः॥ सुहृदुपकारनिरपेक्षः सन्नुपकारी॥
प्रभवः उत्पत्तिर्जगतः॥ प्रलयः प्रलीयतेऽस्मिन्निति विनाशमिति॥ स्थानं तिष्ठत्यस्मिन्निति॥ निधानं निक्षेपः कालांतरोपभोग्यं प्राणिनां॥ बीजं प्र
रोहकारणं प्ररोहधर्मिणां॥ अव्ययं यावत्संसारभावित्वादव्ययं न ह्यबीजं किंचित्प्ररोहति नित्यं च प्ररोहदर्शनाद्बीजसंततिर्न व्येतीत्यवग
म्यते॥१८॥ किं च॥ ॥तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च॥ अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन॥१९॥ तपाम्यहमादित्यो भूत्वा कैश्चि
द्रश्मिभि[illegible] तपामि अहं वर्षं कैश्चिद्रश्मिभिः उत्सृजामि उत्सृज्य पुनर्नि
गृह्णामि कैश्चिद्रश्मिभिरष्टभिर्मासैः पुनरुत्सृजामि प्रावृषि॥ अमृतं चैव देवानां मृत्युश्च मर्त्यानां सत् यत्संबंधितया विद्यमानं तद्विपरीतमस
च्चाहमर्जुन॥ न पुनरत्यंतमेवासद्भगवान्कार्यकारणे वा सदसती॥१९॥ ये पुनरेवं निर्वृत्तिप्रकारैरेकत्वपृथक्त्वादिविज्ञानैर्यज्ञैर्मां पूजयंतः
उपासते ज्ञानविदस्ते यथाविज्ञानं मामेव प्राप्नुवंति ये पुनरज्ञाः कामकामाः॥ ॥त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते॥ ते
पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान्दिवि देवभोगान्॥२०॥ त्रैविद्याः [illegible]ऋग्यजुःसामविदः याज्ञिकाः मां वस्वादिदेवरूपिणं सोमपाः
सोमं पिबंतीति तेनैव सोमपानेन पूताः अपमृष्टकिल्बिषाः॥ यज्ञैरग्निष्टोमादिभिरिष्ट्वा पूजयित्वा स्वर्गतिं स्वर्गगमनं स्वर्गं प्रति गतिर्वान्या

अन्यवादि
तं निरस्यति
तपुनरिति
४

यस्य कारणस्य संबंधित्वेन यत्कार्यमभिव्यज्यते तदिह सदित्युच्यते। कारणमेव कारणसंबंधेनानभिव्यक्तं नामरूपमसदिति व्यवह्रियते ५

नं देवं स्तूयं गीति स्तां प्रार्थयंते । ते च पुण्यं पुण्यफलं आसाद्य संप्राप्य सुरेंद्रलोकं शतक्रतोः स्थानं प्राश्नंति भुंजते । दिव्यान् दिवि भवान्
प्रकृतान् देवभोगान् देवानां भोगा देवभोगास्तान् ॥२०॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति । एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभंते ॥२१॥ ते तं भुक्त्वा स्वर्गलोकं विशालं विस्तीर्णं क्षीणे पुण्ये मर्त्यलोकमिमं विशंत्याविशंति । एवं यथोक्तेन प्रकारेण
त्रयीधर्मं केवलं वैदिकं कर्मानुप्रपन्ना गतागतं गतं चागतं च गमनागमनं कामकामाः कामान् कामयंत इति कामकामा लभंते गतागत
मेव न तु स्वातंत्र्यं क्वचिल्लभंत इत्यर्थः ॥२१॥ ॥ ये पुनर्निःकामाः सम्यग्दर्शिनः । अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभि
युक्तानां योगक्षेमं वहाम्यहं ॥२२॥ ॥ अनन्या अपृथग्भूताः परं देवं नारायणं आत्मत्वेन गताः संतश्चिंतयंतो मां ये जनाः संन्यासिनः पर्यु
पासते । तेषां परमार्थदर्शिनां नित्याभियुक्तानां सततताभियोगिनां योगक्षेमं । योगमप्राप्तस्य प्रापणं । क्षेमस्तद्रक्षणं । तदुभयं वहामि प्रापया
म्यहं । ज्ञानी त्वात्मैव मे मतं स च मम प्रियो यस्मात्तस्मात्ते ममात्मभूताः प्रियाश्चेति । नन्वन्येषामपि भक्तानां योगक्षेमं वहति । सत्यमेवं वहत्येव
किंत्वयं विशेषोऽन्ये ये भक्तास्ते आत्मार्थं स्वयमपि योगक्षेममीहंते । अनन्यदर्शिनस्तु नात्मार्थं योगक्षेममीहंते । नहि जीविते मरणे वा आत्म
नो गृद्धिं कुर्वंति केवलमेव भगवच्छरणास्ते अतो भगवानेव तेषां योगक्षेमं वहतीति ॥२२॥ नन्वन्या अपि देवतास्त्वमेव तद्भक्ताश्च त्वामेव यजं
ते सत्यमेवं ॥ ॥ येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः ॥ तेपि मामेव कौंतेय यजंत्यविधिपूर्वकम् ॥२३॥ येप्यन्यदेवताभक्ताः अन्यासु देव
तासु भक्ता अन्यदेवताभक्ताः संतो यजंते पूजयंति श्रद्धया आस्तिक्यबुद्ध्यान्विता अनुगतास्तेपि मामेव कौंतेय यजंत्यविधिपूर्वकमविधिरज्ञानं
तत्पूर्वकमज्ञानपूर्वकं यजंत इत्यर्थः ॥२३॥ कस्मात्ते अविधिपूर्वकं यजंत इत्युच्यते यस्मात् ॥ ॥ ॥ ॥ ॥ ॥

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते॥२४॥ अहं हि सर्वयज्ञानां श्रौतानां स्मार्तानां च सर्वेषां य
ज्ञानां देवतात्वेन भोक्ता च प्रभुरेव च मत्स्वामिको हि यज्ञोऽधियज्ञोऽहमेवात्रेति ... क्तं तथा न तु मामभिजानंति तत्त्वेन यथावदश्चा
विधिपूर्वकमिष्ट्वा यागफलात्‌ च्यवंति ते॥२४॥ ॥येप्यन्यदेवताभक्तास्तेनाविधिपूर्वकं यजंते तेषामपि यागफलमवश्यंभाविक
थं॥ ॥यांति देवव्रता देवान्पितॄन्यांति पितृव्रताः॥ भूतानि यांति भूतेज्या यांति मद्याजिनोऽपि मां॥२५॥ यांति गच्छंति देवव्रता देवेषु व्रतं नि
यमो भक्तिश्च येषां ते देवव्रता देवान्‌ यांति पितॄन्नग्निष्वात्तादीन्यांति पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः। भूतानि विनायकमा
तृगणचतुर्भगिन्यादीनि यांति भूतेज्या भूतानां पूजका यांति। मद्याजिनो मद्यजनशीला वैष्णवा मामेव॥ समानेप्यायासे मामेव न भ
जंते अज्ञास्तेन ते अल्पफलभाजो भवंतीत्यर्थः॥२५॥ न केवलं मद्भक्तानामनावृत्तिलक्षणमनंतफलं सुखाराधनश्चाहं कथं॥ ॥प
त्रं पुष्पं फलं तोयं ... यो मे भक्त्या प्रयच्छति॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥२६॥ पत्रं पुष्पं फलं तोयमुदकं यो मे मह्यं भक्त्या प्रय
च्छति तदहं पत्रादिभक्त्या उपहृतं भक्तिपूर्वकं प्रापितमश्नामि प्रयतात्मनः शुद्धबुद्धेः॥२६॥ यत एवमतः॥ ॥यत्करोषि यदश्नासि य
ज्जुहोषि ददासि यत्॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं॥२७॥ यत्करोषि यदाचरसि स्वतः प्राप्तं यदश्नासि यज्जुहोषि हवनं निर्वर्तय
से यस्मै तस्मान्नं वा। यद्ददासि प्रयच्छसि ब्राह्मणादिभ्यो हिरण्यादि। यत्तपस्यसि तपश्चरसि हे कौंतेय तत्कुरुष्व मदर्पणं॥२७॥ एवं कुर्वतस्त
व यद्भवति तच्छृणु॥ ॥शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः॥ संन्यास॰योगयुक्तात्मा विमुक्तो मामुपैष्यसि॥२८॥ शुभाशुभफलैरेवं शुभा

शुभेरष्टानिष्टफले येषां तानि शुभाशुभफलानि कर्माणि शुभाशुभफलैः कर्मबंधनैः स्तौ बबंधनानीति तैः कर्मबंधनैरेवं मत्समर्पणं कुर्वन् मोक्ष्यसे।सो
यं फं संन्यासयोगो नाम संन्यासश्चासौ मत्समर्पणात्तया कर्मत्वात्कर्मयोगश्चासाविति तेन संन्यासयोगेन युक्तश्चात्मांतःकरणं यस्य तावसंस्त्वं संनी
सयोगयुक्तात्मा नंनु गृह्णाति नैतैरानीतितन्नो।। सन्विमुक्तः कर्मबंधनैः जीवन्नेव पातिते शरीरे मामुपैष्यसि।।२८।। रागद्वेषवान्तर्हि भगवा
न्वियतोऽभक्तान्ननुगृह्णाति तेनेतरानिति तन्नो।। ।।समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।। ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं।।२९।। ।।
समः स्तुल्यः सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः। अग्निवत् अहं दूरस्थानां यथाग्निः शीतं नापनयति। समीपमुपसर्पतामपनय
ति। तथाहं भगक्तान्ननुगृह्णामि नेतरान्। ये भजंति तु मामीश्वरं भक्त्या मयि ते स्वभावत एव न मम रागनिमित्तेन वर्तंते तेषु चाप्यहं।स्वभा
वत एव वर्ते नेतरेषु न बातावता तेषु द्वेषो मम।।२९।। भक्तेर्महात्म्यं।। ।।अपि चेत्सुदुराचारो भजते मामनन्यभाक्।। साधुरेव
स मंतव्यः सम्यग्व्यवसितो हि सः।।३०।। अपि चेद्यद्यपि सुष्टु दुराचारः सुदुराचारोऽतीव कुत्सिताचारोऽपि भजते मामनन्यभक्तिः स
न् साधुरेव सम्यक्प्रवर्तन एव स मंतव्यो ज्ञातव्यः सम्यग्व्यवसितो हि यस्मात्साधुनिश्चयः सः।।३०।। उत्सृज्य च भवाहं दुराचा
रतां मतः सम्यग्व्यवसाय समर्पित।। ।।क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति।। कौंतेय प्रतिजानीहि न मे भक्तः प्रण ४
श्यति।।३१।। क्षिप्रं शीघ्रं भवति धर्मात्मा धर्मचित्त एव शश्वन्नित्यं शांतिं चोपशमं निगच्छति। प्रणपरमार्थं कौंतेय प्रतिजानीहि ति ४
श्चितां प्रतिज्ञां कुरु। न मे मम भक्तो मय्यर्पितांतरात्मा मद्भक्तो न प्रणश्यतीति।।३१।। किंच।। मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोन

यः ॥ स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यांति परां गतिं ॥ ३२ ॥ मां हि यस्मात्पार्थ व्यपाश्रित्य मामाश्रयत्वेन गृहीत्वा येऽपि स्युः भवेयुः पाप
योनयः पापा योनिर्येषां ते पापजन्मानः के ते इत्यत आह स्त्रियो वैश्याः शूद्रास्तेऽपि यांति गच्छंति परां प्रकृष्टां गतिं ॥ ३२ ॥ किं पुनर्ब्राह्मणाः पु
ण्या भक्ता राजर्षयस्तथा ॥ अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां ॥ ३३ ॥ किं पुनर्ब्राह्मणाः पुण्याः पुण्ययोनयो भक्ता राजर्षयस्त
था राजानश्च ते ऋषयश्च राजर्षयः । यत एवमतो । अनित्यं क्षणभंगुरं चासुखं च सुखवर्जितमिमं मनुष्यलोकं प्राप्य पुरुषार्थसा
धनं दुर्लभं मनुष्यत्वं लब्ध्वा भजस्व सेवस्व मां ॥ ३३ ॥ कथं ॥ ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि युक्त्वैवमा
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥ मन्मना मयि मनो यस्य तथा सत्वं मन्मना भव तथा मद्भक्तो भव । मद्याजी मद्यजन
शीलो भव । मामेव च नमस्कुरु मामेवैष्यसि आगमिष्यसि युक्त्वा समाधाय चित्तं । एवमात्मानं मामहं हि सर्वेषां भूतानामात्मा परा
गतिः परमयनं तं मामेवं भूतमेष्यसीत्यतीतेन पदेन संबंधः ॥ मत्परायणः सन्नित्यर्थः ॥ ३४ ॥ ॥ इति श्रीगोविंदभगवत्पूज्यपाद
शिष्यपरमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ भगवद्गीताभाष्ये राजविद्यायोगो नाम नवमोऽध्यायः ॥ ९ ॥ ॥ सप्तमेऽ
ध्या भगवतस्तत्त्वं विभूतयश्च प्रकाशिता नवमे च ॥ अथेदानीं येषु येषु भावेषु चिंत्यो भगवांस्ते ते भावा वक्तव्यास्तत्त्वं च भगवतो व
क्तव्यं उक्तमपि दुर्विज्ञेयत्वादित्यतो भगवानुवाच ॥ ॥ भूय एव महाबाहो शृणु मे परमं वचः ॥ यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितका
म्यया ॥ १ ॥ भूय एव महाबाहो शृणु मे मदीयं परमं प्रकृष्टं निरतिशयवस्तुनः प्रकाशकरं वचो यत्परमं ते तुभ्यं प्रीयमाणाय मद्वचनं

नोत्वाप्रीयसेत्वमतीवामृतमिवपिबंस्ततोवक्ष्याम्यहितकाम्ययाहितेच्छया॥१॥किमर्थमहंवक्ष्यामीत्यतआह॥ ॥नमेविदुःसुरग
णाःप्रभवंनमहर्षयः॥अहमादिर्हिदेवानांमहर्षीणांचसर्वशः॥२॥नमेविदुर्नजानंतिसुरगणाः।किंतन्नविदुः।ममप्र
भवंप्रभावंप्रभुशक्त्यतिशयंवाप्रभवमुत्पत्तिंवानमहर्षयोभृग्वादयोविदुः।कस्मात्तेनविदुरित्युच्यते।अहमादिःकारणंहियस्मा
त्देवानांमहर्षीणांचसर्वशःसर्वप्रकारैः॥२॥किंच॥ ॥योमामजमनादिंचवेत्तिलोकमहेश्वरं॥असंमूढःसमर्त्येषुसर्व
पापैःप्रमुच्यते॥३॥योमामजमनादिंचयस्मादहमादिर्हिदेवानांमहर्षीणांचनममान्यआदिर्विद्यतेअतोऽहमजोऽनादिश्चअ
नादित्वमजत्वेहेतुःसमामजमनादिंचयोवेत्तिविजानातिलोकमहेश्वरंलोकानांमहांतमीश्वरं।असंमूढःसंमोहवर्जितः
समर्त्येषुमनुष्येषुसर्वपापैःसर्वैःपापैःमतिपूर्वामतिपूर्वकृतैःप्रमुच्यतेप्रमोक्ष्यते॥३॥इतश्चाहंमहेश्वरोलोकानां
॥ ॥बुद्धिर्ज्ञानमसंमोहःक्षमासत्यंदमःशमः॥सुखंदुःखंभवोऽभावोभयंचाभयमेवच॥४॥बुद्धिरंतःकरणस्यसूक्ष्माद्यर्था
वबोधनसामर्थ्यंतद्वंतंबुद्धिमानितिहिवदंति॥ज्ञानमात्मादिपदार्थानामवबोधः।असंमोहःप्रत्युत्पन्नेषुबोद्धव्येषुविवेकपूर्वि
काप्रवृत्तिः।क्षमाआक्रुष्टस्यताडितस्यवाअविकृतचित्तता।सत्यंयथादृष्टस्ययथाश्रुतस्यचात्मानुभवस्यपरबुद्धिसंक्रांतयेत
थैवोच्चार्यमाणावाक्सत्यमुच्यते॥दमोबाह्येंद्रियोपशमः।शमोंऽतःकरणस्यशांतिः।सुखमाह्लादः।दुःखंतापः।भवउद्भवः।अ
भावस्तद्विपर्ययः।भयंत्रासः।अभयमेवचतद्विपरीतं॥४॥अहिंसासमतातुष्टिस्तपोदानंयशोऽयशः॥भवंतिभावाभूतानांमत्तएव

पृथग्विधाः॥५॥ अहिंसा प्राण्यपीडनं। समता चित्तसमता। तुष्टिः संतोषः पर्याप्तबुद्धिर्लाभेषु। तपः इंद्रियसंयमपूर्वकं शरीरपीड
नं। दानं यथाशक्ति संविभागः। यशो धर्मनिमित्ता कीर्त्तिः। अयशस्त्वधर्मनिमित्ताऽकीर्त्तिर्भवंति भावा यथोक्ता बुद्ध्यादयो भूतानां
प्राणिनां मत्त एवेश्वरात्। पृथग्विधा नानाविधाः स्वकर्मानुरूपेण॥५॥ किंच॥ ॥महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा॥ मद्भा
वा मानसा जाता येषां लोक इमाः प्रजाः॥६॥ महर्षयः सप्त भृग्वादयः पूर्वे अतीतकाले संबंधिनः चत्वारो मनवस्तथा सावर्णा इति प्र
सिद्धास्ते च मद्भावाः मद्गतभावना वैष्णवेन सामर्थ्येनोपेताः। मानसाः मनसैवोत्पादिता मया जाता उत्पन्नाः। येषां मनूनां महर्षीणां च
सृष्टिर्लोके इमाः स्थावरजंगमाः प्रजाः॥६॥ एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः॥ सोऽविकंपेन [illegible] योगेन युज्यते नात्र संशयः
॥७॥ एतां यथोक्तां विभूतिं विस्तारं योगं च युक्तिं चात्मनो घटनं अथवा योगैश्वर्यसामर्थ्यं सर्वज्ञत्वं च योगजं योग उच्यते। मम मदीयं यो वेत्ति
तत्त्वतस्तत्त्वेन यथावदित्येतत्। सोऽविकंपेनाप्रचलितेन योगेन सम्यग्दर्शनस्थैर्यलक्षणेन युज्यते संबध्यते नात्र संशयः। तस्मिन्नर्थे
संशयो नास्ति॥७॥ कीदृशेनाविकंपेन योगेन युज्यत इत्युच्यते॥ ॥अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते॥ इति मत्वा भजंते मां बुधा भा
वसमन्विताः॥८॥ अहं परं ब्रह्म वासुदेवाख्यं सर्वस्य जगतः प्रभव उत्पत्तिर्मत्त एव स्थितिनाशक्रियाफलोपभोगलक्षणं विक्रियारूपं
सर्वं जगत् प्रवर्त्तते इत्येवं मत्वा भजंते सेवंते मां बुधा अवगततत्त्वार्था भावसमन्विता भावो भावना परमार्थतत्त्वाभिनिवेशस्तेन सम

न्वितः संयुक्ताः इत्यर्थः॥८॥ किंच॥ ॥मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं॥ कथयंतश्च मां नित्यं तुष्यंति च रमंति च॥९॥ मच्चित्ताः मयि
चित्तं येषां ते मच्चित्ताः। मद्गतप्राणा मां गताः प्राप्ताः प्राणाश्चक्षुरादयो येषां ते मद्गतप्राणाः मय्युपसंहृतकरणा इत्यर्थः। अथवा मद्गतप्रा
णाः मद्गतजीवना इत्येतत् बोधयंतो ऽवगमयंतः परस्परमन्योन्यं कथयंतश्च ज्ञानबलवीर्यादिधर्मैर्विशिष्टं मां तुष्यंति च परितोषमु
पयांति रमंति च रतिं च प्राप्नुवंति प्रियसंगत्येव॥९॥ ये यथोक्तप्रकारैर्भजंते मां भक्ताः संतः॥ ॥तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं
॥ददामि बुद्धियोगं तं येन मामुपयांति ते॥१०॥ तेषां सततयुक्तानां नित्याभियुक्तानां भजतां सेवमानानां॥ किमर्थित्वादिना कारणेनेत्या
ह। प्रीतिपूर्वकं प्रीतिः स्नेहस्तत्पूर्वकं मां भजतामित्यर्थः ददामि प्रयच्छामि बुद्धियोगं बुद्धिः सम्यग्दर्शनं मत्तत्त्वविषयं तेन योगो बुद्धियो
गस्तं बुद्धियोगं येन बुद्धियोगेन सम्यग्दर्शनलक्षणेन मां परमेश्वरमात्मभूतमात्मत्वेनोपयांति प्रतिपद्यंते। के ते ये मच्चित्तत्वादिप्र
कारैः मां भजंते ते किमर्थं कस्य वा त्वत्प्राप्तिप्रतिबंधहेतोर्नाशकं बुद्धियोगं तेषां त्वद्भक्तानां ददासीत्यपेक्षायामाह॥ ॥तेषामे
वानुकंपार्थमहमज्ञानजं तमः॥ नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता॥११॥ तेषामेव कथं नाम श्रेयः स्यादित्यनुकंपार्थं द
याहेतोरहमज्ञानजमविवेकतो जातं मिथ्याप्रत्ययलक्षणं मोहांधकारं तमो नाशयाम्यात्मभावस्थ आत्मनो भावोंतःकरणाशयस्त
स्मिन्नेवावस्थितः सन् ज्ञानदीपेन विवेकप्रत्ययरूपेण भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेशवातेरितेन ब्रह्मचर्यादिसाधन
संस्कारवत्प्रज्ञावर्तिना विरक्तांतःकरणाधारेण विषयव्यावृत्तरागद्वेषाकलुषितचित्तनिवातापवरकस्थेन नित्यप्रवृत्तैकाग्र्याध्या

नजहाति तु सम्यग्दर्शनभास्वता ज्ञानदीपेनेत्यर्थः ॥११॥ एवं श्रुत्वा भगवतो विभूतिं योगं च श्रुत्वा ॥ अर्जुन उवाच ॥ ॥ परं ब्रह्म परं
धाम पवित्रं परमं भवान् ॥ पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥१२॥ परं ब्रह्माक्षरं निरंजनं परं धाम परं तेजः पवित्रं पावनं परमं प्र
कृष्टं भवान् पुरुषं शाश्वतं दिव्यं दिवि भवं आदिदेवं सर्वदेवानामादौ भवं देवं ॥ अजं विभुं विभवनशीलं ईदृशं ॥ ॥ आहु स्त्वामृष
यः सर्वे देवर्षिर्नारदस्तथा ॥ असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥१२॥ ॥ आहुस्त्वामृषयो वसिष्ठादयः सर्वे देवर्षिर्नारद
स्तथा असितो देवलोप्येवमेवाह व्यासः आ स्वयं चैवं त्वं ब्रवीषि मे ॥१३॥ सर्वमेतदृतं मन्ये यन्मां वदसि केशव ॥ न हि ते भगवन् व्यक्तिं विदुर्देवा
न दानवाः ॥१४॥ सर्वमेतद्यथोक्तमृषिभिस्त्वया च तदृतं सत्यमेव मन्ये यन्मां प्रतिवदसि वदिं षसे हे केशव न हि ते तव भगवन् व्यक्तिं प्रभावं
च विदुर्देवाः न दानवाः ॥१४॥ यतस्त्वं देवादीनामादिरतः ॥ ॥ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ॥ भूतभावन भूतेश देवदेव जगत्पते ॥
१५॥ स्वयमेवात्मनात्मानं वेत्थ त्वं जानासि निरतिशयज्ञानैश्वर्यबलादिशक्तिमंतमीश्वरं । हे पुरुषोत्तम भूतानि भावयतीति भूतभावन
भूतेश भूतानां ईशितः । हे देवदेव जगत्पते ॥१५॥ ॥ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ॥ याभिर्विभूतिभिर्लोकानि मांस्त्वं व्याप्य
तिष्ठसि ॥१६॥ वक्तुं कथयितुमर्हस्यशेषेण दिव्या आत्मविभूतयः आत्मनो विभूतयो यास्ता हि व क्तुमर्हसि । याभिर्विभूतिभिरात्ममा
हात्म्यविस्तरैरिमान् लोकांस्त्वं व्याप्य तिष्ठसि ॥१६॥ ॥
कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन् ॥ केषु केषु च भावेषु चिंत्योसि भगवन्मया ॥१७॥ कथं विद्यां विजानीयामहं यो

गिन्। त्वां सदा परिचिंतयन् केषु केषु च भावेषु वस्तुषु चिंत्यो ऽसि ध्येयो ऽसि भगवन्मया॥१७॥ विस्तरेणात्मनो योगं विभूतिं च जनार्दन॥ भू
यः कथय तृप्तिर्हि शृण्वतो नास्ति मे ऽमृतम्॥१८॥ विस्तरेणात्मनो योगं योगैश्वर्यशक्तिविशेषं। विभूतिं च विस्तरं ध्येयपदार्थानां। हे जनार्द
न। अर्दतेर्गतिकर्मणः रूपं असुराणां देवप्रतिपक्षभूतानां जनानां नरकादिगमयितृत्वात् जनार्दनः। अभ्युदयनिःश्रेयसपुरुषार्थप्रयो[illegible]जनत्वं सर्वै
र्जनैर्याच्यत इति वा। भूयः पूर्वमुक्तमपि कथय। तृप्तिर्हि परितोषो हि यस्मान्नास्ति मे शृण्वतस्त्वन्मुखनिःसृतवाक्यामृतं॥१८॥ श्रीभगवानु
वाच॥ ॥हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः। प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे॥१९॥ हंतेति हर्षे। हंतेदानीं ते तव दिव्या
दिविभवाः आत्मविभूतयः आत्मनो मम विभूतयो या यास्ताः कथयिष्यामीत्येतत्प्राधान्यतो यत्र यत्र प्रधाना या या विभूतिस्तां तां प्रधानां ×
प्राधान्यतः कथयिष्याम्यशेषतस्तु वर्षशतेनापि न शक्या वक्तुं। यतो नास्त्यंतो विस्तरस्य मे मम विभूतीनामित्यर्थः॥१९॥ तत्र प्रथमं मे
वतावधारणं॥ ॥अहमात्मा गुडाकेश सर्वभूताशयस्थितः। अहमादिश्च मध्यं च भूतानामंत एव च॥२०॥ अहमात्मा प्रत्यगात्मा। गु
डाकेश गुडाका निद्रा तस्याः ईशो जितनिद्र इत्यर्थः। घनकेश इति वा। सर्वेषां भूतानामाशयेंऽतर्हृदि स्थितोऽहमात्मा प्रत्यगात्मा नित्यं
ध्येयः स त्वदशक्तो नेतरेषु भावेषु चिंतयितुं शक्यः। यस्मादहमेवादिर्भूतानां कारणं मध्यं चास्थितरंतः प्रलयश्च एव च मद्ध्येयोहं॥२०॥ ॥
आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्॥ मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी॥२१॥ आदित्यानां द्वादशानां विष्णुर्नाम आदित्यो
ऽहं। ज्योतिषां रविः प्रकाशयितॄणां अंशुमान् रश्मिवान्। मरीचिर्नाम मरुतां मरुद्देवताभेदानामस्मि। नक्षत्राणामहं शशी॥२१॥

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ॥ इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥२२॥ वेदानां मध्ये सामवेदोऽस्मि देवानां
वासव इंद्रोऽस्मि । इंद्रियाणामेकादशानां मनश्चास्मि भूतानामस्मि चेतना कार्यकारणसंघाते नित्याभिव्यक्ता बुद्धिवृत्तिश्चेतना ॥२२॥ ॥
रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां ॥ वसूनां पावकश्चास्मि मेरुः शिखरिणामहं ॥२३॥ रुद्राणामेकादशानां शंकरश्चा
स्मि वित्तेशः कुवेरो यक्षरक्षसां यक्षाणां राक्षसानां च । वसूनामष्टानां पावकश्चास्म्यग्निः । मेरुः शिखरवतामहमस्मि ॥२३॥
पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिं ॥ सेनानीनामहं स्कंदः सरसामस्मि सागरः ॥२४॥ पुरोधसां राजपुरोहितानां मु
ख्यं प्रधानं मां विद्धि पार्थ बृहस्पतिं । सरसां सागरोऽस्मि भवामि ॥२४॥ ॥ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं ॥ यज्ञानां जपयज
ज्ञोऽस्मि स्थावराणां हिमालयः ॥२५॥ महर्षीणां भृगुरहं गिरां वाचां पदलक्षणानामेकमक्षरं ॐकारोऽस्मि ॥ यज्ञानां जपय
ज्ञोऽस्मि स्थावराणां स्थितिमतां हिमालयः ॥२५॥ ॥ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ॥ गंधर्वाणां चित्ररथः सिद्धानां क
पिलो मुनिः ॥२६॥ अश्वत्थः सर्ववृक्षाणां । देवर्षीणां च नारदः । देवा एव संतः ऋषित्वं प्राप्ताः मंत्रदर्शिनो देवर्षयस्तेषां नारदोऽस्मि ॥
गंधर्वाणां चित्ररथो नाम गंधर्वोऽस्मि ॥ सिद्धानां जन्मनैव धर्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्तानां कपिलो मुनिः ॥२६॥ ॥ उच्चैःश्रव
समश्वानां विद्धि माममृतोद्भवं ॥ ऐरावतं गजेंद्राणां नराणां च नराधिपं ॥२७॥ उच्चैःश्रवसमश्वानां उच्चैःश्रवा नामाश्वः तं मां विद्धि विजा
नीहि । अमृतोद्भवं । ऐरावतमिरावत्या अपत्यं गजेंद्राणां हस्तीश्वराणां विद्धीत्यनुवर्त्तते । नराणां मनुष्याणां च नराधिपं राजानं मां विद्धि

विद्धि॥२७॥ ॥आयुधानामहं वज्रं धेनूनामस्मि कामधुक्॥ प्रजनश्चास्मि कंदर्प्पः सर्प्पाणामस्मि वासुकिः॥२८॥ आयुधानामहं
वज्रं दधीच्यस्थिसंभवा। धेनूनां दोग्ध्रीणामस्मि कामधुक् वसिष्ठस्य सर्वकामानां दोग्ध्री। सामान्या वा कामधुक्। प्रजनः जनयिता
स्मि कंदर्प्पः कामः। सर्पाणां सर्पभेदानामस्मि वासुकिः सर्पराजः॥२८॥ ॥अनंतश्चास्मि नागानां वरुणो यादसामहं॥ पितॄणा
मर्यमा चास्मि यमः संयमतामहं॥२९॥ अनंतश्चास्मि नागानां नागभेदानां नागराजः। वरुणो यादसामब्देवतानां राजाहं। पितॄणाम
र्यमा नाम पितृराजश्चास्मि। यमः संयमतां संयमनं कुर्वतामहं॥२९॥ ॥प्रल्हादश्चास्मि दैत्यानां कालः कलयतामहं॥ मृगाणां च मृ
गेंद्रोहं वैनतेयश्च पक्षिणां॥३०॥ प्रल्हादो नाम चास्मि दैत्यानां दितिवंश्यानां। कालः कलयतां कलनं गणनं कुर्वतामहं। मृगाणां
च मृगेंद्रः सिंहो व्याघ्रो वाहं। वैनतेयश्च गरुत्मान् विनतासुतः पक्षिणां पतत्रिणां॥३०॥ ॥पवनः पवतामस्मि रामः शस्त्रभृतामहं
॥झषाणां मकरश्चास्मि स्रोतसामस्मि जान्हवी॥३१॥ पवनो वायुः पावयितॄणामस्मि रामः शस्त्राणां धारयितॄणां दाशरथी
रामोहं। झषाणां मत्स्यादीनां मकरो नाम जातिविशेषः। स्रोतसां स्रवंतीनामस्मि जान्हवी गंगा॥३१॥ ॥सर्गाणामादिरंतश्च मध्यं चै
वाहमर्जुन॥ अध्यात्मविद्या विद्यानां वादः प्रवदतामहं॥३२॥ सर्गाणां सृष्टीनामादिरंतश्च मध्यं चैवाहमुत्पत्तिस्थितिप्रलया अ
हमर्जुन। भूतानां जीवाधिष्ठितानामेवादिरंतश्चेत्युक्तमुपक्रमे इह तु सर्वस्यैव सर्गमात्रस्येति विशेषः। अध्यात्मविद्या विद्यानां

मो वादार्थत्वात्प्रधानोस्मि । वादो ऽर्थनिर्णयहेतुत्वात्प्रवदतां प्राधान्यतः सोहमस्मि । प्रवक्तृद्वारेण वदनभेदानामेव वादजल्पवितंडाना
मिह ग्रहणं प्रवदतामिति ॥ ॥ अक्षराणामकारोस्मि द्वंद्वः सामासिकस्य च । अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ ३३ ॥ अक्षरा
णामकारो वर्णः । द्वंद्वः समासोस्मि सामासिकस्य समाससमूहस्य । किंच अहमेवाक्षयो ऽक्षीणः कालः प्रसिद्धः क्षणाद्याख्यः । अथ
वा परमेश्वरः कालस्यापि कालोस्मि । धाताहं कर्मफलस्य विधाता सर्वस्य जगतो विश्वतोमुखः सर्वतोमुखः ॥ ३३ ॥ मृत्युः सर्वहरश्चा
हमुद्भवश्च भविष्यतां । कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥ मृत्युर्द्विविधो धनादिहरः प्राणहरश्च । यः प्रा
णहरः स सर्वहर उच्यते सोहमित्यर्थः । यद्वा परमेश्वरः प्रलये सर्वहरणात्सर्वहरः सोहं । उद्भवः उत्कर्षः अभ्युदयस्तत्प्राप्तिहेतु
श्चाहं केषां भविष्यतां भाविकल्याणानामुत्कर्षप्राप्तियोग्यानामित्यर्थः । कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमेत्येता उत्त
माः स्त्रीणां मध्ये ऽहमस्मि यासामाभासमात्रसंबंधेनापि लोकः कृतार्थमात्मानं मन्यते ॥ ३४ ॥ ॥ बृहत्साम तथा साम्नां गायत्री छंदसामहं ।
मासानां मार्गशीर्षोहमृतूनां कुसुमाकरः ॥ ३५ ॥ बृहत्साम तथा साम्नां मध्ये इंद्रप्रतिपादकसामवेदविशेषः प्रधानमस्मि । गायत्री
छंदसामहं गायत्र्यादिछंदोविशिष्टानामृचां गायत्र्यृगहमित्यर्थः । मासानां मार्गशीर्षोहं । ऋतूनां कुसुमाकरो वसंतः ॥ ३५ ॥ ॥
द्यूतं छलयतामस्मि तेजस्तेजस्विनामहं । जयोस्मि व्यवसायोस्मि सत्त्वं सत्त्ववतामहं ॥ ३६ ॥ ॥ द्यूतमक्षदेवनादिलक्षणं
छलयतां छलस्य कर्तृणामस्मि । तेजस्तेजस्विनामहं । जेतॄणां जयोस्मि । जेतॄणां व्यवसायोस्मि व्यवसायिनां । सत्त्वं सत्त्ववतां सात्त्विकानामहं ॥ ३६ ॥

वृष्णीनां वासुदेवोऽस्मि पांडवानां धनंजयः॥ मुनीनामप्यहं व्यासः कवीनामुशना कविः॥३७॥ वृष्णीनां वासुदेवोऽस्मि अयमेवाहं
त्वत्सखा। पांडवानां धनंजयस्त्वमेव। मुनीनां मननशीलानां सर्वपदार्थज्ञानां अहं व्यासः। कवीनां क्रांतदर्शिनां उशना कविरस्मि
॥३७॥ ॥दंडो दमयितामस्मि नीतिरस्मि जिगीषतां॥ मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं॥३८॥ ॥दंडो दमयितां दमयितॄणा
मस्मि। अदांतानां दमनकारणं नीतिरस्मि। जिगीषतां जेतुमिच्छतां। मौनं चैवास्मि गुह्यानां गोप्यानां। ज्ञानं ज्ञानवतामहं॥३८॥ ॥
यच्चापि सर्वभूतानां बीजं तदहमर्जुन॥ न तदस्ति विना यत्स्यान्मया भूतं चराचरं॥३९॥ यच्चापि सर्वभूतानां बीजं प्ररोहकारणं तद
हं। हे अर्जुन। प्रकरणोपसंहारार्थं विभूतिसंक्षेपमाह। न तदस्ति चरमचरं च मया विना यत्स्याद्भवेन्मया परित्यक्तं निरात्मकं श
न्यं तत्स्यात्॥ अतो मदात्मकं सर्वमित्यर्थः॥३९॥ ॥नांतोऽस्मि मम दिव्यानां विभूतीनां परंतप॥ एष तूद्देशतः प्रोक्तो विभूतेर्वि
स्तरो मया॥४०॥ नांतोऽस्मि मम दिव्यानां विभूतीनां विस्तराणां॥ परंतप। न हीश्वरस्य सर्वात्मनो दिव्यानां विभूतीनां इयत्ता शक्या वक्तुं
ज्ञातुं वा केनचित्। एष तूद्देशतः एकदेशेन प्रोक्तो विभूतेर्विस्तरो मया॥४०॥ ॥यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा॥ तत्तदेवा
वगच्छ त्वं मम तेजोंऽशसंभवं॥४१॥ यद्यल्लोके विभूतिमद्विभूतियुक्तं सत्त्वं वस्तु श्रीमदूर्जितमेव वा। श्रीर्लक्ष्मीस्तया सहितं॥
ऊर्जितमेव वा उत्साहोपेतं वा तत्तदेवावगच्छ त्वं जानीहि। मम ईश्वरस्य तेजोंऽशसंभवं तेजसोंऽश एकदेशः संभवो यस्य तत्तेजोंऽशसंभव
मित्यवगंतव्यं॥४१॥ ॥अथवा बहुनैतेन किं ज्ञातेन तवार्जुन॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥४२॥ ॥अथवा बहु

नाद्यतेनैवमादिना किं ज्ञातेन तवार्जुन स्यात् । अशेषेणाशेषतस्त्विममुच्यमानमर्थं शृणु ॥ विष्टभ्य विशेषतस्तंभनं दृढं कृत्वा ॥ इदं
कृत्स्नं जगदेकांशेनैकावयवेनैकपादेन सर्वस्वरूपेणेत्येतत् ॥ तथा च मंत्रवर्णः ॥ पादोस्य सर्वा भूतानीति । स्थित इति ॥ ४२ ॥ ॥
इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ गीताभाष्ये विभूतियोगो नाम दशमोऽध्या
यः ॥ १० ॥ ॥ भगवतो विभूतय उक्ताः तत्र च विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति भगवताभिहितं श्रुत्वा जगदात्मस्वरूपमाद्य
मैश्वरं तत्साक्षात्कर्तुमिच्छन् ॥ ॥ अर्जुन उवाच ॥ ॥ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं ॥ यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो म
म ॥ १ ॥ मदनुग्रहाय ममानुग्रहार्थं परमं निरतिशयं गुह्यं गोप्यं अध्यात्मसंज्ञितमात्मानात्मविवेकविषयं ज्ञानैश्वर्यशक्तिबलवीर्यतेजो
भिः संपन्नं वै स्वरूपविषयं च यत्त्वयोक्तं वचो वाक्यं तेन वचसा । मोहोऽयं विगतो मम अविवेकबुद्धिरपगता ममेत्यर्थः ॥ १ ॥ किं च ॥ ॥ भ
वाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ॥ त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं ॥ २ ॥ ॥ भवाप्ययावुत्पत्तिप्रलयौ भूतानां तौ
भवाप्ययौ श्रुतौ विस्तरशो मया न संक्षेपतस्त्वत्तस्त्वत्सकाशात् । कमलपत्राक्ष कमलस्य पत्रं कमलपत्रं तद्वदक्षिणी यस्य स त्वं कमलप
त्राक्षः । माहात्म्यं महात्मनो भावो माहात्म्यं अपि चाव्ययमक्षयं श्रुतमित्यनुवर्तते ॥ २ ॥ एवमेतद्यथात्थ त्वमात्मानं परमेश्वर । द्रष्टुमि
च्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥ एवमेतन्नान्यथा यथा येन प्रकारेणात्थ कथयसि त्वमात्मानं परमेश्वर ॥ तथापि द्रष्टुमिच्छामि ते त
व ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नमैश्वरं वैष्णवं रूपं । पुरुषोत्तम ॥ ३ ॥ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ॥ योगेश्व

७०
गी॰ भा॰

धीर नप्राकर्मितत्राणि ४

र ततो मे त्वं दर्शयात्मानमव्ययं॥४॥ मन्यसे चिंतयसि यदि मयाऽर्जुनेन शक्यं द्रष्टुमिति प्रभो स्वामिन् योगेश्वर योगिनो योगास्तेषामीश्व
रो योगेश्वरः। हे योगेश्वर। यस्मादहमतीवार्थीति द्रष्टुं ततस्तस्मान्मदर्थं दर्शय त्वमात्मानमव्ययम्॥४॥ एवं चोदितोऽर्जुनेन॥ श्रीभगवानुवाच॥
॥पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः॥ नानाविधानि दिव्यानि नानावर्णाकृतीनि च॥५॥ पश्य मे मम पार्थ रूपाणि शतशोऽथ सह
स्रशः। तानि च नानाविधान्यनेकप्रकाराणि दिविभवानि दिव्यान्यप्राकृतानि नानावर्णाकृतीनि च नानाविलक्षणानि नीलपीतादिप्र
का॰ रा वर्णास्तथाकारा तत्पश्चावयवसंस्थानविशेषा येषां रूपाणां तानि नानावर्णाकृतीनि चेति च॥५॥ पश्यादित्यान्वसून्रुद्रानश्वि
नौ मरुतस्तथा॥ बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत॥६॥ पश्यादित्यान्द्वादश वसूनष्टौ रुद्रानेकादश अश्विनौ द्वौ मरुतः सप्त
गणोपेतांस्तथा बहून्यन्यान्यदृष्टपूर्वाणि मनुष्यलोके त्वया त्वत्तोऽन्येन वा केनचित् पश्याश्चर्यरूपाणि अद्भुतानि हे भारत॥६॥ न के
वलमेतावदेव॥ ॥इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं॥ मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि॥७॥ इहैकस्थमेकस्मिन्स्थितं
जगत्कृत्स्नं समस्तं पश्य अद्येदानीं सचराचरं सह चरेणाचरेण वर्त्तमानं मम देहे गुडाकेश यच्चान्यज्जयपराजयादि यद्वा शंकसे यद्वा जयेम य
दि वा नो जयेयुरिति यदवोचस्तदपि द्रष्टुं यदीच्छसि॥७॥ किंच॥ ॥न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा॥ दिव्यं ददामि ते चक्षुः पश्य मे
योगमैश्वरं॥८॥ न तु मां शक्यसे न मां विश्वरूपधरं शक्यसे द्रष्टुं अनेन प्राकृतेन स्वचक्षुषा स्वकीयेन मांसचक्षुषा येन तु शक्य
से द्रष्टुं दिव्येन तद्दिव्यं ददामि ते तुभ्यं चक्षुस्तेन च पश्य मे मम योगमैश्व ईश्वरस्येदमैश्वरं योगं योगशक्त्यातिशयमित्यर्थः॥८॥

७०
गी॰ भा॰

संजयउवाच॥ ॥एवमुक्त्वाततोराजन्महायोगेश्वरोहरिः॥ दर्शयामासपार्थायपरमंरूपमैश्वरं॥९॥ ॥एवंयथोक्तेनप्र
कारेणोक्त्वाततोऽनंतरमेवाहेराजन्हेधृतराष्ट्रमहायोगेश्वरो।महांश्चासौयोगेश्वरश्चेतिमहायोगेश्वरः हरिर्नारायणोद
र्शयामासदर्शितवान्॥पार्थायपृथासुतायपरमंविश्वरूपमैश्वरं॥९॥ ॥अनेकवक्त्रनयनमनेकाद्भुतदर्शनं॥अनेकदि
व्याभरणंदिव्यानेकोद्यतायुधं॥१०॥ अनेकवक्त्रनयनंअनेकानिवक्त्राणिनयनानिचयस्मिन्रूपेतदनेकवक्त्रनयनंरूपं॥
अनेकाद्भुतदर्शनंअनेकानिअद्भुतानिविस्मापकानिदर्शितानियस्मिन्रूपेतदनेकाद्भुतदर्शनं।तथाअनेकदिव्याभरणमने
कानिदिव्यान्याभरणानियस्मिन्तदनेकदिव्याभरणं।तथादिव्यानेकोद्यतायुधंदिव्यानेकानिअस्त्रादीनिउद्यतानिआयुधा न्यद
नियस्मिन्तद्दिव्यानेकोद्यतायुधं(विथादिव्यानेकौ) दर्शयामासेतिपूर्वेणसंबंधः॥१०॥ ॥किंच॥ दिव्यमाल्यांबरधरंदिव्य
गंधानुलेपनं॥सर्वाश्चर्यमयंदेवमनंतंविश्वतोमुखं॥११॥ दिव्यमाल्यांबरधरंदिव्यानिमाल्यानिपुष्पाणिअंबराणिवस्त्राणिच
धृयंतेयेनईश्वरेणतंदिव्यमाल्यांबरधरं।दिव्यगंधानुलेपनंदिव्यगंधानुलेपनंयस्यतद्दिव्यगंधानुलेपनं।सर्वाश्चर्यमयंस
र्वाश्चर्यप्रायं।देवंअनंतंनास्यांतोस्तीत्यनंतस्तं।विश्वतोमुखंसर्वभूतात्मत्वात्तंसंदर्शयामासार्जुनोददर्शेतिवाऽध्याहृत्यहृयते॥११॥
यापुनर्भगवतोविश्वरूपस्यभास्यउपमासोच्यते॥दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता॥यदिभासदृशीसास्याद्भासस्तस्यमहा
त्मनः॥१२॥ ॥दिव्यंतरिक्षेतृतीयस्यांवादिविसूर्याणांसहस्रंसूर्यसहस्रंतस्ययुगपदुत्थितस्यपायुगपदुत्थिताभाः सायदिसदृशी

स्यात्तस्य महात्मनो। विश्वरूपस्य भासो यदि वा न स्यात्ततो विश्वरूपस्यैव भासः अतिरिच्यते इत्यभिप्रायः॥१२॥ किंच॥ ॥तत्रैकस्थं ज
गत्कृत्स्नं प्रविभक्तमनेकधा॥ अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा॥१३॥ तत्र तस्मिन्विश्वरूपे एकस्मिन् स्थितमेकस्थं जगत्कृ
त्स्नं प्रविभक्तमनेकधा देवपितृमनुष्यादिभेदैरपश्यत् दृष्टवान् देवदेवस्य हरेः शरीरे पाण्डवोऽर्जुनस्तदा॥१३॥ ततः स विस्मयावि
ष्टो हृष्टरोमा धनंजयः॥ प्रणम्य शिरसा देवं कृताञ्जलिरभाषत॥१४॥ ॥ततस्तं दृष्ट्वा विस्मयेनाविष्टो हृष्टरोमा हृष्टानि रोमा
णि यस्य सोऽयं हृष्टरोमा चासौ धनंजयः। प्रणम्य प्रकर्षेण नमनं कृत्वा प्रह्वीभूतः सन् शिरसा देवं विश्वरूपधरं कृताञ्जलिर्नम
स्कारार्थं संपुटीकृतहस्तः सन् अभाषत उक्तवान्॥१४॥ कथं यत्त्वया दर्शितं विश्वरूपं तदहं पश्यामीति स्वानुभवमाविष्कुर्वन्॥
॥अर्जुन उवाच॥ ॥पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान्॥ ब्रह्माणमीशं कमलासनस्थमृषींश्च स
र्वानुरगांश्च दिव्यान्॥१५॥ पश्यामि उपलभे तव देहे देव देवान्सर्वान्। तथा भूतविशेषसंघान् भूतविशेषाणां स्थावरजंग
मानां नानासंस्थानविशिष्टानां संघाः भूतविशेषसंघाः तान्। किंच। ब्रह्माणं चतुर्वक्त्रमीशितारं प्रजानां कमलासनस्थं पृथिवी
पद्ममध्ये मेरुकर्णिकासनस्थमित्यर्थः। ऋषींश्च वसिष्ठादीन् सर्वानुरगांश्च वासुकिप्रभृतीन् दिव्यान् दिविभवान्॥१५॥ अने
कबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपं॥ नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप॥१६॥ अनेकबाहूद
रवक्त्रनेत्रमनेकबाहवः उदराणि वक्त्राणि नेत्राणि च यस्य तव स त्वमनेकबाहूदरवक्त्रनेत्रः। तं त्वामनेकबाहूदरवक्त्रनेत्रं। पश्या

मि त्वां सर्वतः सर्वज अनंतरूपं अनंतानि रूपाणि अस्येत्यनंतरूपस्तमनंतरूपं ॥ नांतमतोऽवसानं । न तु मध्यं । मध्यं नाम द्वयोः कोर्म
ध्योरंतरं । न पुनस्तवादिं न च देवस्यांतं पश्यामि न च मध्यं पश्यामि पुनरादिं न पश्यामि । हे विश्वेश्वर हे विश्वरूप ॥१६॥ किरीटि
नं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमंतं ॥ पश्यामि त्वां दुर्निरीक्ष्यं समंताद्दीप्तानलार्कद्युतिमप्रमेयं ॥१७॥ ॥किरीटिनं कि
रीटं शिरोभूषणं विशेषः तद्यस्यास्ति स किरीटी तं । किरीटिनं । तथा गदिनं गदास्याविद्यत इति गदी तं गदिनं । चक्रिणं च चक्रमस्य
स्तीति चक्री तं चक्रिणं च । तेजोराशिं तेजःपुंजं । सर्वतो दीप्तिमंतं सर्वतो दीप्तिरस्यास्तीति सर्वतो दीप्तिमान् । तं सर्वतो दीप्तिमंतं प
श्यामि । त्वां दुर्निरीक्ष्यं दुःखेन निरीक्ष्यो दुर्निरीक्ष्यस्तं दुर्निरीक्ष्यं । समंतात्समंततः । दीप्तानलार्कद्युतिमंत । अनलश्चार्कश्चानला
र्कौ तयोर्दीप्तानलार्कयोः द्युतिरिव द्युतिस्तेजो यस्य तव स त्वं दीप्तानलार्कद्युतिस्तं त्वां दीप्तानलार्कद्युतिं । अप्रमेयं न प्रमेयमशक्यप
रिच्छेदमित्येतत् ॥१७॥ अत एव ते योगशक्तिदर्शनादनुमितो मे ॥ ॥त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानं ॥ त्वमव्य
यः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥१८॥ त्वमक्षरं न क्षरतीति । परमं ब्रह्म वेदितव्यं मुमुक्षुभिः । त्वमस्य विश्वस्य समस्त
स्य जगतः परं प्रकृष्टं निधानं निधीयतेऽस्मिन्निति निधानं परमाश्रय इत्यर्थः । किंच त्वमव्ययो न व्ययो विद्यत इत्यव्ययः । शाश्वतधर्मगो
प्ता शश्वद्भवो नित्यः शाश्वतो धर्मस्य सनातनश्चिरंतनस्त्वं पुरुषः परो मतो । अभिप्रेतो मे मम ॥१८॥ किंच ॥ ॥अनादिमध्यांतमनंतवीर्य
मनंतबाहुं शशिसूर्यनेत्रं ॥ पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपंतं ॥१९॥ ॥अनादिमध्यांतं आदिश्च मध्यं चांतश्चानादि

द्यंते यस्य सो यमनादिमध्यांतस्तं त्वा अनादिमध्यांतं ते॥ अनंतवीर्यं अनंतवीर्यं यस्यासौ तोस्तीत्यनंतवीर्यस्तम् अनंतवीर्यं॥ अनंतबा
हुं अनंता बाहवो यस्य तवसत्वं अनंतबाहुस्तं त्वां अनंतबाहुं॥ शशिसूर्यनेत्रं शशिसूर्यौ नेत्रे यस्य तं चंद्रादित्यनयनं पश्यामि
त्वां दीप्तहुताशवक्त्रं दीप्तश्चासौ हुताशश्च स वक्त्रे यस्य तं दीप्तहुताशवक्त्रं॥ स्वतेजसा विश्वमिदं समस्तं तपंतं संतापयंतं॥१९॥
द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः॥ दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्॥२०॥
द्यावापृथिव्योरिदमंतरं अंतरिक्षं व्याप्तं त्वया एव विश्वरूपधरेणैकेन दिशश्च सर्वा व्याप्ताः दृष्ट्वा उपलभ्य अद्भुतं विस्मापकं रूपमि
दं तव उग्रं क्रूरं लोकत्रयं व्यथितं भीतं चलितं वा हे महात्मन् अक्षुद्रस्वभाव॥२०॥ अथाधुना पुरा यद्वा जयेम यदि वा नो जयेयुरि
त्यर्जुनस्य संशय आसीत् तन्निर्णयाय पांडवानां जयमैकांतिकं दर्शयामीति प्रवृत्तो भगवान् तं पश्यन्नाह॥ अमी हि त्वां सुरसंघा विशं
ति केचिद्भीताः प्रांजलयो गृणंति॥ स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः॥२१॥ अमी हि युध्यमाना ये भूर
स्त्वा सुरसंघा तास्ते ये तु भूभारावतारणाय अवतीर्णा वस्वादि देवसंघा मनुष्यसंस्थानास्त्वां विशंति प्रविशंतो दृश्यंते। तत्र केचिद्भी
ताः प्रांजलयः संतो गृणंति स्तुवंति। अन्ये पलायनेप्यशक्ताः संतो युद्धे प्रत्युपस्थिते उत्पातादिनिमित्तान्युपलक्ष्य स्वस्त्यस्तु जगत इत्यु
क्त्वा महर्षिसिद्धसंघा महर्षीणां सिद्धानां संघाः स्तुवंति भिः पुष्कलाभिः संपूर्णाभिः॥२१॥ किं चान्यत्॥ ॥रुद्रादित्या वसवो ये
च साध्या विश्वेश्विनौ मरुतश्चोष्मपाश्च॥ गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे॥२२॥ रुद्रादित्या वसवो ये च साध्या

रुद्रादयो गणाः॥ विश्वेश्विनौ विश्वेदेवाः अश्विनौ देवौ॥ मरुतः॥ ऊष्मपाश्च पितरः॥ गंधर्वयक्षाः सुरसिद्धसंघाः॥ गंधर्वा हाहा हूहू प्रभृ
तयः॥ यक्षाः कुबेरप्रभृतयः॥ असुरा विरोचनप्रभृतयः॥ [illegible] सिद्धाः कपिलादयस्तेषां संघाः॥ गंधर्वयक्षासु
रसिद्धसंघा वीक्षंते पश्यंति त्वां विस्मिता विस्मयमापन्नाः संतः॥२२॥ एवं सर्वे यस्मात्॥ ॥रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहु
बाहूरुपादं॥ बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहं॥२३॥ रूपं महदतिप्रमाणं ते तव बहुवक्त्रनेत्रं बहूनि वक्त्रा
णि मुखानि नेत्राणि चक्षूंषि यस्मिन्तत् बहुवक्त्रनेत्रं। हे महाबाहो। बहुबाहूरुपादं बहवो बाहव ऊरवः पादाश्च यस्मिन् तद्रूपं तत् बहुबा
हूरुपादं किंच बहूदरं बहूनि उदराणि यस्मिन्निति बहूदरं बहुदंष्ट्राकरालं बहुभिर्दंष्ट्राभिः करालं दृष्ट्वा रूपमीदृशं लोकाः लौकिकाः
प्राणिनः प्रव्यथिताः प्रचलितास्त्रयेन तथाहमपि॥२३॥ तत्रेदं कारणं॥ ॥नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं॥ दृ
ष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो॥२४॥ नभःस्पृशं द्युस्पृशमित्यर्थः। दीप्तं प्रज्वलितं अनेकवर्णं अनेकरू
पं करा वर्णाः नानासंस्थाना यस्मिन् त्वयि तं त्वां अनेकवर्णं व्यात्ताननं व्यात्तानि विवृतानि आननानि मुखानि यस्मिन्[illegible] त्वयि तं त्वां व्यात्तान
नं दीप्तविशालनेत्रं दीप्तानि ज्वलितानि विशालानि विस्तीर्णानि नेत्राणि यस्मिन् त्वयि तं त्वां दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितांतरा
त्मा प्रव्यथितांतरात्मा मनो यस्य सोहं प्रव्यथितांतरात्मा। धृतिं न विंदामि धैर्यं न लभे शमं चोपशमं मनस्तुष्टिं विष्णो॥२५॥ दंष्ट्राकरा
लानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि॥ दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास॥२५॥ दंष्ट्राकरालानि च दंष्ट्रा

भिः करालानि विकृतानि ते तव मुखानि दृष्ट्वैव नोपलभ्य॥ कालानलसन्निभानि प्रलयकाले लोकानां दाहकोऽग्निः कालानलस्तत्सदृ
शानि कालानलसन्निभानि मुखानि। दिशः पूर्वापरविवेकेन जाने दिङ्मूढो जातोऽस्मि। अतो न लभे च नोपलभे शर्म सुखं अतः प्रसीद
प्रसन्नो भव हे देवेश जगन्निवास॥२५॥ येभ्यो मम पराजयाशंका प्रागेवासीत्तत्राचार्यप्रगतायतः॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे
सहैवावनिपालसंघैः॥ भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः॥२६॥ अमी च त्वां धृतराष्ट्रस्य पुत्रा दुर्योधन
प्रभृतयः त्वरमाणा विशन्तीत्यन्वयः तेन संबंधः॥ सर्वे सहैव संहता अवनिपालसंघैः अवनिं पृथ्वीं पालयंतीत्यवनिपालाः संबं
संघैः॥ किं च भीष्मो द्रोणः सूतपुत्रः कर्णस्तथासौ सहास्मदीयैरपि धृष्टद्युम्नप्रभृतिभिर्योधमुख्यैः योधानां मुख्यैः प्रधानैः सह॥२६॥
किं च॥ वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि॥ केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमांगैः॥२७॥
वक्त्राणि मुखानि ते त्वरमाणास्त्वरायुक्ताः संतो विशन्ति। किं विशिष्टानि दंष्ट्राकरालानि भयानकानि भयकारीणि। किं च केचिन्मुखानि प्रवि
ष्टानां मध्ये विलग्ना दशनान्तरेषु दन्तान्तरेषु मांसमिव भक्षितं संदृश्यन्ते उपलभ्यन्ते। चूर्णितैरुत्तमांगैः चूर्णीकृतैः शिरोभिः॥२७॥ कथं प्र
त्वा २ विशन्ति मुखानी[illegible]त्याह॥ ॥यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति॥ तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिवि
ज्वलन्ति॥२८॥ यथा नदीनां स्रवन्तीनां बहवोऽनेकाः अम्बूनां वेगा अम्बुवेगाः त्वराविशेषाः समुद्रमेवाभिमुखाः द्रवन्ति विशन्ति। तथा त
व तव अमी भीष्मादयो नरलोकवीरा मनुष्यलोके शूराः विशन्ति वक्त्राण्यभितो विज्वलन्ति प्रकाशमानानि॥२८॥ किमर्थं विशन्ति

कथं चेत्याह॥ यथाप्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः॥ तथैव नाशाय विशंति लोकास्तवापि वक्त्राणि समृद्धवेगाः॥२९॥ ॥
यथा प्रदीप्तं ज्वलनमग्निं पतंगाः क्षुद्रपतंगा पक्षिणो विशंति नाशाय समृद्धवेगाः समृद्ध उद्भूतो वेगो येषां ते समृद्धवेगास्तथैव नाश
य विशंति लोकाः प्राणिनस्तवापि वक्त्राणि समृद्धवेगाः॥२९॥ त्वं पुनः॥ ॥लेलिह्यसे ग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः
॥तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो॥३०॥ लेलिह्यसे ग्रासास्वादयसि ग्रसमानो ग्रासं प्रवेशयन् समंतात्समंत ता ४
तो लोकान्समग्रान्वदनैर्वक्त्रैर्ज्वलद्भिर्दीप्यमानैस्तेजोभिरापूर्य संव्याप्य जगत्समग्रं सहाग्रेण समस्तमित्येतत्। किं च॥ भासो दीप्
तय उग्रास्तवोग्राः क्रूराः प्रतपंति संतापं कुर्वंति। हे विष्णो व्यापनशील॥३०॥ यत एवमुग्रस्वभावोऽतः॥ ॥आख्याहि मे को भवानुग्ररूपो न
मोस्तु ते देववर प्रसीद॥ विज्ञातुमिच्छामि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिं॥३१॥ आख्याहि कथय मे मह्यं को भवानेवमुग्ररूपः क्रू
राकारेण नमोस्तु ते तुभ्यं हे देववर देवानां प्रधान प्रसीद प्रसादं कुरु॥ विशेषेण ज्ञातुमिच्छामि भवंतमाद्यं आदौ भवमाद्यं वा हि यस्मात्प्र
जानामि तव त्वदीयां प्रवृत्तिं चेष्टां॥३१॥ श्रीभगवानुवाच॥ ॥कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः॥ ऋतेपि
त्वां न भविष्यंति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः॥३२॥ कालोस्मि लोकक्षयकृल्लोकानां क्षयं करोतीति लोकक्षयकृत्प्रवृद्धं वृ
द्धिं गतो यदर्थं प्रवृद्धस्तच्छृणु लोकान्समाहर्तुं संहर्तुमिह काले प्रवृद्धः ऋतेपि विनापि त्वां न भविष्यंति भीष्मद्रोणकर्णप्रभृतयः सर्
वे येभ्यस्तवाशंका। येऽवस्थिताः प्रत्यनीकेषु प्रत्यनीकमनीकं प्रत्यनीकेषु योद्धारः॥३२॥ ॥यस्मादेवं॥ ॥तस्मात्त्वमुत्तिष्ठ यशो लभ

भस्व जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धं। मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्॥३३॥ ॥तस्मात्त्वमुत्तिष्ठ भीष्मप्रमुखयो
द्धृतिरथा अजेया देवैरप्यर्जुनेन जिता इति यशो लभस्व केवलं पुण्यैर्हि तत्प्राप्यते। जित्वा शत्रून् दुर्योधनप्रभृतीन् भुंक्ष्व राज्यमसपत्न
मकंटकं समृद्धं। मयैवैते निहता निश्चयेन हताः प्राणैर्वियोजिताः पूर्वमेव। निमित्तमात्रं भव त्वं हे सव्यसाचिन् सव्येन वामेनापि हस्ते
न शराणां क्षेप्ता सव्यसाचीत्युच्यते॥ अर्जुन॥३३॥ किंच॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्॥ मया हतांस्त्वं जहि
मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्॥३४॥ द्रोणं च येषु येष्वर्जुनस्याशंका तांस्तान्व्यपदिशति भगवान्मया हतानिति॥ तत्र द्रोण
भीष्मयोस्तावत्प्रसिद्धमाशंकाकारणं द्रोणो धनुर्वेदाचार्यो दिव्यास्त्रसंपन्न आत्मनश्च विशेषतो गुरुर्गरिष्ठश्च भीष्मः स्वच्छंदमृत्युः दिव्या
संपन्नश्च परशुरामेण सह द्वंद्वयुद्धमगमन्न च पराजितः। तथा जयद्रथो यस्य पिता तपश्चरति मम पुत्रस्य शिरो भूमौ पातयिष्यति यस्त
स्यापि शिरः पतिष्यतीति॥ कर्णोऽपि वासवदत्तया शक्त्या त्वमोघया संपन्नः सूर्यपुत्रः कानीनो यतस्तन्नाम्नैव निर्देशः॥ मया हतांस्त्वं ज
हि निमित्तमात्रेण। मा व्यथिष्ठास्तेभ्यो भयं माकार्षीः। युध्यस्व जेतासि दुर्योधनप्रभृतीन्रणे युद्धे सपत्नान्शत्रून्॥३४॥ संजय उवाच॥ ॥
एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी॥ नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य॥३५॥ एतच्छ्रुत्वा वच
नं केशवस्य कृतांजलिर्वेपमानः किरीटी॥ एवं कृतांजलिः सन्वेपमानः किरीटी॥ नमस्कृत्वा पुनरेवाहोक्तवान्॥ कृष्णं सगद्गदं स्य
गद्गदया वाचा मंदशब्देन भयाविष्टस्य दुःखाभिघातात्स्नेहाविष्टस्य च हर्षोद्भवात्। अश्रुपूर्णनेत्रत्वे सति श्लेष्मणा कंठावरोधस्ततश्च

वाचो। प्राटवं भयेन दृशा दृत्वेयत्स गद्गदः तेन सह वर्त्तते इति सगद्गदं यथा भवति तथा वचनमाहेति। भयविशेषणमेतत्। भीतभीतः पुनर्भयाविष्टश्चेतः सन्प्रण
म्य प्रह्वीभूय आहेति व्यवहितेन संबंधः। अत्रावसरे इयं जय वचनस्याभिप्रायं कथं द्रोणादिष्वर्जुनेन निहतेषु अजेयेष्वपि चतुर्षु शत्रुषु निरा
श्रयो दुर्योधनो निहत एवेति मत्वा धृतराष्ट्रो जयं प्रति निराशः सन् संधिं करिष्यति। ततः शांतिरुभयेषां भविष्यति तदपि नाश्रौषीत् धृत
राष्ट्रो भवितव्यवशात्॥३५॥ ॥अर्जुन उवाच॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च॥ रक्षांसि भीतानि दिशो द्रवंति स
र्वे नमस्यंति च सिद्धसंघाः॥३६॥ स्थाने युक्तमेतत् तव प्रकीर्त्या त्वन्माहात्म्यकीर्त्तनेन श्रुतेन हृषीकेश यज्जगत्प्रहृष्यति प्रहर्ष
मुपैति तत् स्थाने युक्तमित्यर्थः। अथवा विषयविशेषणं स्थाने इति युक्तो हर्षादिविषयो भगवान् यत ईश्वरः सर्वात्मा सर्वभूतसुहृ
च्चेति। तथानुरज्यते अनुरागं चोपैति त्वद्विषयरतिं व्याख्येयं॥ किंच॥ रक्षांसि भीतानि भयाविष्टानि दिशो द्रवंति तच्च स्थाने॥ विषयस
र्वे नमस्यंति नमः कुर्वंति च सिद्धसंघाः सिद्धानां समुदायाः कपिलादीनां तच्च स्थाने॥३६॥ भगवतो हर्षादिविषयत्वे हेतुं दर्शयति॥ ॥
कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे। अनंत देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत्॥३७॥ ॥कस्माच्च
हेतोस्ते तुभ्यं न नमेरन् न नमस्कुर्युः। हे महात्मन् गरीयसे गुरुतराय। यतो ब्रह्मणो हिरण्यगर्भस्याप्यादिकर्त्ता कारणमतस्तस्मा
दादिकर्त्रे। कथमेवं न नमस्कुर्युरतो हर्षादीनां नमस्कारस्य च स्थानं त्वं हर्षादेर्विषय इत्यर्थः॥ हे अनंत देवेश जगन्निवास त्वमक्षरं त
त्परं यद्वेदांतेषु श्रूयते। किं तत् सदसत् यद्विद्यमानं॥ असच्च यन्नास्तीति बुद्धिसे उपधाने ते सदसती यस्योपाधी अक्षरस्य यद्वारेण

सदसदित्युपचर्यते॥परमार्थतस्तुसदसतःपरंयद्वेदविदोवदंतितत्त्वमेवनान्यदित्यभिप्रायः॥३७॥पुनरपिस्तौति॥त्वमादिदेवःपुरुषः
पुराणः॥त्वमस्यविश्वस्यपरंनिधानं॥वेत्तासिवेद्यंचपरंचधामत्वयाततंविश्वमनंतरूप॥३८॥त्वमादिदेवोजगत्स्रष्टृत्वात्॥पुरुषः
पुरिशयनात्॥पुराणश्चिरंतनस्त्वमेवास्यविश्वस्यपरंप्रलयेनिधानंनिधीयतेयस्मिन्जगत्सर्वंमहाप्रलयादाविति॥किंच॥वेत्तासिवेदि
तासिसर्वस्यैववेद्यजातस्य॥यच्चवेद्यंवेदनार्हंतदप्यसि॥परंचधामपरमंपदंवैष्णवंत्वयाततंव्याप्तंविश्वंसमस्तमनंतरूप॥३८॥किंच॥॥
वायुर्यमोग्निर्वरुणःशशांकःप्रजापतिस्त्वंप्रपितामहश्च॥[illegible]मोनमस्तेस्तुसहस्रकृत्वःपुनश्च[illegible]योपिनमोनमस्ते॥३९॥॥वायुर्य न५
मो॥वायुस्त्वंयमश्चाग्निर्वरुणोपांपतिः॥शशांकश्चंद्रमाः॥प्रजापतिस्त्वंकश्यपादिः॥प्रपितामहश्चपितामहस्यपिताप्रपितामहोब्रह्मणः॥पि
तेत्यर्थः॥नमोनमस्तेतुभ्यमस्तुसहस्रकृत्वः॥पुनश्चभूयोपिनमोनमस्तेबहुशोनमस्कारः॥क्रियाभ्यासावृत्तिगणनेकृत्वसुचोच्यते॥पुन
श्चभूयोपीतिश्रद्धाभक्त्यतिशयात्परितोषमात्मनोदर्शयति॥३९॥तथा॥ ॥नमःपुरस्तादथपृष्ठतस्तेनमोस्तुतेसर्वतएवसर्व॥
अनंतवीर्यामितविक्रमस्त्वंसर्वंसमाप्नोषिततोसिसर्वः॥४०॥नमःपुरस्तात्पूर्वस्यांदिशितुभ्यंपृष्ठतस्तेनमोस्तुसर्वतएवसर्वास्वपिदिक्षु
सर्वत्रास्थितायाहेसर्व॥अनंतवीर्यामितविक्रमः॥अनंतवीर्यंयस्यअमितोविक्रमोयस्य॥वीर्यंसामर्थ्यं॥विक्रमःपराक्रमः॥वीर्यवानपिन
कश्चिच्छत्रुवधादिविषयेन[illegible]पराक्रमतेमंदपराक्रमोवा॥त्वंतुअनंतवीर्यश्चानंतविक्रमश्चेतिअनंतवीर्यामितविक्रमः॥सर्वंसमस्तं
जगत्समाप्नोषिसम्यगेकेनात्मनाव्याप्नोषियतस्ततस्तस्मादसित्वमेवासिसर्वः॥त्वद्विनाभूतंनकिंचिदस्तीत्यर्थः॥४०॥यतोहंत्वन्महात्म्य

परिज्ञानादपराधोऽतः॥ ॥सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति॥ अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वा
पि॥४१॥ सखा समानवया इति मत्वा ज्ञात्वा विपरीतबुद्ध्या प्रसभमभिभूय प्रसह्य यदुक्तं हे कृष्ण हे यादव हे सखेति। अजानता अज्ञानिना म
ढेन। किमजानतेत्याह। महिमानं माहात्म्यं तवेदमीश्वरस्य विश्वरूपं तवेदं महिमानमजानतेति वैयधिकरण्येन संबंधस्तवेममिति
पाठोपद्यास्तित दास्यामानाधिकरण्यमेव। मया प्रमादाद्विक्षिप्तचित्ततया प्रणयेन वापि प्रणयो नाम स्नेहनिमित्तो विस्रंभस्तेनापि कारणे
न यदुक्तवानस्मि॥४१॥ यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु॥ एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयं॥
४२॥ यच्चावहासार्थं परिहासार्थं प्रजोयोजनाय असत्कृतः परिभूतोऽसि त्वं वसिष्ठ विहारशय्यासनभोजनेषु। विहरणं
विहारः पादव्यायामः। शयनं शय्या। आसनमास्थायिका। भोजनमदनमित्येषु विहारशय्यासनभोजनेषु। एकः परोक्षः सन्नसत्कृतोऽसि
परिभूतोऽसि तत्सर्वमपराधजातं क्षामये। हे अच्युत तत्समक्षं तत् छब्दः क्रियाविशेषणार्थः। प्रत्यक्षं वा सत्कृतोऽसि
तत्सर्वमपराध जातं क्षामये त्वामकारयेत्वामहमप्रमेयं॥४२॥ ॥यतस्त्वं॥ ॥पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरु
र्गरीयान्॥ न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव॥४३॥ पितासि जनयितासि लोकस्य प्राणिजातस्य चराचर
स्य स्थावरजंगमस्य। न केवलं पितासि त्वमस्य जगतः पूज्यश्च पूजार्होऽयतो गुरुर्गरीयान् गुरुतरः। कस्माद्गुरुतरस्त्वमित्याह। न
त्वत्सम स्त्यभ्यधिकोऽस्ति। नहीश्वरद्वयं संभवत्यनेकेश्वरत्वे व्यवहारानुपपत्तेः। त्वत्सम एव तावदन्यो न संभवति कुत एवान्यो ऽभ्य

धिकः स्यात्। कोऽन्योऽपि सर्वस्मिन्नप्रतिमप्रभावप्रतिमीयते यया सा प्रतिमा॥ न विद्यते प्रतिमा यस्य तव प्रभावस्य स त्वमप्रतिमप्रभावः॥
हे अप्रतिमप्रभाव निरतिशयप्रभाव इत्यर्थः॥४३॥ ॥यत एवं॥ ॥तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं॥ पितेव पु
त्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं॥४४॥ तस्मात्प्रणम्य नमस्कृत्य प्रणिधाय प्रकर्षेण नीचैः नीचैः कृत्वा कायं शरीरं
प्रसादये प्रसादं कारये त्वामहमीशितारमीड्यं स्तुत्यं॥ त्वं पुनः पुत्रस्यापराधं यथा पिता क्षमते सर्वं सखा इव सख्युरपराधं यथा प्रियः
प्रियायापराधं क्षमते। एवमर्हसि हे देव सोढुं प्रसिद्धितुं क्षमितुमित्यर्थः॥४४॥ ॥किंच॥ ॥अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्र
व्यथितं मनो मे॥ तदेव मे दर्शय देवरूपं प्रसीद देवेश जगन्निवास॥४५॥ अदृष्टपूर्वं न कदाचिदपि दृष्टपूर्वमिदं विश्वरूपं तव मयान्ये
वीत तदहं दृष्ट्वा हृषितोऽस्मि भयेन च व्यथितं मनो मे। ततस्तदेव मे मम दर्शय रूपं यन्मत्सखं। प्रसीद देवेश जगन्निवास जगतां निवासोऽसि जग
न्निवासः हे जगन्निवास॥४५॥ ॥किंच॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव॥ तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव वि
श्वमूर्ते॥४६॥ किरीटिनं किरीटवंतं॥ तथा गदिनं गदावंतं चक्रहस्तमिच्छामि। त्वां प्रार्थये त्वां द्रष्टुमहं तथैव पूर्ववदित्यर्थः॥ यत ए
वं तस्मात्तेनैव रूपेण वसुदेवपुत्ररूपेण भवेत्यर्थः॥४६॥ अर्जुनं भीतमुपलभ्यमुपसंहृत्य विश्वरूपं प्रियवचनेनाश्वासयन् भगवान्॥ श्रीभ
गवानुवाच॥ ॥मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्॥ तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं॥४७॥ मया प्रसन्नेन प्र
सादो नाम तवानुग्रहबुद्धिस्तद्वता प्रसन्नेन मया अर्जुन इदं परं रूपं विश्वरूपं दर्शितमात्मयोगादात्मन ऐश्वर्यस्य सामर्थ्यात्॥ तेजोमयं तेजःप्रायं वि

मं समस्तमनंतरहितमादौ भवमाद्यं यद्रूपं मे मम त्वदन्येन त्वत्तोऽन्येन केनचिन्न दृष्टपूर्वं ॥४७॥ मम रूपदर्शनेन कृतार्थ एव त्वं संप्रवृत्त
इति तत्स्तौति ॥ ॥न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ॥ एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥४८॥
न वेदयज्ञाध्ययनैः चतुर्णामपि वेदानामध्ययनैर्यथावत् यज्ञाध्ययनेश्च वेदाध्ययनेरेव यज्ञाध्ययनस्यापि सिद्धत्वात् पृथक् यज्ञाध्यय
नग्रहणं यज्ञविज्ञानोपलक्षणार्थं ॥ तथा न दानैश्च क्रियाभिरग्निहोत्रादिभिः श्रौतादिभिर्नापि तपोभिरुग्रैश्चान्द्रायणादिभिरुग्रैर्घोरैः ॥ एवं
रूपो यथा दर्शितं विश्वरूपं यस्य सोऽहं ॥ एवंरूपः शक्यो न शक्यः ॥ अहं नृलोके मनुष्यलोके द्रष्टुं त्वदन्येन त्वत्तोऽन्येन हे कुरुप्रवीर ॥४८॥
किंच ॥ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं ॥ व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥४९॥ मा ते व्यथा
मा भूत्ते भयं मा च विमूढभावो विमूढचित्तता दृष्ट्वा चोपलभ्य रूपं घोरं ईदृग्यथा च दर्शितं मम मे इदं व्यपेतभीः विगतभयः प्रीतमनाश्च स
न् पुनर्भूयस्त्वं तदेव चतुर्भुजं शंखचक्रगदाधरं तवेष्टं रूपमिदं प्रपश्य ॥४९॥ ॥संजय उवाच ॥ इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं
रूपं दर्शयामास भूयः ॥ आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥५०॥ इत्येवमर्जुनं वासुदेवस्तथाभूतं वचनमुक्त्वा स्वय
कं च वसुदेवगृहे जातं रूपं दर्शयामास दर्शितवान् भूयः पुनराश्वासयामास च प्रश्वासितवान् भीतमेनं भूत्वा पुनः सौम्यवपुः प्रसन्नदेहो
महात्मा ॥५०॥ ॥अर्जुन उवाच ॥ दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ॥ इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥५१॥ दृष्ट्वेदं मानु
षं रूपं मनुष्यरूपं प्रसन्नं तव सौम्यं ॥ हे जनार्दन ॥ इत्यादि इति गीतिकर्मणो ऽसुराणां देवप्रतिपक्षजनानां प्राणवियोजनाद्वोरकादिगम

पित्वा च जनार्दन। अभ्युदयनिःश्रेयसपुरुषार्थप्रयोजनं सर्वैर्जनैर्याच्यत इति वा। इदानीमस्मि संवृत्तः संजातः। किं
सचेताः प्रसन्नचित्तः प्रकृतिं स्वभावं गतश्चास्मि॥५१॥ श्रीभगवानुवाच॥ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम। देवा अप्यस्य रू
पस्य नित्यं दर्शनकांक्षिणः॥५२॥ सुदुर्दर्शं सुष्ठु दुःखेन दर्शनमस्येति सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम। देवा अप्यस्य
मम रूपस्य नित्यं सर्वदा दर्शनकांक्षिणो दर्शनेप्सवोऽपि न त्वमिव दृष्टवन्तो द्रक्ष्यन्ति चेत्यभिप्रायः॥५२॥ कस्मात्॥ ॥नाहं वे
दैर्न तपसा न दानेन न चेज्यया। शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥५३॥ नाहं वेदैः ऋग्यजुःसामाथर्ववेदैश्चतुर्भिर
पि न तपसोग्रेण चान्द्रायणादिना। न दानेन गोभूहिरण्यादिना। न चेज्यया यज्ञेन पूजया वा। शक्य एवंविधो यथा दर्शितप्रकारः॥
५३॥ द्रष्टुं कथं पुनः शक्य इत्युच्यते॥ ॥भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप॥५४॥
भक्त्या तु किंविशिष्टयेत्याह। अनन्यया अपृथग्भूतया। भगवतोऽन्यत्र पृथक् न कदाचिदपि भवति या सा। अनन्या भक्तिः॥ स
र्वैरपि करणैर्वासुदेवादन्यन्नोपलभ्यते। यया साऽनन्या भक्तिस्तया भक्त्या शक्योऽहमेवंविधो विश्वरूपप्रकारो हेऽर्जुन ज्ञातुं शा
स्त्रतो द्रष्टुं च साक्षात्कर्तुं तत्त्वेन तत्त्वतः प्रवेष्टुं च मोक्षं च गन्तुं परंतप॥५४॥ अधुना सर्वस्य गीताशास्त्रस्य सारभूतो निःश्रेयसा
र्थोऽनुष्ठेयत्वेन समुच्चित्योच्यते॥ ॥मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः॥ निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव॥५५॥

इति मदर्थं कर्म मत्कर्म तत्करोतीति मत्कर्मकृत् ॥ मत्परमः । अहं परमः । अहं परा गतिर्यस्य सोयं मत्परमः । तथा मद्भक्तो मामेव स-
र्वप्रकारैः सर्वात्मनासर्वोत्साहेन भजत इति मद्भक्तः । संगवर्जितः । धनपुत्रकलत्रबंधुवर्गेषु संगवर्जितः प्रीतिस्नेहवर्जितः ॥
निर्वैरो निर्गतवैरः सर्वभूतेषु शत्रुभावरहितः । आत्मनोत्यंतापकारे प्रवृत्तेष्वपि य ईदृशः मद्भक्तः स मामेत्यहमेव तस्य पराप-
रागतिर्नान्या कदाचिदित्ययं तवोपदेशो मयोपदिष्टो हे पांडवेति ॥ ५५ ॥ इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्रा-
जकाचार्यस्य श्रीशंकरभगवतः कृतौ गीताभाष्ये विश्वरूपदर्शनं नामैकादशोध्यायः ॥ ११ ॥ विष्णवे नमः ॥ ॥ द्वितीयप्रभृ-
तिष्वध्यायेषु विभूत्यंतेषु परमात्मनो ब्रह्मणोक्षरस्य विध्वस्तसर्वविशेषणस्योपासनमुक्तं ॥ सर्वयोगैश्वर्यसर्वज्ञानशक्तिमत ॥ ७६
स्तत्त्वोपाधिरीश्वरस्योपासनं तत्र तत्रोक्तं । विश्वरूपाध्याये चैश्वरमाद्यं समस्तजगदात्मरूपं त्वदीयं विश्वरूपं दर्शितमुपासनार्थं
मेव ॥ तच्च दर्शयित्वोक्तवान् मत्कर्मकृदित्याद्यतो हमनयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामीति ॥ अर्जुन उवाच ॥
एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ॥ ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥ एवमित्यतीतानंतरश्लोकेनोक्तमर्थं प-
रामृशति । मत्कर्मकृदित्यादिना । एवं सततयुक्ता नैरंतर्येण भगवत्कर्मादौ यथोक्तेर्थे समाहिताः संतः प्रवर्तमाना इत्यर्थः । ये भक्ता अ-
नन्यशरणाः संतस्त्वां यथादर्शितं विश्वरूपं पर्युपासते ध्यायंति । ये चान्येपीत्यक्तसर्वैषणाः संन्यस्तसर्वकर्माणो यथाविशेषितं ब्र- ×
ह्मोदारं निरस्तसर्वोपाधित्वादव्यक्तमकरणगोचरं यद्धि लोके करणगोचरं तद्व्यक्तमुच्यते । अंजेर्व्यक्तिकर्मकत्वादिदं तद्विपरीत

द्विपरीतं शिष्टेऽक्षरं चाव्यक्तं मानैर्विशेषणैर्विशिष्टं तद्ये चापि पर्युपासते तेषां मध्ये के योगवित्तमाः केऽतिशयेन योगविद इत्य
र्थः ॥ १ ॥ श्रीभगवानुवाच ॥ येऽक्षरोपासकाः सम्यग्दर्शिनो निवृत्तैषणास्ते तावत्तिष्ठन्तु तान्प्रति यद्वक्तव्यं तदुपरिष्टाद्वक्ष्यामः ॥ ये त्व
तितरे ॥ मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ॥ श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥ मयि विश्वरूपे परमेश्वरे आवेश्य समाधा
य मनो ये भक्ताः सन्तो मां सर्वयोगेश्वराणामधीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशतिमिरदृष्टिं ॥ नित्ययुक्ता अतीतानन्तराध्यायान्ते उक्तश्लो
कोन्यायेन सततयुक्ताः सन्त उपासते श्रद्धया परया प्रकृष्टयोपेताये ते मे मम मता अभिप्रेता युक्ततमा इति नैरन्तर्येण हि ते मच्चित्ततया अ
होरात्राण्यतिवाहयन्ति अतो युक्तं तान्प्रति युक्ततमा इति वक्तुं ॥ २ ॥ किमितरे युक्ततमा न भवन्ति न किन्तु तान्प्रति यद्वक्तव्यं तच्छृणु ॥ ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ॥ सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥ ये त्वक्षरमनिर्देश्यमव्यक्तत्वादशब्दगोचर इ
ति न निर्देष्टुं शक्यते । अतोऽनिर्देश्यमव्यक्तं पर्युपासते ॥ परिसमन्तादुपासते ॥ उपासनं नाम यथाशास्त्रमुपास्यस्यार्थस्य विषयीकरणेन सा
मीप्यमुपसंगम्य तैलधारावत्समानप्रत्ययप्रवाहेण दीर्घकालं यदासनं तदुपासनमाचक्षते । अक्षरस्य विशेषणान्याह ॥ उपासकस्य
सर्वत्रगं व्योमवद्व्यापि अचिन्त्यं अव्यक्तत्वादचिन्त्यं च यद्धि करणगोचरं तन्मनसा चिन्त्यं तद्विपरीतत्वादचिन्त्यमक्षरं कूटस्थं दृश्यमानगुणम
हैर मत [illegible] वस्तु कूटं कूटरूपं कूटसाक्षीत्यादौ कूटशब्दः प्रसिद्धो लोके ॥ तथा चाविद्याद्यनेकसंसारबीजमन्तर्दोषवन्माया
व्याकृतादिशब्दवाच्यतया मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ॥ मम माया दुरत्ययेत्यादौ प्रसिद्धं यत्तत्कूटं तस्मिन्कूटे स्थितं कूटस्थं

स्थं तदध्यक्षतया वा स्थितं ॥ अथवा राशिरिव स्थितं कूटस्थं मतः । अवाचलं यस्मादचलं तस्माद्ध्रुवं नित्यमित्यर्थः ॥ ३ ॥ ॥ संनि-
यम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ॥ ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥ ४ ॥ संनियम्य सम्यगुपसंहृत्य इंद्रियग्रामं इंद्रियसमुदायं
सर्वत्र सर्वस्मिन्काले समबुद्धयः समा तुल्या बुद्धिर्येषां ॥ इष्टानिष्टप्राप्तौ ते समबुद्धयस्ते एवंविधा प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥
४ ॥ न तेषां वक्तव्यं किंचिन्मां ते प्राप्नुवंति ज्ञानी त्वात्मैव मे मतमिति ह्युक्तं न हि भगवत्स्वरूपाणां सतां युक्ततमत्वं वाच्यं किंतु
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसां ॥ अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥ क्लेशोऽधिकतरो यद्यपि
मत्कर्मादिपराणामधिक एव क्लेशोऽधिकतरस्त्वक्षरात्मनां परमार्थदर्शिनां देहाभिमानपरित्यागनिमित्तः अव्यक्तासक्त-
चेतसां अव्यक्ते अक्षरे आसक्तं चेतो येषां ते अव्यक्तासक्तचेतसः तेषामव्यक्तासक्तचेतसां । अव्यक्ता हि यस्माद्या गतिरक्षरात्मि-
का दुःखं सा देहवद्भिर्देहाभिमानवद्भिरवाप्यते । ततः क्लेशोऽधिकतरः अक्षरोपासकानां यद्वर्त्तनं तदुपरिष्टाद्वक्ष्यामः ॥ ५ ॥ ॥ ये तु स-
र्वाणि कर्माणि मयि संन्यस्य मत्पराः ॥ अनन्येनैव योगेन मां ध्यायंत उपासते ॥ ६ ॥ ये तु सर्वाणि कर्माणि मयीश्वरे संन्यस्य मत्पराः अ-
हं परो येषां ते मत्पराः संतः ॥ अनन्येनैवाविद्यमानं अन्यदालंबनं विश्वरूपं देवमात्मानं मुक्त्वा यस्य सोऽनन्यस्तेनानन्येनैव केन योगे-
न समाधिना मां ध्यायंतश्चिंतयंत उपासते ॥ ६ ॥ तेषां किं ॥ तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ॥ भवामि नचिरात्पार्थ मय्यावेशि-
तचेतसां ॥ ७ ॥

मत्यु१

तेषां मदुपासनैकपरायणानामहमीश्वरः समुद्धर्ता कुत इत्याह॥ संसारसागरात् मृत्युयुक्तः संसारो मृत्युसंसारः स एव सागर इव
सागरो दुस्तरत्वात् तस्मात् मृत्युसंसारसागरात् अहं तेषां समुद्धर्ता भवामि न चिरात्। किं तर्हि। क्षिप्रमेवाहं हे पार्थ मय्यावेशितचेतसां
मयि विश्वरूपे आवेशितं प्रवेशितं समाहितं चेतो येषां ते मय्यावेशितचेतसः। तेषां यत एवं तस्मात्॥ मय्येव मन आधत्स्व मयि बुद्धिं
निवेशय॥ निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥८॥ ॥मय्येव विश्वरूपे परमेश्वरे मनः संकल्पविकल्पात्मकं आधत्स्व स्थापय
य। मय्येव अध्यवसायं कुर्वतीं बुद्धिं आधत्स्व निवेशय। ततस्ते किं स्यादिति तच्छृणु॥ निवसिष्यसि निवत्स्यसि निश्चयेन मदात्मना मयि
वासं करिष्यसि। अतः शरीरपातादूर्ध्वं न संशयः संशयो न कर्तव्यः॥८॥ ॥अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरं॥ अ
म०/ भ्यासयोगेन ततो मामिच्छाप्तुं धनंजय॥९॥ अथैवं पर्यायेणोक्तमानि तथापि चित्तं समाधातुं स्थापयितुं स्थिरमचलं न शक्नोषि चेत ततः
पश्चादभ्यासयोगेन। चित्तस्यैकस्मिन्नालंबने सर्वतः समाहृत्य पुनः पुनः स्थापनमभ्यासः स तत्पूर्वको योगः समाधानलक्षणस्तेनाभ्या
सयोगेन मां विश्वरूपमिच्छ प्रार्थय स्वप्राप्तुं हे धनंजय॥९॥ अभ्यासेप्यसमर्थोसि मत्कर्मपरमो भव॥ मदर्थमपि कर्माणि कुर्वन्सिद्धिम
वाप्स्यसि॥१०॥ ॥अभ्यासेप्यसमर्थोसि अशक्तोसि मत्कर्मपरमो भव मदर्थं कर्म मत्कर्म परमो मत्कर्मप्रधानो भव इत्यर्थः॥ अभ्यासे विना
मदर्थमपि कर्माणि केवलं कुर्वन्सिद्धिं सत्त्वशुद्धियोगज्ञानप्राप्तिद्वारेणावाप्स्यसि॥१०॥ अथैतदप्यशक्तोसि कर्तुं मद्योगमाश्रितः॥ स
र्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥११॥ ॥अथ पुनरेतदपि यदुक्तं मत्कर्मपरमत्वं तत्कर्तुमशक्तोसि मद्योगमाश्रितो मयि क्रि

पुमाणानि कर्माणि संन्यस्य यत्करणं तेषामनुष्ठानं स मद्योगमाश्रितः। सर्वकर्मफलपरित्यागं सर्वेषां कर्मणां फलसंन्यासं सर्वक
र्मफलत्यागं ततोऽनंतरं कुरु यतात्मवान्संयतचित्तः सन्नारत्यर्थः॥११॥ इदानीं सर्वकर्मफलत्यागं स्तौति॥ ॥श्रेयो हि ज्ञानमभ्यासाज्ज्ञा
नाद्ध्यानं विशिष्यते॥ ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरं॥१२॥ ॥श्रेयो हि प्रशस्यतरं ज्ञानं क[illegible]स्मादीववेकपूर्वकादभ्या
सात्तस्मादपि ज्ञानात्। ज्ञानापूर्वकं ध्यानं विशिष्यते॥ ज्ञानवतो ध्यानादपि कर्मफलत्यागो विशिष्यते इत्यनुषज्यते। एवं कर्म[illegible]फल
त्यागात्स्वविशेषणा एव तः शांतिरुपशमः सहेतुकस्य संसारस्यानंतरमेव स्यान्नातु कालांतरमपेक्षते॥१२॥ अज्ञस्य कर्मणि प्रवृत्तस्य
पूर्वोपदिष्टोपायानुष्ठानाशक्तौ सर्वकर्मणां फलत्यागः श्रेयःसाधनं उपदिष्टं॥ न प्रथममेवातश्श्रेयो हि ज्ञानमभ्यासादित्युत्तरो
त्तराविशिष्टत्वोपदेशेन सर्वकर्मफलत्यागः स्तूयते संपन्नज्ञानसाधनानुष्ठाने अशक्तौ वानुष्ठेयत्वेन श्रुतत्वात्॥ केन साधर्म्येण स्तुतिः॥
यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिताः इति॥ सर्वकामप्रहाणादमृतत्वमुक्तं तत्प्रसिद्धं॥ कामाश्च सर्वे श्रौतस्मार्तानां कर्मणां फलानि तत्त्या
गे च विदुषो ज्ञाननिष्ठस्यानंतरैव शांतिरिति। सर्वकर्मफलत्यागसामान्यमज्ञस्य कर्मफलत्यागस्याप्यस्तीति तत्सामान्यात्सर्व
कर्मफलत्यागस्तुतिरियं प्ररोचनार्था। यथागस्त्येन ब्राह्मणेन समुद्रः पीत इदानींतना अपि ब्राह्मणा ब्राह्मणत्वसामान्यात्स्तूयंते। एवं
कर्मफलत्यागात्कर्मयोगस्य श्रेयःसाधनत्वमभिहितं मत्र चात्मेश्वरभेदमाश्रित्य विश्वरूपे ईश्वरे चेतःसमाधानलक्षणो योग उक्त ई
श्वरार्थं कर्मानुष्ठानादि चा यैतदप्यशक्तोऽसीत्यज्ञानकार्यस्य सूचनान्नाभेददर्शिनोऽक्षरोपा[illegible]सकस्य कर्मयोग उपपद्यत इति

दर्शयति। तथा कर्मयोगिनोऽक्षरोपासनानुपपत्तिं दर्शयति भगवान्। ते प्राप्नुवंति मामेवेत्यक्षरोपासकानां कैवल्यप्राप्तौ स्वातंत्र्यमु
क्त्वेतरेषां पारतंत्र्यमीश्वराधीनतां दर्शितवान्। तेषामहं समुद्धर्तेति। यदि हि ईश्वरस्यात्मभूतास्ते मता अभेददर्शित्वादक्षरस्वरूपा एवते
इति समुद्धरणकर्मवचनं तान्प्रत्यश्लिष्टं स्यात्॥ यस्माच्चार्जुनस्यात्यंतमेव हितैषी भगवांस्तस्य सम्यग्दर्शनानन्वितं कर्मयोगं भेदद्
ष्टिमंतमेवोपदिशति न चात्मानमीश्वरं प्रमाणतो बुद्ध्वा कस्यचिद्गुणभावं जिगमिषति कश्चिद्विरोधात्तस्मादक्षरोपासकानां सम्यग्दर्श
ननिष्ठानां त्यक्तसर्वैषणानामद्वेष्टा सर्वभूतानामित्यादि धर्मपूगं साक्षादमृतत्वकारणं वक्ष्यामीति प्रवर्त्तते॥ ॥अद्वेष्टा सर्वभू
करुणएव तानां मैत्रः करुण एव च॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी॥१३॥ ॥अद्वेष्टा सर्वभूतानां न द्वेष्टा अद्वेष्टा आत्मनो दुःख
हेतुमपि न किंचिद्द्वेष्टि सर्वाणि भूतान्यात्मत्वेन हि पश्यति। मैत्रः मित्रभावो मैत्री मित्रतया वर्त्तत इत्यर्थः। मैत्रः करुण एव च। करुणा
मप कृपा दुःखितेषु दया तद्वान्करुणः सर्वभूताभयप्रदः संन्यासीत्यर्थः॥ निर्ममो ममेति प्रत्ययवर्जितो निरहंकारो निर्गताहंप्रत्ययः
समदुःखसुखः समे दुःखसुखे द्वेषरागयोरप्रवर्त्तके यस्य स समदुःखसुखः। क्षमी क्षमावानाक्रुष्टोऽभिहतो वाऽविक्रिय एवास्ते॥१३॥ ॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥१४॥ संतुष्टः सततं नित्यं देहस्थितिकारणस्य ला
भे लाभे च उत्पन्नालंप्रत्ययः। तथा गुणवल्लाभे विपर्यये च संतुष्टः सततं योगी समाहितचित्तः। यतात्मा संयतस्वभावो दृढनिश्चयो दृढः
स्थिरो निश्चयोऽध्यवसायो यस्यात्मतत्वविषये स दृढनिश्चयः। मय्यर्पितमनोबुद्धिः संकल्पात्मकं मनः। अध्यवसायलक्षणा बु

द्धिसो मय्यर्पिते स्थापिते यस्य संन्यासिनः स मय्यर्पितमनोबुद्धिः। यईदृशो मद्भक्तः स मे प्रियः॥१४॥ ॥प्रियो हि ज्ञानिनोत्यर्थमहंस
च मम प्रिय इति। स पूर्वे ध्याये सूचितं तदिह प्रपंच्यते॥ यस्मान्नोद्विजते लोको लोको लोकान्नोद्विजते च यः॥ हर्षामर्षभयोद्वेगैर्मुक्तो यः स
चा प्रियः॥१५॥ ॥ यस्मात्संन्यासिनो द्विजते दुद्वेगं न गच्छति न संतप्यते न संक्षोभ्यते लोकः तथा लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैः हर्षश्चामर्षश्च भयं च उद्वेगश्च तैः हर्षामर्षभयोद्वेगैर्मुक्तः॥ प्रियलाभेंतःकरणस्योत्कर्षो रोमांचनाश्रुपातादिलिंगः ह
र्षः॥ अमर्षोऽसहिष्णुता। भयं त्रासः। उद्वेगः उद्विग्नता तैर्मुक्तो यः स च मे प्रियः॥१५॥ ॥अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः॥ सर्वारं
भपरित्यागी यो मद्भक्तः स मे प्रियः॥१६॥ ॥देहेन्द्रियविषयसंबंधादिषु पेक्षा विषयेष्वनपेक्षो निस्पृहः॥ शुचिर्बाह्येनाभ्यंतरेण च शौ
चेन संपन्नः। दक्षः प्रत्युत्पन्नेषु कार्येषु सद्यो यथावत्प्रतिपत्तुं समर्थः। उदासीनो न कस्यचिन्मित्रादेः पक्षं भजते यः स उदासीनः॥ गतव्य
थः गतभयः॥ सर्वारंभपरित्यागी आरभ्यंत इत्यारंभाः इहामुत्रार्थफलभोगार्थानि कर्माणि सर्वारंभाः तान्परित्यक्तुं शीलमस्येति सर्वा
रंभपरित्यागी यो मद्भक्तः स मे प्रियः॥१६॥ किंच॥ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति॥ शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥ १
७॥ यो न हृष्यतीष्टप्राप्तौ न द्वेष्टि अनिष्टप्राप्तौ न शोचति प्रियवियोगे न चाप्राप्तं कांक्षति॥ शुभाशुभकर्मणी परित्यक्तुं शीलमस्येति
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥१७॥ समः शत्रौ च मित्रे च तथा मानापमानयोः। शीतोष्णसुखदुःखेषु समः संगविवर्जितः॥ १८॥
पूजापरिभवयोः शीतोष्णसुखदुःखेषु समः सर्वत्र संगवर्जितः॥१८॥ किंच॥ तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केनचित्॥ अनिकेतः स्थिर

मतिर्भक्तिमान्मे प्रियो नरः॥१९॥ तुल्यनिंदास्तुतिः निंदा च स्तुतिश्च निंदास्तुती ते तुल्ये यस्य स तुल्यनिंदास्तुतिः॥ मौनी मौनिवा
न्संयतवाक्॥ संतुष्टो येन केनचित् शरीरस्थितिहेतुमात्रेण॥ तथा चोक्तं॥ येन केनचिदाच्छन्नो येन केनचिदाशितः॥ यत्र क्वचन
शायी स्यात्तं देवा ब्राह्मणं विदुरिति॥ किंच॥ अनिकेतो निकेतः आश्रयो निवासो नियतो न विद्यते यस्य सः॥ अनिकेतोऽनगार इत्या
दिस्मृत्यंतरात्॥ स्थिरमतिः परमार्थवस्तुविषया यस्य सा स्थिरमतिः॥ भक्तिमान्मे प्रियो नरः॥१९॥ अद्वेष्टा सर्वभूतानामित्यादिना
अक्षरस्योपासकानां संन्यासिनां परमार्थज्ञाननिष्ठानां धर्मजातं प्रक्रांतमुपसंह्रियते॥ ॥ये तु धर्म्यामृतमिदं यथोक्तं पर्युपा
सते॥ श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥२०॥ ॥ये तु संन्यासिनो धर्म्यामृतं धर्म्यं च तदमृतं च धर्म्यामृतं तदमृतत्वहेतु
त्वादिदं यथोक्तं अद्वेष्टा सर्वभूतानामित्यादिना पर्युपासते॥ अनुतिष्ठंति श्रद्दधानाः संतो मत्परमा यथोक्तोऽहमक्षरात्मा परमो निरति
शया गतिर्येषां ते मत्परमा मद्भक्ताश्च उत्तमां परमार्थज्ञाननिष्ठालक्षणां भक्तिमाश्रिताः ते अतीव मे प्रियाः॥ प्रियो हि ज्ञानिनोऽत्यर्थमि
त्यत्र सूचितं तद्व्याख्यायेहोपसंहृतं॥ भक्तास्तेऽतीव मे प्रिया इति॥ यस्माद्धर्म्यामृतमिदं यथोक्तमनुतिष्ठन् भगवतो विष्णोः परमेश्व
रस्यातीव मे प्रियो भवति॥ तस्मादिदं धर्म्यामृतं मुमुक्षुणा प्रयत्नतोऽनुष्ठेयं विष्णोः प्रियं धाम जिगीषुणेति वाक्यशेषः॥२०॥ ॥
इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यस्य श्रीमद्भगवतः शंकराचार्यस्य कृतौ भगवद्गीताभाष्ये भक्तियोगप्र
प्रोद्घाटनं नाम द्वादशोऽध्यायः॥१२॥

सप्तमाध्याये सूचिते द्वे प्रकृती ईश्वरस्य त्रिगुणात्मिका अष्टधा भिन्ना अपरा संसारहेतुत्वात्॥ परा चान्या जीवभूता क्षेत्रज्ञलक्षणा ईश्वरा
त्मिका याभ्यां ईश्वरो जगदुत्पत्तिस्थितिलयहेतुत्वं प्रतिपद्यते॥ तत्र क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेण तद्वत ईश्वरस्य तत्त्वनिर्द्धा
रणार्थं क्षेत्राध्याय आरभ्यते॥ अतीतानंतराध्याये चाद्वेष्टा सर्वभूतानामित्यादिना यावदध्यायसमाप्तिस्तावत्तत्त्वज्ञानिनां निष्ठा यथा ते
वर्त्तंते इत्येतदुक्तं॥ के पुनस्ते तत्त्वज्ञानेन युक्ता यथोक्तधर्माचरणाद्भगवतः प्रिया भवंतीत्येवमर्थश्चायमध्याय आरभ्यते॥ प्रकृतिश्च त्रिगुणा
त्मिका सर्वकार्यकरणविषयाकारेण परिणता पुरुषस्य भोगापवर्गार्थकर्त्तव्यतया देहेन्द्रियाकारेण संहन्यते सोयं संघातः इदं शरीरं तदे
तत्॥ ॥श्रीभगवानुवाच॥ ॥इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते॥ एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥१॥ इदं सर्वनाम्नोक्तं घा५
विशिनष्टि॥ शरीरमिति॥ हे कौंतेय क्षतत्राणात् क्षयात् क्षरणात् क्षेत्रवदस्मिन् कर्मफलनिर्वृत्तेः क्षेत्रमितीति शब्दः एवंशब्दपद
ार्थकः क्षेत्रमित्येवमभिधीयते कथ्यते। एतच्छरीरं हि क्षेत्रं यो वेत्ति जानाति आपादतलमस्तकं ज्ञानेन विषयीकरोति। स्वाभाविकेनौपदेशिके
न वा। वेदनेन विषयीकरोति विभागशस्तं वेदितारं प्राहुः कथयंति क्षेत्रज्ञ इति इति शब्दः॥ एवंशब्दपदार्थक एवं पूर्ववत् क्षेत्रज्ञ इत्येवमाहुः॥ के
तद्विदः क्षेत्रक्षेत्रज्ञौ ये विदंति ते तद्विदः॥१॥ एवं क्षेत्रज्ञावुक्तौ किमेतावन्मात्रेण ज्ञानेन ज्ञातव्याविति नेत्युच्यते॥ ॥क्षेत्रज्ञं चापि मां विद्धि
सर्वक्षेत्रेषु भारत॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम॥२॥ क्षेत्रज्ञं यथोक्तलक्षणं चापि मां परमेश्वरमसंसारिणं विद्धि जानीहि सर्वक्षेत्रे
षु यः क्षेत्रज्ञः ब्रह्मादिस्तंबपर्यंतानेकक्षेत्रोपाधिप्रविभक्तस्तं निरस्तसर्वोपाधिभेदं सदसदादिशब्दप्रत्ययागोचरं विद्धीत्यभिप्रायः। हे भारत।

क्षयो नाशः क्षरणमपक्षयः ६

स्वाभाविकं मनुष्योहमिति ज्ञानं॥ औपदेशिकं देहो नाहमदस्यत्वादित्यादि॥५

संसाराभावप्रसङ्गस्यानिष्टत्वे हेतुं तत्र माह । प्र॰त्यक्षेति ४

जीवेश्वरयोरेकत्वमुक्तमापद्यते । तन्नेति । जीवेश्वरयोरेकत्वे जीवस्येश्वरे तस्य जीवे वा तद्भावो नाद्यो जीवस्य परस्मादन्यस्याभावे संसारस्य निरालम्बनत्वानुपप
त्त्या परस्यैव तदाश्रयत्वप्रसङ्गादित्यर्थः । द्वितीयं दूषयति ईश्वरेति । जीवे चेदीश्वरो न तर्हि भवति तदापि ततोऽन्यः संसार्यभावात्तस्य च संसारानिष्टेः संसारे जगत्यसङ्गाच्छेदित्व
संसारे॰ ॰राभावे तयोरन्यः पिप्पलमित्त्यादिबन्धशास्त्रस्य तद्गतकर्मविषयकर्मकाण्डस्य चानर्थक्यमीश्वराश्रिते च संसारे तदसाक्षित्वप्रसक्तेर्ज्ञानकाण्डस्य मोक्षोदेशत्वे लेशो
यस्मात्क्षेत्रज्ञेश्वरयाथात्म्यं व्यतिरेकेण न ज्ञानगोचरमन्यदवशिष्टमस्ति तस्मात्क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यज्ज्ञानं क्षेत्रक्षेत्र
ज्ञौ येन ज्ञानेन विषयीक्रियेते तत्तज्ज्ञानं सम्यग्ज्ञानमिति मतमभिप्रायो यं ममेश्वरस्य विष्णोः ॥२॥ ननु सर्वक्षेत्रेष्वेक एवेश्वरो ना
न्यस्तद्व्यतिरिक्तो भोक्ता विद्यते ततईश्वरस्य संसारित्वप्राप्तमीश्वरव्यतिरेकेण वा संसारिणोऽन्यस्याभावात्संसाराभावप्रसङ्गस्तच्चोभयमनि
ष्टं ॥ बन्धमोक्षतद्धेतुशास्त्रानर्थ क्यप्रसङ्गात् । प्रत्यक्षादिप्रमाणविरोधाच्च ॥ प्रत्यक्षेण तावत्सुखदुःखतद्धेतुलक्षणः संसार उपलभ्यते जगद्वैचि
त्र्योपलब्धेश्च । धर्माधर्मनिमित्तः संसारोऽनुमीयते । सर्वमेतदनुपपन्नं । आत्मेश्वरैकत्वे ज्ञानाज्ञानयोरन्यतरत्वोपपत्तेः । दूरमेते विपरी
ते वि षूची अविद्या या च विद्येति ज्ञाता । ज्ञानेन या च तयोर्विद्याविद्ययोर्विषयः फलं च भेदोऽपि विरुद्धो निर्दिष्टः ॥ श्रेयश्च प्रेयश्चेति विद्याविषयः ४
श्रेयः प्रेयस्त्वविद्याकार्यमिति ॥ तथा च व्यासः ॥ द्वाविमावथ पन्थानावित्यादि । इमौ द्वावेव पन्थानौ इत्यादि चेह द्वे निष्ठे उक्ते । विद्या च सह कार्येण
हातव्येति श्रुतिस्मृतिन्यायेभ्योऽवगम्यते ॥ श्रुतयस्तावदिह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः । तमेवं विद्वानमृत इह भव
ति नान्यः पन्था विद्यतेऽयनाय । विद्वान्न बिभेति कुतश्चन ॥ अविदुषस्तु अथ तस्य भयं भवति । अविद्यायामन्तरे वर्तमानाः । ब्रह्मवेद ब्रह्मैव भवति ।
अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानां । आत्मविद्यः सर्वं सर्वं भवति यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमवि
ज्ञाय दुःखस्यान्तो भविष्यति इत्याद्याः सहस्रशः । स्मृतयश्च । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः । इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः । समं पश्य

घः ॥२॥ तार्थस्योत र्थक्यमतो न प्रसङ्गोऽरिष्टेत्यर्थः ॥२॥

तेक्योऽपि संसारित्वमविद्यातो विद्यातोऽसंसारित्वमिति विभागान्नानुपपत्तिरित्युत्तरमाह । नेति ५

सत्यं पुनरावृत्तिवर्जितं कैवल्यं स्यादित्यादि ४ जन्ममरणादिरूपासंसृतिर्विनष्टिः ४

नहि सर्वज्ञत्वाद्याः न्यायतस्त्रासप्यानुद्धानुगमाणि तद्योदयानं ज्ञात्वा मनुष्याः परिवर्ज्जयंति ॥ अज्ञानतमस्यत्र पतंति केचिद्ज्ञाते
फलं पश्य यथा विशिष्टमिति ॥ तथा च देहादिष्वनात्मस्वात्मबुद्धिरविद्वान्रागद्वेषादिप्रयुक्तो धर्माधर्मानुष्ठानकृज्जायते म्रि
यते चेत्येवमवगम्यते । देहादिव्यतिरिक्तात्मदर्शिनो रागद्वेषादिप्रहाणापेक्षधर्माधर्मप्रवृत्त्युपशमान्मुच्यंत इति न केनचित्प्रत्या
ख्यातुं शक्यते न्यायतः ॥ तत्रैवं सति क्षेत्रज्ञस्येश्वरस्यैव सतोऽविद्याकृतोपाधिभेदतः संसारित्वमिव भाति । यथा देहाद्यात्मत्वमा
त्मनः सर्वजंतूनां हि प्रसिद्धो देहादिष्वनात्मस्वात्मभावो निश्चितोऽविद्याकृतो यथा स्थाणौ पुरुषनिश्चयो न चैतावता पुरुषधर्म
स्थाणोर्भवति स्थाणुधर्मो वा पुरुषस्य । तथा न चैतन्यं देहस्य धर्मो देहधर्मो वा चेतनस्य । एवं सुखदुःखमोहात्मकत्वादिरात्मनो न
युक्तः ॥ अविद्याकृतत्वाविशेषाज्जरामृत्युवत् । न अतुल्यत्वादिति चेत् । स्थाणुपु[..]योर्ज्ञेययोरेव सतोर्ज्ञात्राऽन्योन्यस्मिन्नध्यस्ता
विद्या । यदेहात्मनोस्तु ज्ञेयज्ञात्रोरेवेतरेतराध्यास इति न समो दृष्टांतः । तस्माद्देहधर्मो ज्ञेयोऽपि ज्ञातुरात्मनो भवतीति चेन्न । अचेतनत्वा
दिप्रसंगात् । यदि हि ज्ञेयस्य देहादेः क्षेत्रस्य धर्माः सुखदुःखमोहेच्छादयो ज्ञातुरात्मनो भवंति । ज्ञेयस्य क्षेत्रस्य धर्माः केचनात्मनो भवं
त्यविद्याध्यारोपिता जरामरणादयस्तु न भवंतीति विशेषहेतुर्वक्तव्यो न भवतीति । अस्त्यनुमानमविद्याध्यारोपितत्वाज्जरादिव
दिति ॥ हेयत्वादुपादेयत्वाच्चेत्यादि ॥ तत्रैवं सति कर्तृत्वभोक्तृत्वलक्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्याध्यारोपितः । इति न तेन ज्ञातुः किंचिद्दुः

तुल्यत्वमेव प्रपंचयति स्थाणिवत्रि ५

भो

उपाधिधर्माणां सुखादीनामुपाधिहिते जीवे तत्सत्त्वमप्यात्मनि प्रसंगादिति परिहरति ॥ नेति ४

प्रसंगमेव प्रकटयति यदीति २

सुखादिरात्मधर्मो न इति पक्षेऽपि नास्ति विशेषहेतुरित्याशंक्याह । नेति २

तेषां तरे ज्ञेयस्यारोपनियमात् ज्ञातरि नारोपः स्यादित्याशंक्याह यत्विति २

नायं नियमो ज्ञातरि जराद्यानेय स्येकत्वादित्याशंक्याह तस्येति ज्ञेयस्यैव धर्मो ज्ञातरि ध्यानमित्यस्येति यावत् ज्ञाते ज्ञातरि नारोपव्यभिचारशंकेत्यर्थः॥ अत्र

व्यति। यथा बालैरध्यारोपितेऽपि तेनाकाशस्य तलमलवत्त्वादिना॥ एवं सति सर्वक्षेत्रेष्वपि सतो भगवतः क्षेत्रज्ञेश्वरस्य संसारित्वगंध मात्रमपि नाशंक्यं। न हि क्वचिदपि लोकेऽविद्याध्यस्तेन धर्मेण कस्यचिदुपकारोऽपकारो वा दृष्टः। यत्त्वेकेन समो दृष्टांतरत इति॥ तदसत्कथं। अविद्याध्यास्यमात्रं दृष्टांतदार्ष्टांतिकयोः साधर्म्यं विवक्षितं तन्न व्यभिचरति। यत्तु ज्ञातरि व्यभिचरतीति मन्यसे तस्याप्यनैकांतिकत्वं दर्शितं जरादिभिरविद्यावत्त्वात्मदेहजरास्य संसारित्वमिति चेन्नाविद्यायास्तामसत्वात्। तामसो हि प्रत्ययः आवरणात्मकत्वादविद्याविपरीतग्राहकः संशयस्यापको वा अग्रहणात्मको वा विवेकप्रकाशभावे तदभावात्। तामसे चावरणात्मके तिमिरादिदोषे सति अग्रहणादेरविद्यात्रयस्य उपलब्धेरत्नाहैवं तर्हि ज्ञातृधर्मोऽविद्या न करणे चक्षुषि तैमिरिकत्वादिदोषाद्युपलब्धेः। यत्तु मन्यसे ज्ञातृधर्मोऽविद्या तदेव चाविद्याधर्मवत्त्वं क्षेत्रज्ञस्य संसारित्वं त॰ त्रयदुक्तमीश्वर एव क्षेत्रज्ञो न संसारीत्येतदयुक्तमिति। तन्न। यथा करणे चक्षुषि विपरीतग्राहकादिदोषस्य दर्शनान्न विपरीतादिग्रहणं तन्निमित्तो वा तैमिरिकत्वादिदोषो ग्रहीतुः चक्षुषः संस्कारेण तिमिरेऽपनीते ग्रहीतुरदर्शनान्न॥ दोषाद्युपलब्धेरित्यर्थः ग्रहीतुर्धर्मस्तथा सर्वत्रैवाग्रहणविपरीतसंशयप्रत्ययास्तन्निमित्ताः करणस्यैव कस्यचिद्भवितुमर्हति न ज्ञातुः क्षेत्रज्ञस्य संवेद्यत्वाच्च तेषां प्रदीपप्रकाशवन्न ज्ञातृधर्मत्वं ततः संवेद्यत्वादेव स्वात्मव्यतिरिक्तः संवेद्यत्वं सर्वकरणवियोगे च कैवल्ये सर्ववादिभिरविद्यादोषवत्त्वानभ्युपगमादात्मनो यदि क्षेत्रज्ञस्याग्न्युष्णवत्स्वो धर्मस्ततो न कदाचिदपि तेन वियोगः स्यादविक्रियस्य च व्योमवत्सर्वगतस्यात्मनः केनचित्संयोगवियोगानुपपत्तेः सिद्धं च क्षेत्रज्ञस्य नित्यमेवेश्वरत्वमनादित्वान्निर्गुणत्वादित्यादि ईश्वरवचनाच्च। नन्वेवं संसारसंसारित्वाभावे शास्त्रानर्थ-

व२

वेः

क्यादिदोषः स्यादिति॥ न॥ सर्वैरभ्युपगमात् सर्वैरप्यात्मवादिभिरभ्युपगतो दोषो नैके[न] परिहर्त्तव्यो भवति। कथमभ्युपगत इति। मुक्तात्मनां ५
हि संसा[र]संसारित्वव्यवहाराभावः सर्वैरेवात्मवादिभिरिष्यते। न च तेषां शास्त्रानर्थक्यादिदोषप्राप्तिरभ्युपगता। तथा कैः चोत्पन्नात्मनां ईश्व
रैकत्वे सति शास्त्रानर्थक्यं भवत्वविद्याविषये चार्थवत्वं यथा द्वैतिनां सर्वेषां बंधावस्थायामेव शास्त्राद्यर्थवत्वं न तु मुक्तावस्थायां तथात्र
द्वैतिभिरद्वैतिनां न समास्यमिति शंकते ४ द्वैतवादिनामपि। ननु आत्मनो बंधमुक्तावस्थे परमार्थत एव वस्तुभूते द्वैतिनां नः सर्वेषां संसारो हेयो मोक्ष उपादेयो रतो हेयोपादेयतत्साधनस्य
द्भावे शास्त्राद्यर्थवत्वं स्यात् त्वन्मते अद्वैतिनां पुनः द्वैतस्यापरमार्थत्वादविद्याकृतत्वाद् बंधावस्थाया आत्मनोऽपरमार्थत्वे निर्विषयत्वाच्छास्त्राद्या ५
नर्थक्यमिति चेत्। न। आत्मनोऽवस्थाभेदानुपपत्तेः। यदि तावदात्मनो बंधमुक्तावस्थे युगपत्स्यातां क्रमेण वा। युगपत्तावद्विरोधान्न संभवतः स्थि
स्त्रिप्रि त्रै ७ तिगती इव एकस्मिन्। क्रमभावित्वे च निर्निमित्तत्वे अनिर्मोक्षप्रसंगः। अन्यनिमित्तत्वे च स्वतोऽभावादपरमार्थत्वप्रसंगः तथा च सत्यभ्युपगमहा
निः। किंच॥ बंधमुक्तावस्थयोः पौर्वापर्यनिरूपणायां बंधावस्था पूर्वं प्रकल्प्यानादिमत्यंतवती च॥ तच्च प्रमाणविरुद्धं तथा मोक्षावस्थादि
मत्यनंता च प्रमाणविरुद्धैवाभ्युपगम्यते। न चावस्थावतोऽवस्थांतरं गच्छतो नित्यत्वमुपपादयितुं शक्यं। अथानित्यत्वदोषपरिहारायैवं
व२ बंधमुक्तावस्था[illegible]भेदो न कल्प्यते ततो द्वैतिनामपि शास्त्रानर्थक्यादिदोषोऽपरिहार्य एवेति। समानत्वान्नाद्वैतवादिनां परिहर्त्तव्यो दोषः
न च शास्त्रानर्थक्यं यथाप्रसिद्धाविद्वत्पुरुषविषयत्वात् शास्त्रस्य। विदुषां हि फलहेतोरनात्मनो रात्मदर्शनं न विदुषां॥ विदुषां हि फ
लहेतुभ्य आत्मनोऽन्यत्वदर्शने सति तयोरहमित्यादिदर्शनानुपपत्ते। न ह्यत्यंततमः [illegible] उत्पत्त्यादिरपि जलाग्न्योः [illegible] यापृकाशयोरै
रन्यावस्थयोर्न वस्तुत्वमित्याह किंचेति ५

अस्वाभाविकत्वात्केत्स्फुटिकालोहित्यवदिति। स्यते फलितमाह। तयेति वस्तुत्वमिष्यतावस्थयोरवस्तुत्वोपगमादित्यर्थः ६

द्विधिनिषेधशास्त्रमविद्वद्विषयमिति वदता शास्त्रानर्थक्यं समाहितं संप्रति शास्त्रस्य विद्वद्विषयत्वे नैवार्थवत्त्वं शक्यसमर्थनमिति शंकते। नन्विति। प्रकृतिरविद्या ततो
जातौ यौ देहादावात्माभिमानात्मसंबंधौ विद्योदयात्प्रागनुवृत्तौ तदपेक्षया विधिना प्रवर्त्तितो निषेधेन निवर्त्तितोऽस्मीति विधिनिषेधविषयात्मत्वाभिमानो विद्यायां धीपूर्वकौ वेत्य
पितरमधिकृत्य वि... धौ निषेधे वाऽस्य तदनुपपत्तेः। शंकते पुत्रस्य तद्विषयो धीरिष्टा संप्रतिपत्त्या शेषानुपपत्तेः न स्य पुत्रकार्यता प्रतिपादनात् पुत्रं चाधिकृत्य विधिनिषेधप्रव
कोऽत्मतां पश्यति किं मृतविवेकी तस्मान्नाविधिनिषेधशास्त्रं तावत्फलहेतुभ्यामात्मनोऽन्यत्वदर्शिनो भवति। न हि देवदत्त त्वमिदं कुर्विति
कोऽसिं श्रिक्लक मीति नियुक्ते विष्णुमित्रो हं नियुक्तं इति तदस्यैव नियोगं प्रत्यक्तोऽपि प्रतिपद्यते। नियोगविषये विवेकाग्रहणान्नोपपद्यते॥
प्रतिपत्तिस्तथा फलहेत्वोरपि तन्नु प्राकृतसंबंधापेक्षया युक्तैव प्रतिपत्तिः शास्त्रार्थविषया फलहेतुभ्यामन्यात्मत्वदर्शनेऽपि सति इष्टफलहेतोः
प्रवर्त्तितोऽस्म्यनिष्टफलहेतोश्च निवर्त्तितोऽस्मीति। यथा पितृपुत्रादीनामितरेतरात्मान्यत्वदर्शने सत्यप्यन्योन्यनियोगप्रतिषेधार्थप्रतिपत्तिर्न
व्यतिरिक्तात्मदर्शनप्रतिपत्तेः प्रागेव फलहेत्वोरात्माभिमानस्य प्रसिद्धत्वात् प्रतिपन्ना नियोगप्रतिषेधार्थ हि फलहेतुभ्यामात्मनोऽन्यत्वं प्रतिप
द्यते न पूर्वं तस्माद्विधिप्रतिषेधशास्त्रं ... मविद्वद्विषयमिति सिद्धं। ननु स्वर्गकामो यजेतकलंजं न भक्षयेदित्यादौ आत्मव्यतिरेकदर्शिनामप्रवृ
त्तौ केवलदेहाद्यात्मदृष्टीनां चातः कर्त्तुरभावाच्छास्त्रानर्थक्यमिति चेत् न। यथाप्रसिद्धित एव प्रवृत्तिनिवृत्त्युपपत्तेरीश्वरात्मैकत्वदर्शी ब्रह्मवि
त्तावन्न प्रवर्त्तते। तथा नैरात्म्यवाद्यपि नास्ति परलोक इति न प्रवर्त्तते। यथाप्रसिद्धस्तु विधिप्रतिषेधशास्त्रश्रवणान्यथानुपपत्त्यानुमितात्मास्ति
त्वमात्मविशेषानभिज्ञः कर्मफलसंजाततृष्णः श्रद्धानू तया च प्रवर्त्तत इति सर्वेषां नः प्रत्यक्षमतो न शास्त्रानर्थक्यमिति विवेकिनामप्रवृत्तिदर्शनात्तद
नुगामिनामप्रवृत्तौ शास्त्रानर्थक्यमिति चेत् न। कस्यचिदेव विवेकोपपत्तेरनन्तेषु हि प्राणिषु कश्चिदेव विवेकी स्याद्यथेदानीं न च विवेकिनो
मनुवर्त्तते मूढा रागादिदोषतंत्रत्वात्। तत्प्रवृत्तेरभिचरणादौ च प्रवृत्तिदर्शनात् स्वाभाव्याच्च प्रवृत्तेः स्वभावस्तु प्रवर्त्तत इति ह्युक्तं। तस्माद

किं च सर्वापेक्षाधिकरणे सम्यग्ज्ञानस्याहृत्य साध्यत्वोक्तेः विधिनिषेधार्थानु
ष्ठानं सम्यग्ज्ञानात्पूर्वमिति कुतो विदुषस्तदनुष्ठानमित्याह। प्रतिपन्नेति॥

ते
षां पारवंल्लौकि
कमोहे प्रतिप
त्त्यभावादित्यर्थः
५

र्थः ...
नोऽतस्य तदश
क्तौ पितृत्वाद
र्थाधीरुपग
ता ४
पुत्रादीनामि
त्याभिमानोऽनि
योनियोगधीपू
र्वा न तद्दर्शनं
स्तु तदभावान्न
देहादिसंबंधा
धीना नियोग
धीरिति परिहृ
राभिनेति ४
रहोऽत्र जोकल
..५

८४
गी भा

किं पाण्डित्यं देहाद्यात्मदर्शनं किं वा कूटस्थात्मदृष्टिराहो संसारित्वादिधीरिति विकल्प्याद्ये दूषयति शृण्विति

चार

विद्यामात्रः संसारो यथादृष्टविषय एव न क्षेत्रज्ञस्य केवलस्याविद्या तत्कार्यं च न च मिथ्याज्ञानं परमार्थवस्तु दूषयितुं समर्थं न ह्यूषरदेशं स्नेहे
न पङ्कीकर्तुं शक्नोति मरीच्युदकं तथाऽविद्या क्षेत्रज्ञस्य न किंचित्कर्तुं शक्नोत्यतश्चेदमुक्तं क्षेत्रज्ञं पि मां विद्धि अज्ञानेनावृतं ज्ञानमिति॥
अथ किमिदं संसारिणामिव अहमेवं ममैवेदमिति पण्डितानामपि शृणु तावदिदं तत्पाण्डित्यं यत्क्षेत्र एवात्मदर्शनं यदि पुनः क्षेत्रज्ञमविक्रियं
पश्येयुस्ततो न भोगं कर्म वा काङ्क्षेयुर्मम स्यादिति। विक्रियैव हि भोगकर्मणी अथैवं सति फलार्थित्वादविद्वा न्प्रवर्तते। इदं त्वन्यत्पाण्डित्यं क
वैशेषिकमतानुसारिणः ५ स्यचिदस्तु क्षेत्रज्ञ ईश्वर एव क्षेत्रं चान्यत्क्षेत्रज्ञस्य विषयः। अहं तु संसारी सुखी दुःखी च मम्रो जातो मृतो वियुक्तः क्षीणः वृद्धोऽहं ममैव मादयः सर्वे
ऽऽत्मनि स्वध्यारोप्यते संसारोपरमश्च मम कर्तव्यः। क्षेत्रक्षेत्रज्ञविज्ञानेन ध्यानेन चेश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेनेति यश्चैवं बु
ध्यते यश्चैवं बोधयति नासौ क्षेत्रज्ञ इत्येवं मन्वानो यः स पण्डितापसदः संसारमोक्षयोः शास्त्रस्यार्थवत्त्वं करोमीत्यात्महा स्वयं मूढोऽन्यांश्च व्यामोह
यति शास्त्रार्थसंप्रदायरहितत्वात् श्रुतहानिमश्रुतकल्पनां च कुर्वंस्तस्मादसंप्रदायवित्सर्वशास्त्रविदपि मूर्खवदेवोपेक्षणीयः। यत्तूक्तमीश्व
रस्य क्षेत्रज्ञै कत्वे संसारित्वं प्राप्नोति। क्षेत्रज्ञानां चेश्वरैकत्वे संसारिणोऽभावात्संसाराभावप्रसंगस्त्येतौ दोषौ प्रत्युक्तौ विद्याविद्ययोर्वै
लक्षण्याभ्युपगमादिति॥ कथमविद्यापरिक ल्पितदोषेण तद्विषयं वस्तु पारमार्थिकं न दुष्यतीति। तथा च दृष्टान्तो दर्शितो मरीच्यम्भ
सोषरदेशो न पङ्कीक्रियत इति। संसारिणोऽभावात्संसाराभावप्रसंगदोषोऽपि संसार संसारिणोरविद्याकल्पितोपपत्त्या प्रत्युक्तः॥
नन्वविद्यावत्त्वमेव क्षेत्रज्ञस्य संसारित्वमुक्तं एवं क्षेत्रज्ञस्य दोषस्तत्कृतं च दुःखित्वादि प्रत्यक्षमु पलभ्यते। न ज्ञेयस्य क्षेत्रधर्मत्वात्॥

ज्ञातुः क्षेत्रज्ञस्य तत्कृतदोषानुपपत्तेः। यावत्किंचिद्धि क्षेत्रज्ञस्य दोषजातमविद्यमानमासंजयति तस्य ज्ञेयत्वोपपत्तेः॥ क्षेत्रधर्मत्वमेव न क्षेत्र
ज्ञधर्मत्वं। न च तेन क्षेत्रज्ञो दुष्यति ज्ञेयेन ज्ञातुः संसर्गानुपपत्तेः॥ यदि हि संसर्गः स्यात् ज्ञेयत्वमेव नोपपद्यते। यद्यात्मनो धर्मोऽविद्या
वत्त्वं दुःखित्वादि च कथं भोः प्रत्यक्षमुपलभ्यन्ते कथं वा क्षेत्रधर्माः ज्ञेयं च सर्वं क्षेत्रं ज्ञातैव क्षेत्रज्ञ इत्यवधारिते अविद्यादुःखित्वादेः क्षेत्रज्ञ
धर्मत्वं तस्य च प्रत्यक्षोपलभ्यत्वमिति विरुद्धमुच्यते। अविद्यामात्रावष्टंभात्केवलमत्राह। साविद्या कस्येति यस्य दृश्यते तस्यैव। कस्य
दृश्यत इत्यत्रोच्यते। अविद्या कस्य दृश्यत इति प्रश्नो निरर्थकः॥ कथं दृश्यते चेदविद्या तद्वंतमपि पश्यसि। न च तद्वत्युपलभ्यमाने
सा कस्येति प्रश्नो युक्तो न हि गोमत्युपलभ्यमाने गावः कस्येति प्रश्नोऽर्थवान्भवेत्। ननु विषमो दृष्टांतो गवां तद्वतश्च प्रत्यक्षत्वात्त
त्संबंधोऽपि प्रत्यक्ष इति प्रश्नो निरर्थकः। न तथाविद्या तद्वांश्च प्रत्यक्षौ यतः प्रश्नो निरर्थकः स्यात्। अप्रत्यक्षेणाविद्यावताऽविद्यासंबंधे ज्ञा
ते किं तव स्यात् अविद्याया अनर्थहेतुत्वात् परिहर्तव्या स्यात्। यस्याविद्या स तां परिहरिष्यति। ननु ममैवाविद्या। जानासि तर्ह्यविद्यां तद्वं तं
चात्मानं। जानामि न तु प्रत्यक्षेण। अनुमानेन चेज्जानासि कथं संबंधग्रहणं। न हि तव ज्ञातुर्ज्ञेयभूतया। विद्यया तत्काले संबंधो ग्रहीतुं
शक्यते। अविद्याविषयत्वेनैव ज्ञातुरुपयुक्तत्वात्। न च ज्ञातुरविद्यायाश्च संबंधस्य यो ग्रहीता ज्ञानं चान्यत्तद्विषयं संभवति। अनवस्था
प्राप्तेः। यदि ज्ञात्रापि ज्ञेयसंबंधो ज्ञायेतान्यो ज्ञाता कल्प्यः। स्यात्तस्याप्यन्यस्तस्याप्यन्य इत्यनवस्था अपरिहार्या। यदि पुनरविद्या ज्ञेया।
न्यद्वा ज्ञेयं ज्ञेयमेव तथा ज्ञाताऽपि ज्ञातैव न ज्ञेयं भवति। सदा चैवमविद्यादुःखित्वाद्यैर्न ज्ञातुः क्षेत्रज्ञस्य किंचिद् दुष्यति। नन्वयमेव दोषो य
य

दोषवत् क्षेत्रविज्ञातृत्वेन विज्ञानस्वरूपस्यैवाविक्रियस्य विज्ञातृत्वोपचारात्। यथोष्णतामात्रेणाग्नेस्तापक्रियोपचारस्तद्वद्यथात्र
भगवता क्रियाकारकफलात्मत्वाभाव आत्मनि स्वत एव दर्शितः अविद्याध्यारोपितमेव क्रियाकारकाद्यात्मन्युपचर्यते। तथा तत्र तत्र
य एवं वेत्ति हन्तारं प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। नादत्ते कस्यचित्पापमित्यादिप्रकरणेषु दर्शितस्तथैव च व्याख्यातमस्मा-
भिः। उत्तरेषु च प्रकरणेषु दर्शयिष्यामः। हन्त तर्ह्यात्मनि क्रियाकारकफलात्मतया स्वतोऽभावे अविद्ययाध्यारोपितत्वे कर्माण्यविद्वत्कर्तव्या-
न्येव न विदुषामिति प्राप्तमेतत्तदेव च न हि देहभृता शक्यमित्यत्र दर्शयिष्यामः। सर्वशास्त्रार्थोपसंहारप्रकरणे च समासेनैव कौन्ते-
य निष्ठा ज्ञानस्य या परेत्यत्र विशेषतो दर्शयिष्यामः। अलमिह बहुप्रपञ्चेनेत्युपसंह्रियते। इदं शरीरमित्यादिश्लोकोपदिष्टस्य क्षेत्राध्या-
यार्थस्य संग्रहश्लोक उपन्यस्यते। तत्क्षेत्रं यच्चेत्यादि व्याचिख्यासितस्य ह्यर्थस्य संग्रहोपन्यासो न्याय्य इति निर्दिष्टमिदं शरीरमिति॥
तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत्॥ स च यो यत्प्रभावश्च तत्समासेन मे शृणु॥ ३॥ ॥ यन्निर्दिष्टमिदं शरीरमिति तत्तच्छब्देन प-
रामृशति। यच्चेदं निर्दिष्टं क्षेत्रं तत्तद्यादृक् यादृशं स्वकीयैर्धर्मैः। चशब्दः समुच्चयार्थः। यद्विकारि यो विकारो यस्य तद्यद्विकारि। यतो य-
स्माच्च यत्कार्यमुत्पद्यत इति वाक्यशेषः। स च यः क्षेत्रज्ञो निर्दिष्टः स यत्प्रभावः। ये प्रभावा उपाधिकृताः शक्तयो यस्य स यत्प्रभावः॥ तत्क्षेत्र-
क्षेत्रज्ञयोर्याथात्म्यं यथाविशेषितं समासेन संक्षेपेण मम वाक्यतः शृणु श्रुत्वावधारयेत्यर्थः॥ ३॥ तत्क्षेत्रक्षेत्रज्ञयाथात्म्यं विवक्षितं स्तौति
श्रोतृबुद्धिप्ररोचनार्थं॥ ॥ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्॥ ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥ ४॥ ऋषिभिर्वसि-

ष्ठादिभिः बहुधा बहुप्रकारं गीतं कथितं। छंदोभिः छंदांस्यृगादीनि तैः छंदोभिर्विविधैर्नानाप्रकारैः पृथक् विवेकतो गीतं॥ किंच॥ ब्रह्म
सूत्रपदैश्चैव ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते ज्ञायते ब्रह्मेति पदान्युच्यंते तैरेव क्षेत्रक्षेत्रज्ञयाथात्म्य
गीतमित्यनुवर्त्तते॥ आत्मेत्येवोपासीतेत्यादिभिर्ब्रह्मसूत्रपदैरात्मा ज्ञायते। हेतुमद्भिर्युक्तियुक्तैर्विनिश्चितैर्न संशयरूपैर्निश्चितप्रत्य
योत्पादकैरित्यर्थः॥४॥ क्षेत्रस्वरूपमाह [illegible] णोपाधितयाह भगवान्॥ ॥महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च॥ इंद्रियाणि दशै
कं च पंच चेन्द्रियगोचराः॥५॥ महाभूतानि महांति च तानि भूतानि सर्वविकारव्यापकत्वात् तेन तानि च सूक्ष्माणि स्थूलानीन्द्रिय
गोचरशब्देनाभिधास्यंते। एवमहंकारो महाभूतकारणमहंप्रत्ययलक्षणो ऽहंकारः। अहंकारकारणं बुद्धिरध्यवसायलक्ष
णा तत्कारणमव्यक्तमेव न व्यक्तमव्याकृतमीश्वरशक्तिर्मम माया दुरत्ययेत्युक्ता। एवशब्दः प्रकृत्यवधारणार्थः। एतावत्येव प्र
वास्थाभिन्ना प्रकृतिः। चशब्दो भेदसमुच्चयार्थः। इंद्रियाणि दश श्रोत्रादीनि पंच बुद्ध्युत्पादकत्वात् बुद्धीन्द्रियाणि। वाक्पाण्या
दीनि पंच कर्मनिर्वर्त्तकत्वात्कर्मेन्द्रियाणि तानि दश। एकं च। किं तन्मन एकादशं संकल्पाद्यात्मकं। पंच चेन्द्रियगोचराः शब्दाद
यो विषयास्तान्येतानि सांख्याश्चतुर्विंशतितत्त्वान्याचक्षते॥५॥ अथेदानीमात्मगुणानिति यानाचक्षते वैशेषि[illegible]न्येकान्येपि
क्षेत्रधर्मा एव न तु क्षेत्रज्ञस्येत्याह भगवान्॥ ॥इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः॥ एतत्क्षेत्रं समासेन सविकारमुदाहृ
तं॥६॥ ॥इच्छा यज्जातीयं सुखात्मकमर्थमुपलब्धवान् पूर्वं पुनस्तज्जातीयमुपलभमानस्तमादातुमिच्छति। सुखहेतुरि

तिसैयमिच्छा। तःकरणधर्मो ज्ञेयत्वात्क्षेत्रं। तथा द्वेषो यज्जातीयमर्थं दुःखहेतुत्वेनानुभूतवान् पुनस्तज्जातीयमुपलभमानस्तं द्वेष्टि सो
ऽयं द्वेषो ज्ञेयत्वात्क्षेत्रमेव। तथा सुखमनुकूलं प्रसन्नं सत्वात्मकं ज्ञेयत्वात्क्षेत्रमेव। दुःखं प्रतिकूलात्मकं ज्ञेयत्वात्तदपि क्षेत्रं। संघातो दे
हेन्द्रियाणां संहतिस्तस्यामभिव्यक्तांतःकरणवृत्तिस्तप्त इव लोहपिंडेऽग्निरात्मचैतन्याभासरसविद्धा चेतना सा च क्षेत्रं ज्ञेयत्वात्। धृति
र्ययावसादप्राप्तानि देहेन्द्रियाणि ध्रियंते सा च ज्ञेयत्वात्क्षेत्रं। सर्वांतःकरणधर्मोपलक्षणार्थमिच्छादिग्रहणं। यदुक्तं तदुपसंहरति॥ ए
तत्क्षेत्रं समासेन सविकारं सह विकारेण महदादिनोदाहृतं उक्तं॥६॥ यस्य क्षेत्रभेदजातस्य संहतिः इदं शरीरं क्षेत्रमित्युक्तं तत्क्षेत्रं
व्याख्यातं महाभूतादिभेदभिन्नं धृत्यंतं क्षेत्रज्ञो वक्ष्यमाणविशेषणो यस्य सप्रभावस्य क्षेत्रज्ञस्य परिज्ञानादमृतत्वं भवति तत् ज्ञेयं यत्तत्प्र
वक्ष्यामीत्यादिना सविशेषणं स्वयमेव वक्ष्यति भगवान्। अधुना तु तत्ज्ञानसाधनगणममानित्वादिलक्षणं यस्मिन्सति तस्य ज्ञेयविज्ञानयो
ग्योधिकृतो भवति तत्परः संन्यासी ज्ञाननिष्ठ उच्यते। तममानित्वादिगणं ज्ञानसाधनत्वात्ज्ञानशब्दवाच्यं विदधाति भगवान्॥ ॥
अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं। आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥७॥ अमानित्वं मानिनो भावो मानित्वमात्मनः श्लाघि
त्वं तदभावोऽमानित्वं। अदंभित्वं स्वधर्मप्रकटीकरणं दंभित्वं तदभावः। अहिंसा अहिंसनं प्राणिनामपीडनं। क्षांतिः परापरादियोगेनसेवनं। (
शौचं कायमलानां मृज्जलाभ्यां क्षालनं। अंतःकरणस्य प्रतिपक्षभावनया रागादिमलानामपनयः शौचं। स्थैर्यं स्थिरभावो मोक्ष
मार्गे एव कृताध्यवसायत्वं। आत्मविनिग्रहः आत्मोपकारितया आत्मशब्दवाच्यस्य कार्यकरणसंघातस्य विनिग्रहः स्वभावेन सर्वतः

प्रवृत्तस्य सन्मार्ग एव निरोधः आत्मविनिग्रहः ॥ किंच ॥ ॥इन्द्रियार्थेषु वैराग्यमनहंकार एव च। जन्ममृत्युजराव्याधिदुःखदोषानुद
र्शनं ॥८॥ इन्द्रियार्थेषु शब्दादिषु दृष्टादृष्टेषु विषयभोगेषु विरागभावो वैराग्यं। अनहंकारः अहंकाराभाव एव च जन्ममृत्युजराव्याधिदुःख
दोषानुदर्शनं जन्म च मृत्युश्च जरा च व्याधयश्च दुःखानि च तेषु जन्मादिषु दुःखांतेषु प्रत्येकं दोषानुदर्शनं। जन्मनि गर्भवासयोनिद्वार
निःसारणं दोषस्तस्यानुदर्शनं आलोचनं। तथा मृत्यौ स्वभावितपश्चादिजन्मदोषानुदर्शनं। तथा जरायां प्रज्ञाशक्तितेजोनिरोधा
नुदर्शनं परिभूतता चेति। तथा व्याधिषु शिरोरोगादिषु दोषानुदर्शनं। दुःखेषु अध्यात्माधिभूताधिदैवनिमित्तेषु। अथवा दुःखान्येव दो
षो दुःखदोषस्तस्य जन्मादिषु पूर्ववत् दर्शनं दुःखं जन्म दुःखं जरा दुःखं मृत्युः दुःखं व्याधयो दुःखनिमित्तत्वात् जन्मादयो दुःखं दुःखानि
पुनः स्वरूपेणैव दुःखमित्येवं जन्मादिदुः दुःखदोषादिदर्शनाद्देहेन्द्रियविषयाणां भोगेषु वैराग्यमुपजायते। ततः प्रत्यगात्मनि व
त्तिः करणानामात्मदर्शनाय। एवं ज्ञानहेतुत्वात् ज्ञानमुच्यते जन्मादिदुःखदोषानुदर्शनं ॥८॥ किंच ॥ असक्तिरनभिष्वंगः पुत्रदा
रगृहादिषु ॥ नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥९॥ असक्तिः सक्तिः संगनिमित्तेषु विषयेषु प्रीतिमात्रं तदभावो असक्तिः। अनभि
ष्वंगः अभिष्वंगाभावः। अभिष्वंगो नाम आसक्तिविशेष एव अनन्यात्मभावनालक्षणो यथा अन्यस्मिन् सुखिनि दुःखिनि वा अहमेव
सुखी दुःखीति जीवति मृते वा अहमेव जीवामि मरिष्यामि चेति ॥ क्वेत्याह ॥ पुत्रदारगृहादिषु। पुत्रेषु दारेषु गृहेषु आदिशब्दादन्येष्व
प्यत्यंतेष्टेषु दासवर्गादिषु तच्चोभयं ज्ञानार्थत्वात् ज्ञानमुच्यते ॥ नित्यं च समचित्तत्वं तुल्यचित्तता ॥ क्व। इष्टानिष्टोपपत्तिषु। इष्टानामनिष्टा

नां चोपपत्तयः संप्राप्तयः तास्विष्टानिष्टोपपत्तिषु नित्यमेव तुल्यचित्तता इष्टोपपत्तिषु न हृष्यति। न कुप्यति चानिष्टोपपत्तिषु। तच्चैतन्नि-
त्यं समचित्तत्वं ज्ञानं॥९॥ किंच॥ ॥मयि चानन्ययोगेन भक्तिरव्यभिचारिणी। विविक्तदेशसेवित्वमरतिर्जनसंसदि॥१०॥ मयि चेश्वरे
ऽनन्ययोगेनापृथक्समाधिना नान्यो भगवतो वासुदेवात्परोऽस्त्यतः स एव नो गतिरित्येवं निश्चिताऽव्यभिचारिणी बुद्धिरनन्ययोगस्तेन भ-
जनं भक्तिर्नव्यभिचरणशीलाऽव्यभिचारिणी सा च ज्ञानं। विविक्तदेशसेवित्वं विविक्तः स्वभावतः संस्कारेण वाऽशुच्यादिभिः सर्पव्याघ्रा-
दिभिश्च रहितः अरण्येनदीपुलिनदेवगृहादिर्विविक्तो देशस्तं सेवितुं शीलमस्येति विविक्तदेशसेवी तद्भावो विविक्तदेशसेवित्वं विविक्तेषु दे-
शेषु चित्तं प्रसीदति यतस्ततः आत्मादिभावना विविक्ते उपजायते। अतो विविक्तदेशसेवित्वं ज्ञानमुच्यते। अरतिररमणं जनसंसदि जनानां प्राकृ-
तानां संस्कारशून्यानां अविनीतानां कलहोत्सुखितचित्तानां समवाये जनसंसन्न संस्कारवतां सैन विनीतानां संसत्तस्या ज्ञानोपकारकत्वात्।
अतः प्राकृतजनसंसद्यरतिर्ज्ञानार्थत्वाज्ज्ञानं॥१०॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं॥ एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथा॥११॥
अध्यात्मज्ञाननित्यत्वमात्मादिविषयं ज्ञानमध्यात्मज्ञानं तस्मिन्नित्यभावो नित्यत्वं अमानित्वादीनां ज्ञानसाधनानां भावनापरिपाकनिमित्तं तत्त्वज्ञानं
तस्यार्थो मोक्षः संसारोपरमः तस्यालोचनं तत्त्वज्ञानार्थदर्शनं तत्त्वज्ञानफलालोचने हि तत्साधनानुष्ठाने प्रवृत्तिः स्यादित्येतदमानित्वादि त-
त्त्वज्ञानार्थदर्शनांतमुक्तं ज्ञानमिति प्रोक्तं ज्ञानार्थत्वात्। अज्ञानं यदतस्माद्यथोक्तादन्यथा विपर्ययेण मानित्वं दंभित्वं हिंसाऽक्षांतिरनार्जव-
मित्याद्यज्ञानं विज्ञेयं परिहरणाय संसारप्रवृत्तिकारकत्वादिति॥११॥ यथोक्तेन ज्ञानेन ज्ञातव्यं किमित्याकांक्षायामाह। ज्ञेयं यत्तदित्यादि॥

ननु यमनियमाव तस्य ज्ञेयस्य परिच्छेदकं दृश्यते न ह्यन्यविषयेण ज्ञानेनान्यदुपलभ्यते। यथा घटविषयेण ज्ञानेनाग्निरिति नैष दोषः।
ज्ञाननिमित्तत्वाज्ज्ञानमित्युच्यते तत्सहकारिकारणत्वाच्च॥ ॥ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते। अनादिमत्परं ब्र
ह्म न सत्तन्नासदुच्यते॥१२॥ ज्ञेयं ज्ञातव्यं यत्तत्प्रवक्ष्यामि प्रकर्षेण यथावद्वक्ष्यामि। किंफलं तदिति प्ररोचनेन श्रोतुरभिमुखीकरणाय
आह। यज्ज्ञेयं ज्ञात्वा अमृतमश्नुते न पुनर्म्रियत इत्यर्थः अनादिमत्। आदिरस्यास्तीति आदिमत्। न आदिमत् अनादिमत्। किं तत्परं निरतिश
यं ब्रह्म ज्ञेयमिति प्रकृतं। अत्र केचिदनादि मत्परमिति पदं छिंदंति। बहुव्रीहिणोक्तेर्थे मतुप आनर्थक्यमनिष्टं स्यादित्यर्थः। विशेषं च दर्श
यंति। अहं वासुदेवाख्या परा शक्तिर्यस्य तत् मत्परमिति। सत्यमेवमपुनरुक्तं स्यादर्थश्चेत्संभवति। न त्वर्थः संभवति ब्रह्मणः सर्वविशेषप्र
तिषेधेनैव विजिज्ञापयिषितत्वात् न सत्तन्नासदुच्यत इति विशिष्टशक्तिमत्प्रदर्शनं विशेषप्रतिषेधश्चेति विप्रतिषिद्धं। तस्मान्मतुपो बहु
व्रीहिणा समानार्थत्वेपि प्रयोगः श्लोकपूरणार्थः। अमृतत्वफलं ज्ञेयं मयोच्यत इति प्ररोचनेनाभिमुखीकृत्याह। न सत्तन्नासदुच्य
ते। न चासदिति॥१२॥ ॥ननु महता परिकरबंधेन कंठरवेणोद्घुष्य ज्ञेयं प्रवक्ष्यामीति अननुरूपमुक्तं न सत्तन्नासदुच्यते। न
ना। अत्यनुरूपमेवोक्तं। कथं। सर्वासु उपनिषत्सु ज्ञेयं ब्रह्म नेति नेति अस्थूलमनणु इत्यादिविशेषप्रतिषेधेनैव निर्दिश्यते। नेदं तदिति
वाचोऽगोचरत्वात्। ननु तदस्ति यद्वस्तु अस्तिशब्देन नोच्यते। अथास्तिशब्देन नोच्यते नास्ति तद्विज्ञेयं प्रतिषिद्धं च ज्ञेयं तदस्ति नास्तिश
ब्देन नोच्यत इति। न तावन्नास्ति बुद्ध्यविषयत्वात्। ननु सर्वा बुद्धयोऽस्तिनास्तिबुद्ध्यनुगता एव। तत्रैवं सति ज्ञेयमप्यस्तिबुद्ध्य

नुगतप्रत्ययविषयं चास्यात् । नास्ति बु[illegible]द्ध्यनुगतप्रत्ययविषयं वास्यान्नो । तीन्द्रियत्वेनोऽयं बुद्ध्यनुगतप्रत्ययाविषयत्वात् । यद्धी
न्द्रियगम्यं वस्तु घटादिकं तदस्तिबुद्ध्यनुगतप्रत्ययविषयं वास्यात् । नास्तिबुद्ध्यनुगतप्रत्ययविषयं वास्यादिदं तु ज्ञेयमतीन्द्रियत्वेन
शब्दैकप्रमाणगम्यत्वात् । न घटादिवदुभयगतप्रत्ययविषयमित्यतो न सत्तन्नासदुच्यते । यत्तूक्तं विरुद्धमुच्यते । ज्ञेयं न सत्तन्ना
सदुच्यते इति । न विरुद्धमन्यदेव तद्विदितादथो अविदितादधीति । तेश्रुतेः । श्रुतिरपि विरुद्धार्थेति [illegible] चेत् । यथा यज्ञाय शालामारभ्य
कोऽहितद्वेद यद्यमुष्मिन्लोकेऽस्ति वा न वेति ह । वक्ष्यतीति चेत् । न । विदिताविदितान्यत्वश्रुतेरवश्यं विज्ञेयार्थप्रतिपादनपरत्वात् । यद्यमु
ष्मिन्नित्यादि तु विधिशेषोऽर्थवादः । उपपत्तेश्च सदादिशब्दैर्ब्रह्म नोच्यत इति सर्वो हि शब्दोऽर्थप्रकाशनाय प्रयुक्तः श्रूयमाणश्श्रोतृ
भिर्जातिक्रियागुणसंबन्धद्वारेण संकेतग्रहणसव्यपेक्षोऽर्थं प्रत्याययति नान्यथा । दृष्टत्वात् । यथा गौरश्व इति जातितः । पचति पठ
तीति वा क्रियातः शुक्लः कृष्ण इति वा गुणतः । धनी गोमानिति वा संबन्धतः । न तु ब्रह्म जातिमदतो न सदादिशब्दवाच्यं । नापि गुणवद्येन गु
णशब्देनोच्येत निर्गुणत्वात् । नापि क्रियाशब्दवाच्यं निःक्रियत्वान्निःक्रियं शान्तमिति श्रुतेः । न च संबन्ध्येकत्वादद्वयत्वादविषयत्वादात्म
त्वा[illegible]च्च न केनचिच्छब्देनोच्यत इति युक्तं । यतो वाचो निवर्तन्त इत्यादिश्रुतिभ्यश्च । सच्छब्दप्रत्ययाविषयत्वादसत्वाशंकायां ज्ञेय[illegible]
[illegible]स्य सर्वप्राणिकरणोपाधिद्वारेण तदस्तित्वं प्रतिपादयंस्तदाशंकानिवृत्त्यर्थमाह ॥ सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमु
खं ॥ सर्वतः श्रुतिमल्लोके सर्वमावृ[illegible]त्य तिष्ठति ॥ १३ ॥ सर्वतःपाणिपादं सर्वतःपाणयःपादाश्चास्येति सर्वतःपाणिपादं तत् ज्ञेयं

श्रुतिर्विरुद्धा
र्थेति चेन्न प्राम
ण्ये दृष्टान्तमाह
। यथेति ॥ ४

सर्वप्राणिकरणोपाधिभिः क्षेत्रज्ञास्तित्वं विभाव्यते तत् क्षेत्रज्ञश्च क्षेत्रधर्मोपाधित उच्यते। क्षेत्रं पाणिपादादिभिरनेकधा भिन्नं क्षेत्रोपाधि
भेदकृतं च विशेषजातं मिथ्यैव क्षेत्रज्ञस्यापि तदपनयेन ज्ञेयत्वमुक्तं। न सत्तन्नासदुच्यते इति। उपाधिकृतं मिथ्यारूपमप्यस्तित्वाधिग
माय ज्ञेयधर्मवत्परिकल्प्योच्यते सर्वतःपाणिपादमित्यादि। तथा हि॥ संप्रदायविदां वचनमध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यत इ
ति सर्वत्र सर्वदेहावयवत्वेन गम्यमानाः पाणिपादयो ज्ञेयशक्तिसद्भावनिमित्तस्वकार्या इति ज्ञेयसद्भावे लिंगानि ज्ञेयस्येत्यु
पचारत उच्यते। तथा व्याख्येयमन्यत् सर्वतःपाणिपादं तत् ज्ञेयं। सर्वतोक्षिशिरोमुखं। अक्षीणि शिरांसि मुखानि च यस्य
तत् सर्वतःश्रुतिमत् श्रुतिः श्रवणेंद्रियं तद्यस्य तत् श्रुतिमत्। लोके प्राणिनिकाये सर्वमावृत्य संव्याप्य तिष्ठति। स्थितिं लभते च
लतीर्थः॥१३॥ उपाधिभूतपाणिपादादींद्रियाध्यारोपणात् ज्ञेयस्य तद्वत्ताशंका मा भूदित्येवमर्थः श्लोकारंभः॥ ॥सर्वेंद्रिय
गुणाभासं सर्वेंद्रियविवर्जितं॥ असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥१४॥ सर्वेंद्रियगुणाभासं। सर्वाणि च तानींद्रियाणि श्रोत्रा
दीनि बुद्धींद्रियकर्मेंद्रियाख्यान्यंतःकरणे च बुद्धिमनसी ज्ञेयोपाधित्वस्य तुल्यत्वात् सर्वेंद्रियग्रहणेन गृह्यंते। अपि चांतःकरणो
पाधिद्वारेणैव श्रोत्रादीनामप्युपाधित्वमिति। अतोंतःकरणबहिःकरणोपाधिभूतैः सर्वेंद्रियगुणैरध्यवसायसंकल्पश्रवणवचनादि
भिरवभासते सर्वेंद्रियगुणाभासं सर्वेंद्रियव्यापारैर्व्यापृतमिव तत् ज्ञेयमित्यर्थः। ध्यायतीव लेलायतीवेति श्रुतेः। कस्मात्पुनः कारणान्न
व्यापृतं ज्ञेयमेवेति गृह्यत इत्याह। सर्वेंद्रियविवर्जितं सर्वकरणरहितमित्यर्थः। अतो न करणव्यापारैर्व्यापृतं तत् ज्ञेयं मंत्रः। अपा

णिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तमित्यादि सर्वेन्द्रियोपाधिगु
णानुगुण्यभजनशक्तिमत् ज्ञेयमित्येवं प्रदर्शनार्थः। न तु साक्षादेव जवनादिक्रियासंवेदपदर्शनार्थः॥ अन्धो मणिमविन्ददित्यादिमन्त्रार्थवत्त
स्य मन्त्रस्यार्थः। यस्मात्सर्वप्रकारवर्जितं ज्ञेयं तस्मादसक्तं सर्वसंश्लेषवर्जितं। यद्यप्येवं तथापि सर्वभृच्चैव सदास्पदं हि सर्वं सर्वत्र सद्बुद्ध्यनुगमा
त्। न हि मृगतृष्णिकादयोऽपि निरास्पदा भवन्ति। अतः सर्वभृत् सर्वं बिभर्तीति। स्यादिदं चान्यज्ज्ञेयस्य सत्त्वाधिगमद्वारं निर्गुणं सत्त्वरजस्तमां
सि गुणास्तैर्वर्जितं तत् ज्ञेयं। तथापि गुणभोक्तृ च गुणानां सत्त्वरजस्तमसां शब्दादिद्वारेण सुखदुःखमोहाकारपरिणतानां भोक्तृ चो
पलब्धृ तत् ज्ञेयमित्यर्थः॥१४॥ किंच॥ ॥बहिरन्तश्च भूतानामचरं चरमेव च॥ सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्॥१५॥ बहिस्त्व
क्पर्यन्तं देहमात्मत्वेनाविद्याकल्पितं मपेक्ष्य तमेवावधिं कृत्वा बहिरुच्यते। तथा प्रत्यगात्मानमपेक्ष्य देहमेवावधिं कृत्वा तरुच्यते ब
हिरन्तश्चेत्युक्ते मध्येऽभावप्राप्तं इदमुच्यते। अचरं चरमेव च यत्। चराचरं देहाभासमपि तदेव ज्ञेयं। यथा रज्ज्वाः सर्पाभासः। यद्यचरं चर
मेव च व्यवहारविषयं सर्वं ज्ञेयं किमर्थमिदमिति सर्वैर्न विज्ञेयमित्युच्यते। सत्यं सर्वाभासं तथापि व्योमवत् सूक्ष्मं ततः सूक्ष्मत्वात् स्वेन रूपेण
तज्ज्ञेयमविज्ञेयमविदुषां त्वात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमित्यादिप्रमाणतो नित्यं विज्ञातं। अविज्ञाततया दूरस्थं वर्षसहस्रकोट्याप्यविदुषां
अप्राप्यत्वात्। अन्तिके च तदात्मत्वाद्विदुषां॥१५॥ अविभक्तं च भूतेषु विभक्तमिव च स्थितं। भूतभर्तृ च विज्ञेयं ग्रसिष्णु प्रभविष्णु च॥१६॥ ॥
अविभक्तं च प्रतिदेहं व्योमवत्तदेकं। भूतेषु सर्वप्राणिषु विभक्तमिव च स्थितं देहेष्वेव विभाव्यमानत्वात्। भूतभर्तृ च भूतानि बिभर्तीति तज्ज्ञेयं॥ भू

तु भर्तृ स्थितिकाले प्रलयकाले ग्रसिष्णु ग्रसनशीलं। उत्पत्तिकाले प्रभविष्णु च प्रभवनशीलं यथा रज्ज्वादि सर्पादेर्मिथ्याकल्पितस्य॥१६
॥ किं च सर्वत्र विद्यमानं सन्नोपलभ्यते चेत्तज्ज्ञेयं तमः स्यान्न किं तर्हि॥ ॥ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते॥ ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि
सर्वस्य धिष्ठितं॥१७॥ ॥ज्योतिषामादित्यादीनामपि तज्ज्ञेयं ज्योतिरात्मचैतन्यज्योतिषेद्धानि ह्यादित्यादीनि दीप्यंते। येन सूर्यस्तपति ते-
जसेद्धः तस्य भासा सर्वमिदं विभाति इत्यादिश्रुतिभ्यः स्मृतिभ्यश्च इहैव यदादित्यगतं तेजो इत्यादि। तमसो ऽज्ञानात् परमस्पृष्टमुच्यते
ज्ञानादेर्दुःखसंपादनबुद्ध्या प्राप्तावसादनस्योत्तम्भनार्थमाह। ज्ञानममानित्वादि ज्ञेयं यत्तत्प्रवक्ष्यामि इत्यादिनोक्तं ज्ञानगम्यं ज्ञेयमे-
व सत् ज्ञानफलमिति ज्ञानगम्यमुच्यते। ज्ञायमानं तु ज्ञेयं तदेतत् त्रयमपि हृदि बुद्धौ सर्वस्य प्राणिजातस्य धिष्ठितं विशेषेण स्थितं। तत्रैव
हि त्रयं विभाव्यते॥१७॥ यथोक्तार्थोपसंहारार्थः श्लोक आरभ्यते॥ ॥इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः॥ मद्भक्त एतद्विज्ञाय मद्भा-
वायोपपद्यते॥१८॥ इत्येवं क्षेत्रं महाभूतादि धृत्यंतं। यथा ज्ञानममानित्वादि तत्त्वज्ञानार्थदर्शनपर्यंतं ज्ञेयं यत्तदित्यादि तमसः परमुच्य-
ते इत्येवमंतमुक्तं समासतः। एतावान् हि सर्वो वेदार्थो गीतार्थश्चोपसंहृत्योक्तः। अस्मिन् सम्यग्दर्शने को ऽधिक्रियत इत्युच्यते। मद्भक्तो
मयीश्वरे सर्वज्ञे परमगुरौ वासुदेवे समर्पितसर्वात्मभावो यत्पश्यति शृणोति स्पृशति वा सर्वमेव भगवान् वासुदेव इत्येवं ग्रहाविष्टबु-
द्धिर्मद्भक्तः स एतद्यथोक्तं सम्यग्दर्शनं विज्ञाय मद्भावाय मम भावो मद्भावः परमात्मभावस्तस्मै मम भावायोपपद्यते मोक्षं गच्छति॥
१८॥ ॥तत्र सप्तमे ध्याये ईश्वरस्य द्वे प्रकृती उपन्यस्ते परापरे क्षेत्रक्षेत्रज्ञलक्षणे एतद्योनीनि भूतानि इति चोक्तं क्षेत्रक्षेत्रज्ञप्रकृतिद्व-

कार्य... ते प्रकृत्योरुदयात्पूर्वं बंधाभावेनात्मनो मोक्षस्याभावात्कदाचिदुभयाभावे पुनस्तत्प्रसंगात्प्रकृतिद्वयकार्यमित्याह। बंधेति॥६

पयोर्नित्यत्वे॥ कथं मता... तामित्यपेक्षायां पूर्वोक्तं नित्यत्वमित्युच्यते॥ ॥प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि॥ विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्॥१९॥ प्रकृतिं पुरुषं चैवेश्वरस्य प्रकृती ते प्रकृतिपुरुषावुभावप्यनादी विद्धि न विद्यते आदिर्ययोस्तावनादी नित्यौ नित्यत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुं। प्रकृतिद्वयवत्त्वमेव हीश्वरस्येश्वरत्वं याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिप्रलयहेतुस्ते द्वे अनादी सत्यौ संसारस्य कारणं न आदी अनादी इति तत्पुरुषसमासं केचिद्वर्णयंति। तेन हि किलेश्वरस्य कारणत्वं सिध्यति॥ यदि पुनः प्रकृतिपुरुषावेव नित्यौ स्यातां तत्कृतमेव जगन्नेश्वरस्य जगत्कर्तृत्वं। तदसत्। प्राक्प्रकृतिपुरुषयोरुत्पत्तेरीशितव्याभावादीश्वरस्यानीश्वरत्वप्रसंगात्। संसारस्य च निर्निमित्तत्वे निर्मोक्षप्रसंगेन किल शास्त्रानर्थक्यप्रसंगात्। बंधमोक्षाभावप्रसंगाच्च। नित्यत्वे पुनरीश्वरप्रकृत्योः सर्वमेतदुपपन्नं भवेत्। कथं॥ विकारांश्च गुणांश्चैव वक्ष्यमाणान् बुद्ध्यादिदेहेंद्रियांतान् गुणांश्च सुखदुःखमोहप्रत्ययाकारपरिणतान् विद्धि जानीहि। प्रकृतिसंभवान् प्रकृतिरीश्वरस्य विकारकारणशक्तिस्त्रिगुणात्मिका माया सा संभवो येषां विकाराणां गुणानां च तान् विकारान् गुणांश्च विद्धि प्रकृतिसंभवान् प्रकृतिपरिणामान्॥१९॥ के पुनस्ते विकारा गुणाश्च प्रकृतिसंभवाः॥ कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते॥ पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते॥२०॥ ॥कार्यकरणकर्तृत्वे कार्यं शरीरं। करणानि तत्स्थानि त्रयोदश देहस्यारंभकानि भूतानि विषयाश्च प्रकृतिसंभवा विकाराः। इह कार्यग्रहणेन गृह्यंते। गुणाश्च प्रकृतिसंभवाः सुखदुःखमोहप्रकृतिद्वयमनपेक्ष्येश्वरस्य संसारहेतुत्वे स्यातं जातानामपि ततः संसारापेरनिबंधानिमोक्षशास्त्रा...। प्रमाणेन तस्यैव संसारहेतुत्वमित्याह संसारस्येति। निर्निमित्तत्वप्रसक्तिद्वयापेक्षामंतेपरस्येश्वरस्येति निमित्तत्वमिति पाठः॥६

तयप्रथमप्र कृतपुरुषा दुत्पत्ते द्वे प्रकृती ४

वा२

त्मकाः करणाश्रयत्वात्करणग्रहणेन गृह्यन्ते। तेषां कार्यकरणानां कर्त्तृत्वमुत्पादकत्वं यत्तत्कार्यकरणकर्त्तृत्वं तस्मिन्कार्यकरणक
र्त्तृत्वे हेतुः कारणमारंभकत्वेन प्रकृतिरुच्यते। एवं कार्यकरणकर्त्तृत्वेन संसारस्य कारणं प्रकृतिः। कार्यकारणकर्त्तृत्व इत्येतस्मिन्नपि
पाठे कार्यं यद्यस्य परिणामस्तत्तस्य कार्यं विकारः विकारि कारणं तयोर्विकारविकारिणोः कार्यकारणयोः कर्त्तृत्व इति। तान्येव का
र्यकारणान्यु च्यंते। अथवा षोडश विकाराः कार्यं सप्त प्रकृतिविकृतयः कारणं तान्येव कार्यकारणान्युच्यंते। तेषां कर्त्तृत्वे हे
तुः प्रकृतिरुच्यते। आरंभकत्वेनैव पुरुषश्च संसारस्य कारणं यथा स्यात्तदुच्यते। पुरुषः जीवः भोक्ता क्षेत्रज्ञः सुखदुःखानां भोग्यानां भो
क्तृत्वे उपलब्धृत्वे हेतुरुच्यते॥२०॥ कथं पुनरनेन कार्यकारणकर्त्तृत्वेन सुखदुःखभोक्तृत्वेन च प्रकृतिपुरुषयोः संसारकारणत्वमुच्यते इ
ति। अत्रोच्यते। कार्यकारणसुखदुःखरूपेण सुखदुःखरूपेण हेतुफलात्मना प्रकृतेः परिणामाभावे पुरुषस्य चेतनस्यासति तदुप
लब्धृत्वे कुतः संसारः स्यात्। यदा पुनः कार्यकारणसुखदुःखस्वरूपेण हेतुफलात्मना परिणतया प्रकृत्या भोग्यया पुरुषस्य तद्विपरी
तस्य भोक्तृत्वेनाविद्यारूपः संयोगः स्यात् तदा संसारः स्यादित्यतो यत्प्रकृतिपुरुषयोः कार्यकारणकर्त्तृत्वेन सुखदुःखभोक्तृत्वेन च संसार
कारणत्वमुक्तं तद्युक्तमुक्तं। कः पुनरयं संसारो नाम सुखदुःखसंभोगः। पुरुषस्य च सुखदुःखानां भोक्तृत्वं संसारित्वमित्युक्तं। यत्पुरुषसु स्य
खदुःखानां भोक्तृत्वं संसारित्वमित्युक्तं तस्य तत्किंनिमित्तमित्युच्यते॥ ॥पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान्। कारणं गुण
संगोस्य सदसद्योनिजन्मसु॥२१॥ पुरुषो भोक्ता प्रकृतिस्थः प्रकृतावविद्यालक्षणायां स्थितः प्रकृतिस्थः प्रकृतिमात्मत्वेन गत इत्ये

वं द्दिश्यस्मात् तस्माद्धंद्वेतो उपलभ्यत इत्यर्थः। प्रकृतिजान् प्रकृतितो जातान् सुखदुःखमोहाकारानभिव्यक्तान् गुणान् सुखी दुःखी मूढोऽहं पंडि
तोऽहमित्येवं सत्यामविद्यायां सुखदुःखमोहेषु गुणेषु भुज्यमानेषु यः संगस्तात्म्यभावः स प्रधानं कारणं जन्मनः। स यथा कामो भवति तत्क्रतुर्भ
वतीत्यादिश्रुतेः। तदेतदाह। कारणं हेतुर्गुणसंगो गुणेषु संगोऽस्य पुरुषस्य भोक्तुः सदसद्योनिजन्मसु सत्यश्चासत्यश्च योनयः सदस
द्योनयः तासु सदसद्योनिषु जन्मानि सदसद्योनिजन्मानि तेषु सदसद्योनिजन्मसु विषयभूतेषु निमित्तकारणं गुणसंगोऽथवा सद
सद्योनिजन्मस्वस्य संसारस्य कारणं गुणसंग इति संसारपदमध्याहार्यं सदसद्योनयः सद्योनयो देवादियोनयोऽसद्योनयः प
श्वादियोनयः सामर्थ्यात्सदसद्योनयो मनुष्ययोनयोऽपि द्रष्टव्याः। एतदुक्तं भवति प्रकृतिस्थत्वाख्याविद्या गुणेषु च संगः कामः संसा
रकारणमिति तज्ज्ञानं पुरस्तादुपन्यस्तं क्षेत्रक्षेत्रज्ञविषयं यत्ज्ञात्वामृतमश्नुत इत्यादिनोक्तं चान्यैर्योपोहेनात्र तद्धर्माध्यारोपितो न च तस्यै
वपुनः साक्षान्निर्देशः क्रियते॥ ॥उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः॥ परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः॥२२॥ ॥उपद्रष्टा
समीपस्थः सन् द्रष्टा स्वयमव्यापृतो यथा ऋत्विग्यजमानेषु यज्ञकर्मव्यापृतेषु तटस्थोऽन्योऽव्यापृतो यज्ञविद्याकुशल ऋत्विग्यजमानव्या
पारगुणदोषाणामीक्षिता तद्वत्कार्यकारणव्यापारेष्वव्यापृतोऽन्यो विलक्षणस्तेषां कार्यकारणानां सव्यापाराणां समीप्येन द्रष्टृत्वात्॥
उपद्रष्टा। अथवा देहचक्षुर्मनोबुद्ध्यात्मानो द्रष्टारः तेषां बाह्यो देहः तत आरभ्यान्तरतमश्च प्रत्यक् समीप आत्मा द्रष्टा यतः परोऽन्तरो नास्ति द्रष्टा सो
तिशयसामीप्येन द्रष्टृत्वादुपद्रष्टा स्यात् यज्ञोपद्रष्टृवद्वा सर्वविषयीकरणादुपद्रष्टा। अनुमन्ता च अनुमोदनमनुमननं कुर्वत्सु तत्क्रिया

परिवर्जनायो
च्यते। पुरुस्य
चातिरात्मिका
रणं ज्ञानवै
राग्यसन्न्य
सेनीताशा
त्रैवप्रसिद्धं ७
वं

अन्यस्य पुरु
षोदन्यस्या
त्रावेन ७

सुपरितोषं तत्कर्त्तानुमंता अथवानुमंता कार्यकारणप्रवृत्तिषु स्वयमप्रवृत्तोपि प्रवृत्त इव तदनुकूलो विभाव्यते । तेनानुमंता । अथवा प्र
वृत्तान्स्वव्यापारेषु तत्साक्षित्वात् कदाचिदपि न निवारयतीति अनुमंता । भर्त्ता । भरणं नाम देहेंद्रियमनोबुद्धीनां संहतानां चेतन्यात्मपरा
र्थ्येन निमित्तभूतेन चेतन्याभासानां यत्स्वरूपावधारणं तच्चेतन्यात्मकृतमेवेति भर्त्तात्मोच्यते । भोक्ता चाग्न्युष्णत्ववन्नित्यचैतन्यस्व
रूपेण बुद्धेः सुखदुःखमोहात्मकाः प्रत्ययाः सर्वविषय[illegible]विषयाश्चैतन्यात्मग्रस्ता इव जायमाना आविक्ता विभाव्यते इति भोक्तात्मो
च्यते । महेश्वरः सर्वात्मत्वात्स्वतंत्रत्वाच्च महानीश्वरश्चेति महेश्वरः । परमात्मा देहादिबुद्ध्यंतानां प्रत्यगात्मत्वेन कल्पितानामविद्यया
परम उपद्रष्टृत्वादिलक्षण आत्मेति परमात्मा । सोंतः परमात्मेत्यनेन शब्देन चाप्युक्तः कथितः श्रुतौ । क्वासावस्मिन्देहे पुरुषः परः ।
व्यक्तात्तूत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति यो वक्ष्यमाणः ॥२२॥ क्षेत्रज्ञं चापि मां विद्धीत्युपन्यस्तो व्याख्यातो य उपसंहृतश्च तमे
नं यथोक्तलक्षणमात्मानं ॥ ॥य एनं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ॥ सर्वथा वर्त्तमानोपि न स भूयोभिजायते ॥२३॥ य एवं यथो
क्तप्रकारेण वेत्ति पुरुषं साक्षादहमस्मीति प्रकृतिं च यथोक्तामविद्यालक्षणां गुणैः स्वविकारैः सह निवर्त्तितामात्मविद्यया सर्व
था सर्वप्रकारेण वर्त्तमानोपि स भूयः पुनः पतितेस्मिन्विद्वच्छरीरे देहांतराय नाभिजायते नोत्पद्यते देहांतरं न गृह्णातीत्यर्थः । अपिश
ब्दात्किमु वक्तव्यं स्ववृत्तस्थो न जायते इत्यभिप्रायः । ननु यद्यपि ज्ञानोत्पत्त्यनंतरं पुनर्जन्माभाव उक्तः । तथापि प्राक्ज्ञानोत्पत्तेः कृतानां क
र्मणामुत्तरकालभाविनां चा यानि चातीतानेकजन्मकृतानि तेषां च फलमदत्वा नाशो न युक्त इति स्युस्त्रीणि जन्मानि कृतविप्रनाशो हि न

पृत्ता इति। यथा फले प्रवृत्तानामारब्धजन्मनां कर्मणां न च कर्मणां विशेषोवगम्यते। तस्माद्द्विप्रकाराण्यपि कर्माणि त्रीणि जन्मान्यारभेरन् संहता
नि वा सर्वाण्येकजन्मारभेरन्। अन्यथा कृतविप्रणाशे सर्वज्ञानोपायासप्रसंगः। शास्त्रानर्थक्यं च स्यादित्यत इदमयुक्तमुक्तं नत्स्मृत्योपि जायत इ
ति। ना। क्षीयंते चास्य कर्माणि ब्रह्मवेद ब्रह्मैव भवति। तस्य तावदेव चिरं। तद्यथैषीकातूलवह्नौ सर्वकर्माणि प्रदह्यंत इत्यादिश्रुतिस्मृतेभ्यश्च उक्तो वि
दुषः सर्वकर्मदाहः। हा। पि वोक्तोयथैधांसि समिद्धोग्निर्भस्मसात्कुरुते इत्यादिना सर्वकर्मदाहो वदृश्यते चोपपद्यते। यस्माद्विद्याकामक्लेशवीजानि
भ्रिताणि कर्माणि फलारंभकाणि जन्मांतरांकुरमारभंते। इहापि च साहंकाराभिसंधीनि कर्माणि फलारंभकाणि नेतराणीति तत्र तत्र भगव
तोक्तं। बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः। ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनः। इति चास्तु तावत्। ज्ञानोत्पत्त्युत्तरकालकृता
नां कर्मणां ज्ञानेन दाहो ज्ञानसहकारित्वात्। न त्विह जन्मनि ज्ञानोत्पत्तेः प्राक्कृतानामतीतानेकजन्मांतरकृतानां च दाहो युक्तः।। ना।। सर्वक
र्माणीति। विशेषणात् ज्ञानोत्तरकालभाविनामेव सर्वकर्मणामिति चेत्। संकोचे कारणानुपपत्तेः। यत्तूक्तं।। यथा वर्तमानजन्मारंभकाणि
कर्माणि न क्षीयंते फलदानाय प्रवृत्तान्येव सत्यपि ज्ञाने। तथाऽप्रवृत्तारब्धफलानामपि कर्मणां क्षयो न युक्त इति। तदसत्। कथं। तेषां प्रवृत्त
पुवत्प्रवृत्तफलत्वात्। यथा पूर्वं लक्ष्यवेधाय मुक्तेषुर्धनुषो लक्ष्यवेधोत्तरकालमप्यारब्धवेगक्षयात्पतनेनैवावतिष्ठते। एवं
शरीरारंभकं कर्म शरीरस्थितिप्रयोजने निवृत्तेप्यासंस्कारवेगक्षयात्पूर्ववद्वर्तते। एव यथा स एवेषुः प्रवृत्तिनिमित्तानारब्धवेगस्त्वमुक्तो
धनुषि प्रयुक्तोप्युपसंह्रियते तथाऽप्रवृत्तारब्धफलानि कर्माणि स्वाश्रयस्थान्येव ज्ञानेन निर्बीजीक्रियंत इति पतितेऽस्मिन्नविद्वच्छरीरे न
स मे योऽविजायत इति युक्तमेवोक्तमिति सिद्धं।।१२।। ब्रह्मज्ञात्मदर्शने उपायविकल्पारंभेद्यानादयमुच्यते।। ।। ।। ।। ।। ।।

ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना॥ अन्ये सांख्येन योगेन कर्मयोगेन चापरे॥२४॥ ॥ध्यानेन ध्यानं नाम शब्दादिभ्यो विष
येभ्यः श्रोत्रादीनि करणानि मनस्युपसंहृत्य मनश्च प्रत्यक्चेतयितर्येकाग्रतया यत्चिंतनं तद्ध्यानं तथा ध्यायतीव बकः इति वत् ध्यायती
व पृथिवी। ध्यायंतीव पर्वता इत्युपमोपादानात् तैलधारावत् संततोऽविच्छिन्नप्रत्ययो ध्यानं। तेन ध्यानेनात्मनि बुद्धौ पश्यंत्यात्मानं प्रत्यक्चेत
नमात्मना ध्यानसंस्कृतेनांतःकरणेन केचिद्योगिनः। अन्ये सांख्येन योगेन। सांख्यं नाम इमे सत्वरजस्तमांसि गुणास्तद्व्यापारसाक्षिभू
तो नित्यो गुणविलक्षण आत्मेति चिंतनमेषः सांख्ययोगस्तेन पश्यंत्यात्मानमात्मनेति वर्त्तते। कर्मयोगेन कर्मैव योगः ईश्वरार्पणबुद्ध्या
ऽनुष्ठीयमानं योगार्थत्वाद्योग उच्यते गुणतस्तेन सत्वशुद्धिज्ञानोत्पत्तिद्वारेण चापरे॥२४॥ ॥अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपास
ते। ते पि चातितरंत्येव मृत्युं श्रुतिपरायणाः॥२५॥ ॥अन्ये त्वेषु विकल्पेषु अन्यतरेणाप्येवं यथोक्तमात्मानमजानंतोऽन्येभ्य आ
६५ र्येभ्यः श्रुत्वा इदमेवं चिंतयतेत्युक्ता मुपासते श्रद्दधानाः संतश्चिंतयंति। ते पि चातितरंत्येव अतिक्रामंत्येव मृत्युं मृत्युयुक्तं संसारमित्येतत्। श्रु
तिपरायणाः श्रुतिः श्रवणं परमयनं मोक्षमार्गप्रवृत्तौ परं साधनं येषां ते श्रुतिपरायणाः केवलं परोपदेशप्रमाणाः स्वयं विवेकरहिता इत्यभि
प्रायः। किमु वक्तव्यं प्रमाणं प्रति स्वतंत्रा विवेकिनो मृत्युमतितरंतीत्यभिप्रायः॥२५॥ ॥अत्र क्षेत्रज्ञं चापि मां विद्धि क्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं
मोक्षसाधनं यद्ज्ञात्वामृतमश्नुते इत्युक्तं। तत्कस्माद्धेतोरिति तद्धेतुप्रदर्शनार्थं श्लोक आरभ्यते॥ ॥यावत्संजायते किंचित्सत्वं स्थावर
जंगमं॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ॥२६॥ ॥यावत्किंचित्संजायते समुत्पद्यते सत्वं वस्तु। किं सविशेषणेनेत्याह॥ स्थावरजं

गी॰ मं स्थावरं चजंगमं च क्षेत्रक्षेत्रज्ञसंयोगात् जायत इत्येवं विद्धि जानीहि हे भरतर्षभ ॥२६॥ कः पुनरयं क्षेत्रक्षेत्रज्ञयोः संयोगोऽभिप्रेतो
न तावत् रज्ज्वेव घटस्यावयवसंश्लेषद्वारकः संबंधविशेषः संयोगः क्षेत्रेण क्षेत्रज्ञस्य संभवति आकाशवन्निरवयवत्वात् नापि स
मवायलक्षणः तंतुपटयोरिव क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभावानभ्युपगमात् इत्युच्यते क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणो
र्भिन्नस्वभावयोरितरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबंधनो रज्जुशुक्तिकादीनां तद्विवेकज्ञाना
भावात् अध्यारोपितसर्परजतादिसंयोगवत्सोऽयमध्यासस्वरूपः क्षेत्रक्षेत्रज्ञसंयोगो मिथ्याज्ञानलक्षणो यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभे
दपरिज्ञानपूर्वकं प्राग्दर्शितरूपात् क्षेत्रात् मुंजादिवेषीकां यथोक्तलक्षणं क्षेत्रज्ञं प्रविभज्य न सत्तन्नासदुच्यते इत्यनेन निरस्तसर्वोपा
धिविशेषं ज्ञेयं ब्रह्मस्वरूपेण यः पश्यति क्षेत्रं च मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगंधर्वनगरादिवदसदेव सदिवावभासते इत्येवं निश्चि
तविज्ञानो यस्तस्य यथोक्तसम्यग्दर्शनविरोधादपगच्छति मिथ्याज्ञानं तस्य जन्महेतोरपगमात् य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सहेति
अनेन विद्वान् भूयो नाभिजायत इति यदुक्तं तदुपपन्नमुक्तं न स भूयोऽभिजायत इति सम्यग्दर्शनफलमविद्यादिसंसारबीजनिवृत्तिद्वारेण
जन्माभाव उक्तः जन्मकारणं चाविद्यानिमित्तकः क्षेत्रक्षेत्रज्ञसंयोग उक्तः अतस्तस्या अविद्याया निवर्तकं सम्यग्दर्शनमुक्तमपि पुनः शब्दांत
रेणोच्यते सर्वं स्पष्टं भवति ॥ ॥ समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं ॥ विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति ॥ २७॥ समं निर्विशेषं ति
ष्ठंतं स्थितिं कुर्वतं क्व सर्वेषु समस्तेषु भूतेषु स्थावरादिषु प्राणिषु कं परमेश्वरं देहेन्द्रियमनोबुद्ध्यव्यक्तात्मनोऽपेक्ष्य परमेश्वरः स सर्वेश्वर

ईशनशीलत्वादिति परमेश्वरः। तं सर्वेषु भूतेषु समं तिष्ठंतं। तानि विशिनष्टि। विनश्यत्स्विति। तं च परमेश्वरमविनश्यंतमिति। भूतानां परमे
श्वरस्य चात्यंतवैलक्षण्यप्रदर्शनार्थं। कथं। सर्वेषां हि भावविकाराणां जनिलक्षणो भावविकारो मूलं। जन्मोत्तरकालभाविनोन्ये सर्वे भा
वविकारा विनाशांताः। विनाशात्परो न कश्चिदस्ति भावविकारः। भावाभावात्। सति हि धर्मिणि धर्मा भवंत्यतोंत्यभावविकाराभावानुवादे
न पूर्वभाविनः सर्वे विकाराः प्रतिषिद्धा भवंति। तस्मात्सर्वभूतैर्वैलक्षण्यमेव परमेश्वरस्य सिद्धं। निर्विशेषत्वमेकत्वं च। य एवं यथोक्तं
परमेश्वरं पश्यति स पश्यति। ननु सर्वलोकः पश्यति किं विशेषेणेति। सत्यं। पश्यति किं तु विपरीतं पश्यत्यतो विशिनष्टि। स एव प
श्यतीति। यथा तिमिरदृष्टिरनेकचंद्रं पश्यति तमपेक्ष्यैकचंद्रदर्शी विशिष्यते स एव पश्यति। इतरे पश्यंतोपि न पश्यंति विपरीतद
र्शित्वादनेकचंद्रवदित्यर्थः॥ २७॥ यथोक्तस्य सम्यग्दर्शनस्य फलवचनेन स्तुतिः कर्त्तव्येति श्लोक आरभ्यते॥ ॥समं पश्यन्हि सर्वत्र
समवस्थितमीश्वरं॥ न हिनस्त्यात्मनात्मानं ततो याति परां गतिं॥ २८॥ ॥समं पश्यन्नुपलभमानो हि यस्मात्सर्वत्र भूतेषु समव॥
स्थितं तुल्यतयावस्थितमीश्वरमतीतानंतरश्लोकोक्तलक्षणमित्यर्थः। समं पश्यन् किं। न हि नस्ति हिंसां न करोति। आत्मना स्वेनैव स्वा
त्मानं ततस्तदहिंसनात् याति परां प्रकृष्टां गतिं मोक्षाख्यां। ननु नैव कश्चित्प्राणी स्वयं स्वमात्मानं च हिनस्ति। कथमुच्यते। अप्राप्तं न हि न
स्तीति। यथा न पृथिव्यामग्निश्चेतव्यो नांतरिक्षे इत्यादि। नैष दोषः। अज्ञानादात्मतिरस्कारोपपत्तेः। सर्वो ह्यज्ञोऽत्यंतप्रसिद्धं। साक्षादद
परोक्षमप्यात्मानं तिरस्कृत्य। अनात्मानमात्मत्वेन परिगृह्य धर्माधर्मौ कृत्वोपात्तमात्मानं हत्वाऽन्यमात्मानमुपादत्ते नवं तमपि हत्वान्यं॥

शरीरपातानन्तरे प्राप्याः इत्यर्थः। स्वगुणैः सुखदुःखादिभिः स्वकर्मभिश्च धर्माधर्माख्यैर्वैलक्षण्ये २

मित्येव मृषात्मात्मानं हंतीत्यात्महा सर्वो जनः स्तु परमार्थात्मा अस्यावापि सर्वदा अविद्यया हत एवाविद्यमानफलाभावादिति सर्वे ह्यात्महन
एवाविद्वांसः अयं त्वितरो यथोक्तात्मदर्शी सः उभयथाप्यात्मनात्मानं न हिनस्ति ततो याति परां गतिम्॥ यथोक्तफलं तस्य भवतीर्थः॥२८॥ सर्वभू
तस्थमीशं सममपश्यन्हि नस्त्यात्मनात्मानमित्युक्तं तदनुपपन्नं स्वगुणकर्मवैलक्षण्यभेदभिन्नेष्वात्मस्विति एतदाशंक्याह॥ ॥प्रकृत्यैव च
कर्माणि क्रियमाणानि सर्वशः॥ यः पश्यति तथात्मानमकर्त्तारं स पश्यति॥२९॥ ॥प्रकृत्या प्रकृतिर्भगवतो माया त्रिगुणात्मिका॥
मायां तु प्रकृतिं विद्यादिति मंत्रवर्णात् तया प्रकृत्यैव च महदादिकार्यकारणाकारपरिणतया नान्येन कर्माणि वाङ्मनःकायारभ्याणि क्रिय
माणानि निर्वर्त्यमानानि सर्वशः सर्वप्रकारैः यः पश्यत्युपलभते॥ तथात्मानं क्षेत्रज्ञमकर्त्तारं सर्वोपाधिवर्जितं स पश्यति परमार्थदर्शीत्य
भिप्रायः निर्गुणस्याकर्त्तुर्निर्विशेषस्याकाशस्येव भेदे प्रमाणानुपपत्तिरित्यर्थः॥२९॥ तदेव सम्यग्दर्शनं शब्दांतरेण प्रपंच्यते॥ ॥
यदा भूतपृथग्भावमेकस्थमनुपश्यति॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा॥३०॥ ॥यदा यस्मिन्काले भूतपृथग्भावं भूतानां पृथक्त्व
मेकस्मिन्नात्मनि स्थितमेकस्थमनुपश्यति॥ शास्त्राचार्योपदेशमन्वात्मप्रत्यक्षतेन पश्यत्यात्मैवेदं सर्वमिति। तत एव चात्मविस्तारम
नुपश्यति श्रुत्युक्तं च सविकाशमात्मनः प्राण आत्मन आकाश आत्मनः स्मीर आत्मनस्तेज आत्मन आप आत्मन आविर्भावतिरोभावौ चात्मनोऽ
न्नमित्येवमादिप्रकारैर्विस्तारं यदा पश्यति स ब्रह्म संपद्यते ब्रह्मैव भवति तदा तस्मिन्काले इत्यर्थः॥३०॥ ॥एकस्यात्मनः सर्वदेहात्मत्वे तद्दोषसं
वे २ बन्धप्राप्तेरिदमुच्यते। अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः॥ शरीरस्थोऽपि कौंतेय न करोति न लिप्यते॥३१॥ ॥अनादित्वात् अनादेर्भावो
ऽनादित्वं आदिमत्त्वं आदिः कारणं तद्यस्य नास्ति तत् अनादिमत्। यद्यात्मवत् तत्त्वं नात्मना व्येति। अयं तु अनादित्वान्निरवयवतया न व्येति। तथा

ह्मिरातित्को तीनानंगीका तात्रोपक्रम वंगोधो मी नमिध्यतिकः पुनरिति॥२

परस्य कर्तृत्वादेरभावेकस्यतदिष्टमिति पृच्छति कः पुनरिति॥२ तर्हि प्रतीतकर्तृत्वादेरधिकरणं वक्तव्यमिति पूर्ववादी आह। करती॥४ परस्यैव कर्तृत्वाद्याधारत्वानास्ति त्वोशंक्या हा। पराङ्गेति। नास्तीति वा एासंबंधः न हि कर्तृत्वादिना कश्चिपरस्या

२२ जीवं२

निर्गुणत्वात्सगुणो व्ययपायाद्वेति अयंतु निर्गुणत्वान्नव्येतीति। परमात्मायमव्ययो नास्यव्ययो विद्यत इत्यव्ययः। यत एवं अतः शरीरस्थो पि शरीरेषु आत्मनउपलब्धिर्भवतीति शरीरस्थ उच्यते॥ तथापिन करोति तदकरणादेव तत्फलेन न लिप्यते॥ यो हि कर्त्ता स कर्मफलेन लिप्यते यत्त्वकर्ताअयंनकर्ताअतो न लिप्यते इत्यर्थः॥३१॥ कः पुनर्देहेषु करोति लिप्यते च। यदितावदन्यः परमात्मनो देही करोति लिप्यते च। ततरदमनुपपन्नमुक्तं॥ क्षेत्रज्ञं चापिमां विद्धीत्यादौ नास्ति ईश्वरादन्यो देही कः करोति लिप्यते चेति वाच्यं परो वा नास्तीति सर्वं दुर्विज्ञेयं दुर्वाच्यं चेति भगवत्प्रोक्तमौपनिषदं दर्शनं परित्यक्तं वैशेषिकैः सांख्याऽर्हतबौद्धैश्च तत्रायं परिहारो भगवता स्वेनैवोक्तः। स्वभावस्तु प्रवर्त्तत इत्यविद्यामात्रस्वभावो हि करोति लिप्यत इति व्यवहारो भवति। न तु परमार्थत एकस्मिन् परमात्मनि तदस्ति अत एतस्मिन् परमार्थसांख्यदर्शने स्थितानां परमहंसपरिव्राजकानां तिरस्कृताविद्याव्यवहाराणां कर्माधिकारो नास्तीति तत्र तत्र दर्शितं भगवता किमिव न करोति न लिप्यत इत्यत्र दृष्टान्तमाह॥ ॥यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥३२॥ यथा सर्वगतं व्याप्यपि सत्सौक्ष्म्यात् सूक्ष्मभावादाकाशं खं नोपलिप्यते न संबध्यते। सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥ ॥३२॥ किं च॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः॥ क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥३३॥ यथा प्रकाशयत्यवभासयत्येकः कृत्स्नं लोकमिमं रविः सविता आदित्यः। तथा तद्वन्महाभूतादिधृत्यन्तं क्षेत्रमेकः सन् प्रकाशयति कः क्षेत्री परमात्मेत्यर्थः। रविदृष्टान्तोऽत्रात्मन उभयार्थोऽपि भवति। रविवदेव॥३३॥ सर्वस्यैवास्य गीताशास्त्रार्थस्योपसंहारार्थः श्लोकः॥ ॥क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा॥ भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्॥३४॥ क्षेत्रक्षेत्रज्ञयोर्यथाव्याख्यातयोरेवं यथा प्रदर्शितप्रकारेणान्तरमितरेतरवैलक्षण्यविशेषं ज्ञानचक्षुषा शास्त्राचार्योपदेशजनितमात्मप्रत्ययि

वक्तव्यमिति पूर्वे स्मदादिवदीश्वरत्वमिति भावः॥४ परस्यान्यस्य वा कर्तृत्वाद्यविशिष्टे शरीरस्थोऽपीत्यादिश्लोकेऽतिमत्वमपि गतं वक्तु चास्य नतन्त्यज्यमेवेति परीहारः संपन्नोपसंहरति सर्वथेति॥४

उभयविधम र्थमेवस्याय तिरविवदिति २

कं ज्ञानं चक्षुस्तेन ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च भूतानां प्रकृतिरविद्यालक्षणाव्यक्ताख्या तस्याः भूतप्रकृतेर्मोक्षं मोक्षणमभावगमनं च ये
विदुर्विजानंति ते यांति गच्छंति परं परमात्मतत्त्वं ब्रह्म पुनर्देहं नाददत इत्यर्थः॥३४॥ ॥इति श्रीगोविंदभगवत्पूज्यपादशि
ष्यश्रीशंकराचार्यकृतौ गीताभाष्ये क्षेत्रक्षेत्रज्ञनिरूपणं नाम त्रयोदशोऽध्यायः॥१३॥ ॥अर्जुनं प्रति भगवताध्याय उक्तस्त्रयोदशः॥
सर्वमुत्पद्यमानं क्षेत्रक्षेत्रज्ञसंयोगादुत्पद्यत इत्युक्तं तत्कथमिति प्रदर्शनार्थं परं भूय इत्यादिरध्याय आरभ्यते। अथवेश्वरपरतंत्रयोः क्षेत्रक्षेत्र
ज्ञयोर्जगत्कारणत्वं न तु सांख्यानामिव स्वतंत्रयोरित्येवमर्थं प्रकृतिस्थत्वं गुणेषु संगः संसारकारणमित्युक्तं। कस्मिन् गुणे कथं संगः के वा
गुणाः कथं वा ते बध्नंतीति गुणेभ्यश्च मोक्षणं कथं स्यान्मुक्तस्य च लक्षणं वक्तव्यमित्येवमर्थं च॥ श्रीभगवानुवाच॥ ॥परं भूयः प्रव
क्ष्यामि ज्ञानानां ज्ञानमुत्तमं॥ यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः॥१॥ परं ज्ञानमिति व्यवहितेन संबंधः। भूयः पुनः पूर्वेष्वध्यायेष्व
सकृदुक्तमपि प्रवक्ष्यामि। तच्च परं परवस्तुविषयत्वात् किं तत् ज्ञानं ज्ञानानां सर्वेषामुत्तममुत्तमफलत्वात् ज्ञानानामिति नामानित्यादी
नां। किं तर्हि यज्ञादिज्ञेयवस्तुविषयाणामिति। तानि न मोक्षाय इदं तु मोक्षायेति परोत्तमशब्दाभ्यां स्तौति श्रोतृबुद्धिरुच्युत्पादनार्थं। यज्ज्ञा
त्वा यज्ज्ञानं प्राप्य मुनयः संन्यासिनो मननशीलाः सर्वे परां सिद्धिं मोक्षाख्यामितो अस्माद्देहबंधनादूर्ध्वं गताः प्राप्ताः॥१॥ तस्याश्च सिद्धेरैकां
तिकत्वं दर्शयति॥ ॥इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः॥ सर्गेऽपि नोपजायंते प्रलये न व्यथंति च॥२॥ इदं ज्ञानं यथोक्तमाश्रित्य ज्ञा
नसाधनमनुष्ठायेत्येतत् मम परमेश्वरस्य साधर्म्यं मत्स्वरूपतामागताः प्राप्ता इत्यर्थो न तु समानधर्मता साधर्म्यं क्षेत्रज्ञेश्वरयोर्भेदानभ्यु

२६
गी॰ टी॰

यगमात् गीताशास्त्रे फलवादमात्रायं स्तुत्यर्थ उच्यते। सर्गेपि सृष्टिकालेपि नोपजायंते न उत्पद्यंते। प्रलये ब्रह्मणोपि विनाशकाले न व्यथंति च
व्यथां नापद्यंते न चलंतीत्यर्थः॥२॥ दोजद्दोजःसंयोगईदृशो भूतकारणमित्याह॥ ॥मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्॥ संभवः
सर्वभूतानां ततो भवति भारत॥३॥ ॥मम स्वभूता मदीया माया त्रिगुणात्मिका प्रकृतिर्योनिः सर्वभूतानां सर्वकार्येभ्यो महत्वात्भरण
त्वाच्च स्वविकाराणां महद्ब्रह्मेति च योनिरेव विशिष्यते तस्मिन्महति ब्रह्मणि योनौ गर्भं सर्वभूतजन्मकारणं हिरण्यगर्भजन्मबीजं दधामि क्षिपामि॥
दोजद्दोजः प्रकृतिद्वयशक्तिमानीश्वरोहमविद्याकामकर्मोपाधिस्वरूपानुविधायि नं क्षेत्रं क्षेत्रज्ञेन संयोजयामीत्यर्थः। ब्रह्मादिस्थाव
रांतानां संभव उत्पत्तिः सर्वभूतानां ततस्तस्माद्धिरण्यग र्भोत्पत्तिद्वारेण भूतकारणाद्गर्भा धानाद्भवति हे भारत॥३॥ सर्वयोनिषु कौंतेय
मूर्त्तयः संभवंति याः॥ तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता॥४॥ देवपितृमनुष्यपशुमृगादिसर्वयोनिषु कौंतेय मूर्त्तयो देहसंस्थानल
क्षणा मूर्छितांगावयवा मूर्त्तयः संभवंति यास्तासां मूर्त्तीनां ब्रह्म महत्सर्वावस्थं योनिः कारणमहमीशो बीजप्रदः गर्भाधानस्य कर्त्ता पिता॥४॥
के गुणाः कथं बध्नंतीत्युच्यते॥ ॥सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः॥ निबध्नंति महाबाहो देहे देहिनमव्ययं॥५॥ सत्त्वं रजस्तम इत्येवं नामा
नो गुणा इति पारिभाषिकः शब्दो न रूपादिवत् द्रव्याश्रिता न च गुणगुणिनोरन्यत्वमत्र विवक्षितं तस्माद्गुणा इव नित्यपरतंत्राः क्षेत्रज्ञं प्रत्यविद्या
त्मकत्वात् क्षेत्रज्ञं बध्नंतीव तमास्पदीकृत्य तेषां लात्मानं प्रतिलभंत इति निबध्नंतीत्युच्यते। ते च प्रकृतिसंभवाः भगवन्मायायाः संभूताः निबध्नंती
व हे महाबाहो। यहांतोस्य मर्थतरा वाजानुप्रलंबौ बाहू यस्य स महाबाहुः॥ हे महाबाहो देहे शरीरे देहिनं दे हवंतमव्ययमव्ययत्वं चोक्त

९६
गी॰ टी॰

मनादित्वादिसक्ष्मकेन। ननु देही न लिप्यते इत्युक्तं तत्कथमिह निवध्नंतीत्युच्यते। परिहृतमस्माभिरिवशब्देन वध्नंतीवेति॥५॥ तत्र सत्वं निर्मलत्वा
त्प्रकाशकमनामयं॥ सुखसंगेन वध्नाति ज्ञानसंगेन चानघ॥६॥ तत्र सत्वादीनां सत्वस्यैव तावल्लक्षणमुच्यते। निर्मलत्वात् स्फटिक इव भा
स्वरः प्रकाशकमनामयं निरुपद्रवं सत्वं निवध्नाति। कथं। सुखसंगेन सुख्यहमिति विषयभूतस्य सुखस्य विषयिण्यात्मनि संश्लेषापादानं म्छैव च
सुखे संजननं स्वेषा। विद्या न हि विषयधर्मो विषयिणो भवति। छादि च प्रत्यं तदोत्र मस्यैव विषयस्यैव धर्मः इत्युक्तं भगवता। भूतो। वि चैव स्वकीयधर्म
त्वेन या विषयि विषय। विवेकानन्दात्मायाऽस्यात्मन्यते सुखे संजनयतीव। असक्तं सक्तमिव करोत्यसुखिनं सुखिनमिति। तथा ज्ञानसंगेन च ज्ञानमिति सुख
स्याहमित्यादि दोऽत्र स्यैवांतःकरणस्य धर्मो नात्मनः। अप्राप्तधर्मत्वे संगात्मत्वानुपपत्तेः। वंधानुपपत्तेश्च सुखवर्णादौ संगो मंतव्यः। हे अनघ अव्यसन॥६॥ ॥
रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं॥ तन्निवध्नाति कौंतेय कर्मसंगेन देहिनम्॥७॥ ॥रजो रागात्मकं रंजनाद्रागो गैरिकादिवत् रागात्मकं विद्धि
तृष्णासंगसमुद्भवं तृष्णा अप्राप्ताभिलाषः। आसंगः प्राप्ते विषये मनसः प्रीतिलक्षणः संश्लेषः॥ तृष्णासंगसमुद्भवं। तृष्णासंगसमुद्भवं तृष्णासंगयोः समु
द्भवं तृष्णासंगसमुद्भवं। तन्निवध्नाति तद्रजः। कौंतेय कर्मसंगेन दृष्टादृष्टार्थेषु कर्मसु संजननं। तत्परता कर्मसंगस्तेन वध्नाति रजो देहिनं॥७॥ ॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां॥ प्रमादालस्यनिद्राभिस्तन्निवध्नाति भारत॥८॥ ॥तमस्तृतीयो गुणः अज्ञानजं अज्ञानाज्जातं अज्ञानजं विद्धि
मोहनं मोहकरं भ्रांतिविवेककं सर्वदेहिनां सर्वेषां देहे वर्त्तमानानां। प्रमादालस्यनिद्राभिः प्रमादश्च आलस्यं च निद्रा च प्रमादालस्यनिद्रास्ताभिः प्रमादा
लस्यनिद्राभिस्तच्च मोनिवध्नाति भारत॥८॥ पुनर्गुणानां व्यापारः संक्षेपत उच्यते॥ सत्वं सुखे संजयति रजः कर्मणि भारत॥ ज्ञानमावृत्य तु तमः प्रमादे

संजयत्युत॥९॥ ॥सत्वं सुखे संजयति सत्वं संजयति। रजः कर्मणि भारत संजायतीति वर्त्तते॥ ज्ञानं स्वतत्कृतं विवेकमावृत्याच्छाद्य तु तमः
स्वेनावरणात्मना प्रमादे संजयत्युत। प्रमादो नाम प्राप्तिकर्त्तव्यताकरणं॥९॥ उक्तं कार्यं कदा कुर्वंति गुणा इत्युच्यते॥ ॥रजस्तमश्चाभि
भूय सत्वं भवति भारत॥ रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा॥१०॥ रजस्तमश्चोभावप्यभिभूय सत्वं भवति। उद्भवति वर्द्धते यदा तदा ल
ब्धात्मकं सत्वं स्वकार्यं ज्ञानसुखाद्यारभते। हे भारत तथा रजोगुणः सत्वं तमश्चोभावप्यभिभूय वर्द्धते यदा तदा कर्मतृष्णादि स्वकार्यमारभते॥
तमश्चाख्योपि गुणः सत्वं रजश्चोभावप्यभिभूय तथैव वर्द्धते यदा तदा ज्ञानावरणादि स्वकार्यमारभते॥१०॥ यदा यो गुण उद्भूतो भवति तदा त
स्य किं लिंगमित्युच्यते॥ ॥सर्वद्वारेषु देहेस्मिन्प्रकाश उपजायते॥ ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत॥११॥ ॥सर्वद्वारेष्वात्मनः
उपलब्धिद्वाराणि श्रोत्रादीनि स्ववीर्णिकरणानि तेषु सर्वेषु द्वारेषु अंतःकरणस्य बुद्धेर्वृत्तिः प्रकाशो देहेस्मिन्प्रकाशशब्दवाच्यः उप
जायते तदेव ज्ञानं यदेव प्रकाशो ज्ञानाख्य उपजायते। तदा ज्ञानप्रकाशेन लिंगेन विद्याद्विवृद्धमुद्भूतं सत्वमित्युतापि॥११॥ रजस्युद्भूते स्येदं
चिन्हं॥ ॥लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा॥ रजस्येतानि जायंते विवृद्धे भरतर्षभ॥१२॥ लोभः परद्रव्यादिरच्छा। प्रवृत्तिः प्रवर्त्त
नं सामान्यचेष्टा॥ आरंभ उद्यमः कस्य कर्मणामशमः। अनुपशमो हर्षः रागादि प्रवृत्तिः। स्पृहा सर्वसामान्यवस्तुविषया तृष्णा॥ रजसि गुणे
विवृद्धे एतानि लिंगानि जायंते भरतर्षभ॥१२॥ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च॥ तमस्येतानि जायंते विवृद्धे कुरुनंदन॥१३॥ अप्रका
शो विवेकोऽत्यंतमप्रवृत्तिः प्रवृत्त्यभावः तत्कार्यं प्रमादो मोह एव च॥ अविवेको मूढचित्तत्वं त्यर्थः तमसि गुणे विवृद्धे एतानि लिंगानि जायं

ते हे कुरुनंदन भरताद्वारेण । विपरीतफलं प्राप्यते तदपि रस्य हेतुकं सर्वं गौणमेवेति दर्शन्नाह ॥१३॥ यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत् । तदोत्तमविदां
लोकानमलान्प्रतिपद्यते ॥१४॥ ॥यदा सत्वे प्रवृद्धे उद्भूते तु प्रलयं मरणं याति प्रतिपद्यते देहभृत् आत्मा तदा उत्तमविदां महदादितत्वविदां स्वे
नतलोकानमलान्मलरहितान्प्रतिपद्यते प्राप्नोतीत्यर्थः ॥१४॥ रजसि प्रलयं गत्वा कर्मसंगिषु जायते । तथा प्रलीनस्तमसि मूढयोनिषु
जायते ॥१५॥ रजसि प्रवृद्धे प्रलयं मरणं गत्वा प्राप्य कर्मसंगिषु कर्मासक्तियुक्तेषु मनुष्येषु जायते । तथा तद्वदेव प्रलीनो मृतस्तमसि विवृ
द्धे मूढयोनिषु पश्वादियोनिषु जायते ॥१५॥ अतीतश्लोकार्थस्यैव संक्षेप उच्यते ॥ कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलं । रजसस्तु फलं
दुःखमज्ञानं तमसः फलं ॥१६॥ कर्मणः सुकृतस्य सात्विकस्येत्यर्थः । आहुः शिष्टाः सात्विकमेव निर्मलं फलमिति । रजसस्तु राजसस्य कर्म
णइत्यर्थः । कर्माधिकारात्फलमपि दुःखमेव कारणानुरूप्यात् राजसमेव । तथा अज्ञानं तमसः तामसस्य कर्मणोऽधर्मस्य ॥१६॥ किंच गुणेभ्यो भ
वति ॥ सत्वात्संजायते ज्ञानं रजसो लोभ एव च । प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥१७॥ सत्वात्लब्धात्मकात् संजायते समुत्पद्यते ज्ञानं । रज
सो लोभ एव च । प्रमादश्च मोहश्चोभौ तमसो भवतः । अज्ञानं च भवति ॥ किंच ॥ ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः । जघन्यगुणवृत्तिस्था अ
धो गच्छंति तामसाः ॥१८॥ ऊर्ध्वं गच्छंति देवलोकादिषूत्पद्यंते सत्वस्थाः सत्वगुणवृत्तिस्था । मध्ये तिष्ठंति मनुष्येषु राजसाः । जघन्यगुणवृत्तिस्थाः ।
जघन्यश्चासौ गुणश्च जघन्यगुणस्तमस्तस्य वृत्तिर्निद्रालस्यादि तस्मिन्स्थिताः जघन्यगुणवृत्तिस्था मूढा अधो गच्छंति पश्वादिषूत्पद्यंते तामसाः ॥
१८ ॥ पुरुषस्य प्रकृतिस्थत्वरूपेण मिथ्याज्ञानेन युक्तस्य भोग्येषु गुणेषु सुखदुःखमोहात्मकेषु सुखी दुःखी मूढोऽहमस्मीति एवंरूपो यः सं

गगस्तत्कारणं पुरुषस्य सदसद्योनिजन्मप्राप्तिलक्षणस्य संसारस्येति समासेन पूर्वाध्याये यदुक्तं तदिह सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवा
इत्यत आरभ्य गुणस्वरूपं गुणवृत्तं स्ववृत्तेन च गुणानां बंधकत्वं गुणवृत्तिनिबद्धस्य पुरुषस्य या गतिरित्येतत्सर्वं मिथ्याज्ञानमूलं च बंधप
कारणं विस्तरेणोक्त्वा अधुना सम्यग्दर्शनान्मोक्षो वक्तव्य इत्याह श्रीभगवान्॥ ॥नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति॥ गुणेभ्यश्च
परं वेत्ति मद्भावं सोऽधिगच्छति॥१९॥ ॥नान्यं गुणेभ्यः कार्यकारणविषयाकारपरिणतेभ्यो गुणेभ्यः कर्तारमन्यं यदा द्रष्टा विद्वान्सन्नानु
पश्यति गुणा एव सर्वावस्थासु सर्वकर्मणां कर्तार इत्येवं पश्यति। गुणेभ्यश्च परं गुणव्यापारसाक्षिभूतं वेत्ति मद्भावं स द्रष्टाधिगच्छति॥ क
थमधिगच्छतीत्युच्यते॥ गुणानेतानतीत्य त्रीन्॥ गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान्॥ जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतम
श्नुते॥२०॥ गुणानेतान्यथोक्तान्मायाप्रकृतीत्य जीवन्नेव अतिक्रम्य मायोपाधिभूतांस्त्रीन्देही देहसमुद्भवान्देहोत्पत्तिबीजभूतानतीत्य जन्मम
त्युजरादुःखैः॥ जन्म च मृत्युश्च जरा च दुःखानि च तैर्जीवन्नेव मुक्तः सन्विद्वानमृतमश्नुते। एवं सद्भावमधिगच्छतीत्यर्थः॥२०॥ जीवन्नेव
गुणानतीत्यामृतमश्नुत इति प्रश्नबीजं प्रतिलभ्य॥ ॥अर्जुन उवाच॥ कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो॥ किमाचारः कथं चैतांस्त्री
न्गुणानतिवर्तते॥२१॥ कैर्लिंगैश्चिह्नैरेतान्व्याख्यातान्गुणानतीतोऽतिक्रान्तो भवति॥ हे प्रभो किमाचारः कोऽस्याचार इति किमाचारः॥ क
थं केन च प्रकारेणैतांस्त्रीन्गुणानतिवर्तते॥२१॥ गुणातीतस्य लक्षणं गुणातीतत्वोपायश्चार्जुनेन पृष्टोऽस्मिन्श्लोके प्रश्नद्वयार्थं प्रतिवच
न॥ श्रीभगवानुवाच॥ ॥यत्तावत्कैर्लिंगैर्युक्तो गुणातीतो भवतीति श्रृणु॥ ॥प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव॥ न द्वेष्टि संप्रवृत्तानि न
त२

निवृत्तानि कांक्षति ॥२२॥ प्रकाशं च सत्वकार्यं प्रवृत्तिं च रजःकार्यं मोहमेव च तमःकार्यं इत्येतानि न द्वेष्टि संप्रवृत्तानि सम्यग्विषय
भावेनोद्भूतानि ॥ ममतामसः प्रत्ययो जातः स्तेनाहं मूढः । तथा राजसी प्रवृत्तिर्ममोत्पन्ना दुःखिका तेनाहं रजसा प्रवर्त्तितः प्रचलित
स्वरूपात्कष्टं मम वर्त्तते योयं स्वरूपावस्थाभ्रंशः ॥ तथा सात्विको गुणः प्रकाशात्मा मां विवेकमापादयत्सुखे च संजयन्न बध्नातीति तानि
न द्वेष्टि सम्यग्दर्शित्वेन ॥ तदेवं गुणातीतो न द्वेष्टि संप्रवृत्तानि । यथा च सात्विकादिपुरुषः सत्वादिकार्याण्यप्राप्तानं प्रतिप्रकाश्यानिवृत्तानि
कांक्षति न तथा गुणातीतो निवृत्तानि कांक्षतीत्यर्थः । एतन्न परप्रत्यक्षं लिंगं । किं तर्हि स्वात्मप्रत्यक्षत्वात् आत्मविषयमेवैतल्लक्षणं नहि
स्वात्मविषयं द्वेषमाकांक्षं चापरः पश्यति । अथेदानीं गुणातीतः किमाचार इति प्रश्नस्य प्रतिवचनमाह ॥ ॥उदासीनवदासीनो गुणै
र्यो न विचाल्यते ॥ गुणा वर्त्तन्त इत्येवं योऽवतिष्ठति नेंगते ॥२३॥ उदासीनवत् यथोदासीनो न कस्यचित्पक्षं भजति । तथायं गुणातीतो
तत्वोपायमार्गेवास्थितः । आसीन आत्मवित् । गुणैर्यः संन्यासी न विचाल्यते विवेकदर्शनावस्थातस्तदेतत्स्फुटीकरोति । गुणाः कार्यका
रणविषयाकारपरिणता । अतोऽन्यास्मिन्वर्त्तन्त इति योऽवतिष्ठति छंदोभंगभयात्परस्मैपदप्रयोगः । अनुतिष्ठति वा पाठान्तरं । ते न चेंगते
न चलति स्वरूपतयावस्थवतीत्यर्थः ॥२३॥ ॥ किंच ॥ समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः ॥ तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्म
संस्तुतिः ॥२४॥ समे सुखदुःखे यस्य सः समदुःखसुखः । स्वस्थः स्वात्मनि स्थितः प्रसन्नः समलोष्टाश्मकांचनः ॥ लोष्टं चाश्म च कांचनं च स
मानि यस्य स समलोष्टाश्मकांचनः तुल्यप्रियाप्रियः ॥ प्रियं चाप्रियं च तुल्ये समे प्रियाप्रिये यस्य सोयं तुल्यप्रियाप्रियो धीरो धीमान् । तुल्यनिं

दात्मसंस्तुतिश्च तुल्ये निंदात्मसंस्तुती यस्य यतेः स तुल्यनिंदात्मसंस्तुतिश्च ॥२४॥ किंच ॥ ॥मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारंभपरित्यागी गुणातीतः स उच्यते ॥२५॥ ॥मानापमानयोस्तुल्यः समो निर्विकारः । तुल्यो मित्रारिपक्षयोः यद्यप्युदासी[illegible]भ
वंति । केचित्स्वाभिप्रायेण तथापि पराभिप्रायेण मित्रारिपक्षयोरेव भवंतीति तुल्यो मित्रारिपक्षयोरित्याह सर्वारंभपरित्यागी दृष्टादृष्टार्था
नि कर्माणि आरभ्यंत इत्यारंभाः सर्वारंभान्परित्यक्तुं शीलमस्येति स सर्वारंभपरित्यागी देहधारणमात्रनिमित्तव्यतिरेकेण सर्वकर्मपरि
त्यागीत्यर्थः ॥ गुणातीतः स उच्यते ॥२५॥ उदासीनवदित्यादि गुणातीतः स उच्यते इत्येतदंतमुक्तं । यावत्प्रयत्नसाध्यं तावत्संन्यासिनाऽनुष्ठेयं ॥
गुणातीतत्वसाधनं मुमुक्षोः स्थिरीभूतं तु स्वसंवेद्यं सद्गुणातीतस्य यतेर्लक्षणं भवति ॥ अधुना च कथं त्रीन्गुणानतिवर्तत इति प्रश्नस्य
प्रतिवचनमाह ॥ ॥मां च योऽव्यभिचारेण भक्तियोगेन सेवते ॥ स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥२६॥ मां चेश्वरं नारायणं सर्व
भूतहृदयाश्रितं यो यतिः कर्मी वा अव्यभिचारेण कदाचिद्यो न व्यभिचरति । भक्तियोगो भजनं भक्तिः सैव योगस्तेन विवेकविज्ञानहितभक्तियोगपुरः
सरेण भगवदनुग्रहप्रसादजो भवति भक्तियोगस्तेन भक्तियोगेन ज्ञानसमुद्भवेन सेवते स गुणान्समतीत्यैतान्यथोक्तान्ब्रह्मभूयाय
भवनं भूयं ब्रह्मभवनाय मोक्षाय कल्पते समर्थो भवतीत्यर्थः ॥२६॥ कुत एतदुच्यते ॥ ॥ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ॥ शा
श्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च ॥२७॥ ब्रह्मणः परमात्मनो हि यस्मात्प्रतिष्ठाहं प्रतितिष्ठत्यस्मिन्निति प्रतिष्ठा । अहं प्रत्यगात्मा
कीदृग्भूतस्यामृतस्याविनाशिनोऽव्ययस्याविकारिणः शाश्वतस्य नित्यस्य च धर्मस्य धर्मज्ञानस्य ज्ञानयोगधर्मप्राप्यस्य सुखस्यानंदरूपस्या

मंदरूपस्यऐकांतिकस्याव्यभिचारिणः अमृतादिस्वभावस्यपरमात्मनःप्रत्यगात्मनप्रत्यगात्माप्रतिष्ठासम्य ग्ज्ञानेनपरमात्मत
यानिश्चीयतेतदेतद्ब्रह्मभावायकल्पतइत्युक्तं।ययाचेश्वरशक्त्याभक्तानुग्रहादिप्रयोजनायब्रह्मप्रतिष्ठतेप्रवर्त्ततेसाशक्तिर्ब्रह्मैवाहं
शक्तिशक्तिमतोर नन्यत्वादित्यभिप्रायः।अथवाब्रह्मशब्दवाच्यत्वात्सविकल्पकंब्रह्मतस्यब्रह्मणोनिर्विकल्पोहंवाच्यःप्रति
ष्ठाश्रयः॥किंविशिष्टस्यामृतस्यमरणधर्मरहितस्याव्ययस्यव्ययरहितस्यच॥किंच॥शाश्वतस्यचनित्यस्यधर्मस्यज्ञाननिष्ठाल
क्षणस्यसुखस्यतज्जनितस्यैकांतकस्यैकांतनियतस्यचप्रतिष्ठाहमितिवर्त्तते॥२७॥इतिश्रीगोविंदभगवत्पूज्यपादशिष्यपर
महंसपरिव्राजकाचार्यस्यश्रीशंकरभगवतःकृतौगीताभाष्येप्रकृतिगुणत्रयविभागयोगोनाम चतुर्दशोध्यायः॥१४॥यस्मान्मद
धी७ नप्राणिनांकर्मफलंज्ञानिनांचज्ञानफलमतोभक्तियोगेनमांयेसेवंतेतेमत्प्रसादात्ज्ञानप्राप्तिक्रमेणगुणातीतामोक्षंगच्छंति
किंमुवक्तव्यमात्मनस्तत्वमेवसम्यग्विजानंतइत्यतोभगवानर्जुनेनापृष्टमप्यात्मनस्तत्वंविवक्षुरुवाच॥ऊर्द्ध्वमूलमधःशाख
मित्यादि।तत्रतावद्वृक्षरूपकल्पनयावैराग्यहेतोःसंसारस्वरूपंवर्णयतिविरक्तस्यहिसंसाराद्भगवत्तत्वज्ञानेधिकारोनान्यस्येति॥
ऊर्द्ध्वमूलम धःशाखमश्वत्थंप्राहुरव्ययम्॥छंदांसियस्यपर्णानियस्तंवेदसवेदवित्॥१॥ऊर्द्ध्वमूलंकालतःसूक्ष्मत्वात्कारणत्वा
न्नित्यत्वाच्चोर्द्ध्वमुच्यते।ब्रह्माव्यक्तंमायाशक्तिमत्।तन्मूलमस्येतिसोयंसंसारवृक्षऊर्द्ध्वमूलोवाक्शाखइति॥पुराणेच॥अव्यक्त
मूलप्रभवस्तस्यैवानुग्रहोत्थितः॥बुद्धिस्कंधमयश्चैवइंद्रियांकुरकोट रः॥१॥महाभूतप्रशाखश्चविषयैःपत्रवांस्तथा॥धर्माध

मिष्टपुष्पस्थसुखदुःखफलोदयः। २ आजीव्यः सर्वभूतानां च ब्रह्मवृक्षः सनातनः॥ एतद्ब्रह्मवनं चैव चरति साक्षिवत्सदा॥ एत
च्छित्वा च भित्त्वा च ज्ञानेन परमासिना। ततश्चामरतां प्राप्य यस्मान्नावर्तते पुनः। इत्यादि। तदेवं ऊर्ध्वमूलं संसारं मायामयं वृक्षमधःशाखं म
हदहंकारतन्मात्रादयः। शाखा यस्यासौ अधो भवंतीति सोऽधःशाखस्तमधःशाखं श्वोऽपि स्थातेत्यश्वत्थस्तं क्षणप्रध्वंसिनमश्वत्थं प्राहुः कथयंति
त्यव्ययं संसारमायायाः अनादिकालप्रवृत्तत्वात्सोऽयं संसारवृक्षोऽव्ययमनाद्यनंतः देहादिसंतानाश्रयो हि प्रसिद्धमव्ययं तस्यैव संसारवृक्षा×
स्यरदमन्याद्विशेषणांतरं छंदांसि यस्य पर्णानि छंदांसि छादनादृग्यजुःसामलक्षणानि यस्य संसारवृक्षस्य पर्णानीव पर्णानि। यथा
वृक्षस्य परिरक्षणार्थानि पर्णानि तथा वेदाः संसारवृक्षस्य परिरक्षणार्था धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वाद्यथाव्याख्यातं सं×
सारवृक्षं समूलं यस्तं वेद स वेदवित् वेदार्थविदित्यर्थः॥१॥ न हि संसारवृक्षादस्मात्समूलात् ज्ञेयोऽन्योऽणुमात्रोऽप्यवशिष्टोऽस्त्यतः सर्वज्ञः
सः यो वेदार्थविदिति यस्मात्संसारवृक्षो समूलो सर्वं ज्ञेयमंतर्भवति तस्मात्समूलवृक्षज्ञानं स्तौति॥ तस्यैव संसारवृक्षस्यावयवव्यापारकल्प×
नोच्यते॥ ॥अधश्चोर्ध्वं च प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः। अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके॥२॥ ॥
अधो मनुष्यादिभ्यो यावत्स्थावरं ऊर्ध्वं च यावद्ब्रह्मा विश्वसृजो धामेत्येतदंतं यथाकर्म यथाश्रुतं॥ ज्ञानकर्मफलानि तस्य शाखा इव शाखाः
प्रसृताः प्रगताः गुणप्रवृद्धा गुणैः सत्वरजस्तमोभिः प्रवृद्धाः स्थूलीकृता उपादानभूता विषयप्रवालाः विषयाः शब्दादयः प्रवाला इव देहादिकर्म
फलेभ्यः शाखाभ्यः अंकुरीभवंतीव तेन विषयप्रवालाः शाखाः संसारवृक्षस्य परमं मूलमुपादानमूर्ध्वमूलमुक्तमथेदानीं कर्मफलजनितरा

गद्वेषादिवासनात्मकानीव धर्माधर्मप्रवृत्तिकारणान्यवांतरभावीनि तान्यधश्च देवाद्यपेक्षया मूलान्यनुसंततानि प्रसृतानि कर्मानुबंधीनि
कर्मधर्माधर्मलक्षणमनुबंधः पश्चाद्भावि येषां मुद्भूतिमनुभवंतीति तानि कर्मानुबंधीनि मनुष्यलोके विशेषतो । अत्र हि मनुष्याणां कर्माधिकारः प्र
सिद्धः ॥२॥ यदयं वर्णितः संसारवृक्षः ॥ ॥न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा ॥ अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण
दृढेन छित्वा ॥३॥ न रूपमस्य इह यथा वर्णितं तथा नैवोपलभ्यते स्वप्नमरीच्युदकमायागंधर्वनगरसमत्वात् । दृष्टनष्टस्वरूपो हि स यतस्तत एव
नांतो न पर्यंतो निष्ठा समाप्तिर्वा विद्यते । तथा न चादिरित आरभ्यायं प्रवृत्त इति न केनचिद्गम्यते न च संप्रतिष्ठा स्थितिर्मध्यमस्य केनचिदुप
लभ्यते ॥ अश्वत्थमेनं यथोक्तं सुविरूढमूलं सुष्ठु विरूढानि विरोहं गतानि सुदृढानि मूलान्यस्य तमेनं सुविरूढमूलं असंगशस्त्रेण असंगता
पुत्रवित्तलोकैषणाभ्यो व्युत्थानं तेनासंगशस्त्रेण दृढेन परमात्माभिमुख्यनिश्चयदृढीकृतेन पुनः पुनर्विवेकाभ्यासाश्मनि शितेन छित्वा सं
सारवृक्षं सबीजमुद्धृत्य ॥३॥ ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्त्तंति भूयः ॥ तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी
॥४॥ ॥ततः पश्चात् यत्पदं वैष्णवं तत्परिमार्गितव्यं परिमार्गणमन्वेषणं ज्ञातव्यमित्यर्थः ॥ यस्मिन्पदे गताः प्रविष्टा न निवर्त्तंति नावर्त्तं
ते भूयः पुनः संसाराय कथं परिमार्गितव्यमित्याह ॥ तमेव यः पदशब्देनोक्त माद्यमादौ भवं पुरुषं प्रपद्ये इत्येवं परिमार्गितव्यं तच्छरणतयेत्य
र्थः ॥ कोसौ पुरुष इत्युच्यते ॥ यतो यस्मात्पुरुषात्संसारमायावृक्षप्रवृत्तिः प्रसृता निःसृता ऐंद्रजालिकादिव माया पुराणी चिरंतनी ॥४॥ कथंभूता
स्तत्पदं गच्छंतीत्युच्यते ॥ ॥निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः ॥ द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदम

२०१
गी॰गी॰

व्ययं तत्॥५॥ निर्मानमोहा मानश्च मोहश्च मानमोहौ तौ निर्गतौ येभ्यस्ते निर्मानमोहा मानमोहवर्जिताः जितसंगदोषाः संग एव दोषः संगदोषो जि-
तः संगदोषो यैस्ते जितसंगदोषाः अध्यात्मनित्याः परमात्मस्वरूपालोचनतत्पराः विनिवृत्तकामा विशेषेण निःशेषेण निर्लेपेन
निवृत्ताः कामा येषां ते विनिवृत्तकामाः यतयः संन्यासिनः । द्वंद्वैः प्रियाप्रियादिभिर्विमुक्ताः सुखदुःखसंज्ञैः परित्यक्ता गच्छंत्यमूढा मोहवर्जि-
ताः पदमव्ययं तद्यथोक्तं ॥५॥ ॥तदेव पदं पुनर्विशिष्यते॥ न तद्भासयते सूर्यो न शशांको न पावकः ॥ यद्गत्वा न निवर्त्तंते तद्धाम परमं मम॥
६॥ तद्धामेति व्यवहितेन संबंधः धाम तेजोरूपं पदं न भासयते आदित्यः सूर्यः सर्वावभासयते आदित्यः सूर्यः सर्वावभासनशक्ति-
मत्वेपि सति न शशांकः चंद्रो न न च पावको ऽग्निरपि यद्धाम वैष्णवं पदं गत्वा प्राप्य न निवर्त्तंते ॥ यच्च सूर्यादिभिर्न भास्यते तद्धाम परमं प-
दं विष्णोर्मम यद्गत्वा न निवर्त्तंते त्युक्तं ॥६॥ ननु सर्वो हि गतिरागत्यंता संयोगा ता इति हि प्रसिद्धं कथमुच्यते ॥ तद्धामगतानां नास्ति निवृ-
त्तिरिति स्पष्टयन् तत्र कारणं ॥ ममैवांशो जीवलोके जीवभूतः सनातनः ॥ मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति॥७॥ ॥ममैव पर-
मात्मनो ऽंशो भागो ऽवयव एकदेश इत्यनर्थांतरं जीवलोके जीवानां लोके संसारे जीवभूतो भोक्ता कर्त्तेति प्रसिद्धः सनातनः ॥ यथा जलसूर्यकां
सूर्यांशो जलनिमित्तापाये सूर्यमेव गत्वा न निवर्त्तते तेनैवात्मना गच्छत्येवमेतत्॥ तथायमपि अंशस्तेनैवात्मना गच्छत्येवमेव यथा वा घटाद्यु-
पाधिपरिछिन्नो घटाद्याकाशः आकाशांशः सन् घटादिनिमित्तापाये आकाशं प्राप्य नानिवर्त्तत इत्येवमेव मत्प्रपन्ना मुक्ता यद्गत्वा न निवर्त्तंत इति॥
ननु निरवयवस्य परमात्मनः कुतोऽवयव एकदेशांश इति सावयवत्वे च विनाशप्रसंगो ऽवयवविभागात् नैष दोषो ऽविद्याकृतोपाधिपरिछिन्नत्व

वा

२०१
गी॰गी॰

कदेशो शरूव कल्पितो यथा दर्शितः इत्यर्थः ॥ द्वितीयाध्याये विस्तरशः स च जीवो मदंशत्वेन कल्पितः कथं संसरति उच्यते ॥ मनः ष x
ष्ठानि श्रोत्रादीनींद्रियाणि प्रकृतिस्थानि स्वस्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि कर्षति आकर्षति कस्मिन् काले ॥ ॥शरीरं यदवाप्नोति
यच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥८॥ यच्चापि यदा वाप्युत्क्रामति ईश्वरो देहादिसंघातस्वामी जी
वस्तदा कर्षति ॥ श्लोकस्य द्वितीयः पादः पूर्ववशात्प्रथमेन संबध्यते ॥ यदा च पूर्वस्माच्छरीरांतरमाप्नोति तदा गृहीत्वैतानि मनःषष्ठानी
द्रियाणि संयाति सम्यग्याति गच्छति किमिवेत्याह ॥ वायुः पवनो गंधानिवाशयात् पुष्पादेः ॥८॥ कानि पुनः तानि ॥ श्रोत्रं चक्षुः स्पर्शनं
च रसनं घ्राणमेव च ॥ अधिष्ठाय मनश्चायं विषयानुपसेवते ॥९॥ श्रोत्रं चक्षुः स्पर्शनं च त्वगिंद्रियं रसनं घ्राणमेव च ॥ मनश्चेति षष्ठं
प्रत्येकमिंद्रियेण सहाधिष्ठाय देहस्थो विषयान् शब्दादीन् उपसेवते ॥९॥ एवं देहगतं देहात् ॥ उत्क्रामंतं स्थितं वापि भुंजानं वा गुणा
न्वितं ॥ विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः ॥१०॥ उत्क्रामंतं परित्यजंतं देहं पूर्वोपात्तं स्थितं चापि देहे तिष्ठंतं भुंजानं वा शब्दादी
नुपभुंजमानं गुणान्वितं सुखदुःखमोहाद्यैर्गुणैरन्वितं अनुगतं संयुक्तमित्यर्थः ॥ एवंभूतमप्येनं मन्यते दर्शनगोचरप्राप्तं विमूढा
दृष्टादृष्टविषयभोगबलात् शास्त्रचेतसोपानेकधा मूढा नानुपश्यंति अहो कष्टं वर्त्तते इत्यनुक्रोशति भगवान् ये तु पुनः प्रमाणजनि
तज्ञानचक्षुषस्ते ह्येनं पश्यंति ज्ञानचक्षुषो विविक्तदृष्टय इत्यर्थः ॥१०॥ केचित्तु ॥ यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितं ॥ यतंतो
प्यकृतात्मानो नैनं पश्यंत्यचेतसः ॥११॥ यतंतः प्रयत्नं कुर्वंतो योगिनः समाहितचित्ताः एनं प्रकृतात्मानं पश्यंत्ययमहमस्मीत्युपलभंते

आत्मनि स्वस्यां बुद्धाववस्थितं यतंतोऽपि शास्त्रादिप्रमाणैरकृतात्मानोऽसंस्कृतात्मानस्तपसेंद्रियजयेन च दुश्चरितादनुपरता अशांत
दर्प्याः प्रयत्नं कुर्वंतोऽपि नैनं पश्यंत्यचेतसोऽविवेकिनः ॥११॥ ॥यत्पदं सर्वस्यावभासकमप्यादित्यगत्यादिकं ज्योतिर्नावभासते। यत्प्राप्य मु
मुक्षवः पुनः संसाराभिमुखा न निवर्तंते यस्य च पदस्योपाधिभेदमनुविधीयमाना जीवा घटाकाशादय इवाकाशस्यांशास्तस्य पदस्य स
र्वात्मत्वं सर्वव्यवहारास्पदत्वं च विवक्षुश्चतुर्भिः श्लोकैर्विभूतिसंक्षेपमाह भगवान् ॥ ॥यदादित्यगतं तेजो जगद्भासयतेऽखिलं ॥ यच्चंद्रमसि
यच्चाग्नौ तत्तेजो विद्धि मामकं ॥१२॥ यदादित्यगतमादित्याश्रयं किं तत्तेजो दीप्तिः प्रकाशो जगद्भासयते प्रकाशयति अखिलं समस्तं यच्चंद्रम
सि यच्च शशाङ्के तत्तेजोऽवभासकं वर्तते । यच्चाग्नौ हुतवहे तत्तेजो विद्धि जानीहि मामकं मदीयं ॥ किंच ॥ अथवा यदादित्यगतं तेजः चैतन्यात्मकं
ज्योतिः यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं मदीयं वैष्णवं ज्योतिः ॥ ननु स्थावरेषु जंगमेषु च तत्समानं चैतन्यात्मकं ज्योतिस्तत्क
थमिदं विशेषणं । यदादित्यगतमित्यादि नैष दोषः । सत्वाधिक्यादाधिक्योपपत्तेः । आदित्यादिषु हि सत्वमत्यंतमास्वरमतस्तत्रैवाविस्तरं ज्यो
तिरिति तद्विशिष्यते न तु तत्रैव तदधिकमिति ॥ यथा हि लोके तुल्येऽपि मुखसंस्थाने न काष्ठकुड्यादौ मुखमाविर्भवति आदर्शे च स्वच्छतरे
च तारतम्येनाविर्भवति तद्वत् ॥ ॥किंच ॥ गामाविश्य च भूतानि धारयाम्यहमोजसा ॥ पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१३॥
गां पृथिवीमाविश्य धारयामि भूतानि जगदहमोजसा बलेन यद्बलं कामरागविवर्जितं मैश्वरं जगद्धारणाय पृथिव्यामाविष्टं येन गुर्वी पृ
थिवी नाधः पतति न विदीर्यते च । तथा च मंत्रवर्णः येन द्यौरुग्रा पृथिवी च दृढेति स दाधार पृथिवीमित्यादिश्च । अतो गामाविश्य च भूतानि

चराचराणि धारयामीति किंच पृथिव्यां जाता ओषधीः सर्वा व्रीहियवाद्याः पुष्णामि पुष्टिमतीः रसस्वादवतीश्च करोमि ॥ सोमो भूत्वा रसात्मकः सो
सोमः सन् रसात्मको रसस्वभावः ॥ सर्वरसानामाकरः सोमः सन् सर्वा ओषधीः स्वात्मरसानुप्रवेशेन पुष्णाति ॥१३॥ ॥किंच॥ अहं वैश्वानरो भू
त्वा प्राणिनां देहमाश्रितः ॥ प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधं ॥१४॥ अहमेव वैश्वानर उदरस्थोऽग्निर्भूत्वा अयमग्निर्वैश्वानरो यो
ऽयमन्तः पुरुष इत्यादिश्रुतेः । वैश्वानरः सन् प्राणिनां प्राणवतां देहमाश्रितः प्रविष्टः प्राणापानाभ्यां समायुक्तः संयुक्तः पचामि पक्तिं क
रोमि अन्नं चतुर्विधं भोज्यं भक्ष्यं चोष्यं लेह्यमाश्रितः प्रविष्टः प्राणापानाभ्यां चाभोक्ता वैश्वानरोऽग्निर्भोज्यमन्नं सोमः तदुभयमग्निषोमौ
सर्वमिति पश्यतो दोषलेपो न भवति ॥१४॥ किंच॥ सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च। वेदैश्च सर्वैरहमेव वेद्यो वि
दांतकृद्वेदविदेव चाहं ॥१५॥ सर्वस्य प्राणिजातस्याहमात्मा सन् हृदि बुद्धौ सन्निविष्टः। ततो मत्तः आत्मनः सर्वप्राणिनां स्मृतिर्ज्ञानं तदपोह
नं च। येषां पुण्यकर्मणां कर्मानुरोधेन ज्ञानस्मृती भवतः तथा पापकर्मणां पापकर्मानुरूपेण स्मृतिज्ञानयोरपोहनं अपगमनं च। वे
दैश्च सर्वैरहमेव परमात्मा वेद्यो वेदितव्यो वेदान्तकृत् वेदान्तार्थसंप्रदायकृदित्यर्थः। वेदवित् वेदार्थविदेव चाहं ॥१५॥ भगवत ईश्वरस्य ना
रायणाख्यस्य विभूतिविशेषः संक्षेपः उक्तो यदादित्यगतं तेज इत्यादिना । अधुना तस्यैव क्षराक्षरोपाधिप्रविभक्ततया निरुपाधिकस्य
केवलस्य स्वरूपनिर्धारणार्थमुत्तरे श्लोका आरभ्यन्ते । तत्र सर्वमेवातीतानागताध्यायार्थजातं त्रिधा राशीकृत्याह ॥ ॥द्वाविमौ पु
रुषौ लोके क्षरश्चाक्षर एव च ॥ क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१६॥ द्वाविमौ पृथक्राशीकृतौ पुरुषावित्युच्यते ॥ लोके सं

अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयकोशे २

सारे क्षरः क्षरतीति क्षरो विनाशी एकोऽ२ परः पुरुषोऽक्षरस्तद्विपरीतो भगवतो मायाशक्तिः क्षराख्यस्य पुरुषस्योत्पत्तिबीजमने
कसंसारिजंतुकामकर्मादिसंस्काराश्रयमक्षरः पुरुष उच्यते। कौ तौ पुरुषावित्याह स एव भगवान् क्षरः सर्वाणि भूतानि समस्तवि
कारजातमित्यर्थः कूटस्थः कूटो राशिरिव स्थितिः अथवा कूटो मायावंचनाजिह्मं कुटिलं चेति पर्यायाः। अनेकमायादिप्रकारे
ण स्थितः कूटस्थः संसारबीजानंतत्वाद क्षर उच्यते॥१६॥ ॥अन्योत्तराक्षराभ्यां विलक्षणः क्षराक्षरोपाधिद्वयदोषेणास्पृष्टो
नित्यशुद्धबुद्धमुक्तस्वभावः॥ ॥उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः॥ यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥१७॥ ॥
उत्तमस्तूत्कृष्टतमः पुरुषस्त्वन्यः अत्यंतविलक्षणाभ्यामाभ्यां परमात्मेति परमश्चासावात्मा च देहाद्यविद्याकृतात्मभ्यः अन्नमयादिभ्यः पंचभ्यः
आत्मा च सर्वभूतानां प्रत्यक्चेतन इत्यर्थः परमात्मेत्युदाहृतः उक्तो वेदांतेषु स एव विशिष्यते। यो लोकत्रयं भूर्भुवःस्वराख्यं स्वकीय
यावलशक्त्या आविश्य प्रविश्य स्वरूपसद्भावमात्रेण बिभर्त्ति धारयत्यव्ययो नास्य व्ययो विद्यत इत्यव्यय ईश्वरः सर्वज्ञो नारायणाख्य
ईशनशीलः॥१७॥ यथा व्याख्यातस्येश्वरस्य पुरुषोत्तम इत्येतन्नाम प्रसिद्धं तस्य नामनिर्वचनप्रसिद्ध्यार्थवत्त्वं नाम्नो दर्शयन्निरति
शयो ह्यमीश्वर इत्यात्मानं दर्शयति भगवान्॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥१८॥ यस्मात्क्षरम
तीतोऽहं संसारमायावृक्षमश्वत्थाख्यमतिक्रांतोऽहमक्षरादपि संसारवृक्षबीजभूतादपि चोत्तमः उत्कृष्टतम ऊर्ध्वतमो वा क्षराक्षराभ्यामुत्तमत्वाद
स्मि अतोऽस्मि लोके वेदे च प्रथितः प्रख्यातः पुरुषोत्तम इत्येवं मां भक्तजना विदुः काव्यादिषु चैकवचः पुरुषोत्तम इति अनेनाभिधानेनाभिगृणंति॥१८॥

अथेदानीं यथानिरुक्तमात्मानं यो वेद तस्येदं फलमुच्यते॥ ॥यो मामेवमसंमूढो जानाति पुरुषोत्तमं॥ स सर्वविद्भजति मां सर्वभावेन भा
रत॥१९॥ यो मामीश्वरं यथोक्तविशेषणमेवं यथोक्तेन प्रकारेणासंमूढः संमोहवर्जितः सन् जानात्ययमहमस्मीति पुरुषोत्तमं॥ स सर्व
वित्सर्वं वेत्तीति सर्ववित्सर्वतः सर्वभूतस्थं भजति मां सर्वात्मना सर्वभावेन सर्वात्मचित्ततया भारत॥१९॥ अस्मिन्नध्याये भगवत्तत्त्वज्ञा
नं मोक्षफलमुक्त्वाथेदानीं तत्स्तौति॥ ॥इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ॥ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत॥२०॥ ॥
इत्येतद्गुह्यतमं गोप्यतममत्यंतरहस्यमित्येतत्॥ किं तच्छास्त्रं यद्यपि गीताख्यं समस्तं शास्त्रमुच्यते॥ तथाप्ययमेवाध्याय इदं शास्त्रमि
त्युच्यते॥ स्तुत्यर्थं प्रकरणात्। प्रकरणात्सर्वो हि गीताशास्त्रार्थोऽस्मिन्नध्याये समासेनोक्तः। न केवलं सर्वश्च वेदार्थ इह परिसमाप्तो यस्तं वेद
स वेदवित्॥ वेदैश्च सर्वैरहमेव वेद्य इति चोक्तमिदमुक्तं कथितं मया हे अनघ। एतच्छास्त्रं यथादर्शितार्थं बुद्ध्वा बुद्धिमान्स्याद्भवेन्नान्य
थाकृतकृत्यश्च भारत॥ कृतं कृत्यं कर्त्तव्यं येन स कृतकृत्यः॥ विशिष्टजन्मप्रसूतेन ब्राह्मणेन यत्कर्त्तव्यं तत्सर्वं भगवत्तत्त्वे विदिते कृतं भवे
दित्यर्थः॥ न चान्यथा कर्त्तव्यं परिसमाप्यते कस्यचिदित्यभिप्रायः सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते इति चोक्तमेतद्धि जन्मसामग्र्यमि
ति च मानवं वचनं यत एतत्परमार्थतत्त्वं मत्तः श्रुतवानसि अतः कृतार्थस्त्वं भारतेति॥२०॥ इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंस
परिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ गीताभाष्ये पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः॥१५॥ दैव्यासुरी राक्षसी चेति प्राणिनां प्रकृत
यो नवमेऽध्याये सूचितास्तासां विस्तरेण प्रदर्शनाय अभयं सत्त्वसंशुद्धिरित्याद्यध्याय आरभ्यते॥ तत्र संसारमोक्षाय दैवी प्रकृतिर्निबंधायासुरी राक्ष

१०४
गी॰ टी॰

सी चेति॥ दैव्याश्चादानाय प्रदर्शनं क्रियते। इतरयोः परिवर्जनाय॥ ॥श्रीभगवानुवाच॥ ॥अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः॥ दानं
दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवं॥१॥ ॥अभयमभीरुता। सत्त्वसंशुद्धिः सत्त्वस्यांतःकरणस्य व्यवहारेषु परवंचनामायानृतादिप
रिवर्जनं शुद्धस्वभावेन व्यवहार इत्यर्थः॥ ज्ञानयोगव्यवस्थितिः ज्ञानं शास्त्रादाचार्यतश्चात्मादिपदार्थानामवगमो ऽवगतानामिंद्रियाद्यु
पसंहारेणैकाग्रतया स्वात्मसंवेद्यतापादनं योगस्तयोर्ज्ञानयोगयोर्व्यवस्थितिर्व्यवस्थानं तन्निष्ठता। एषा प्रधाना दैवी सात्त्विकी संप
च्च येषामधिकृतानां यथाप्रकृति संभवति सात्त्विकी सोच्यते। दानं यथाशक्ति संविभागोऽन्नादीनां दमश्च बाह्यकरणानामुपशमोंतः
करणस्योपशांतिं वक्ष्यति। यज्ञश्च श्रौतोऽग्निहोत्रादिः स्मार्तश्च देवयज्ञादिः स्वाध्यायः ऋग्वेदाद्यध्ययनमदृष्टार्थं तपो वक्ष्यमाणं शारीरादि
आर्जवं स्वक्रतं सर्वदा॥१॥ किंच॥ ॥अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनं॥ दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलं॥२॥ ॥अहिंसा
अहिंसनं प्राणिनां पीडनवर्जनं सत्यमप्रियानृतवर्जितं यथाभूतार्थवचनं क्रोधः परैराक्रुष्टस्याभिहितस्य वा प्राप्तस्य क्रोधस्योपशम
नं॥ त्यागः संन्यासः पूर्वं दानस्योक्तत्वात्। शांतिरंतःकरणस्योपशमः॥ अपैशुनं अपिशुनता परस्मै पररंध्रप्रकटीकरणं पैशुनं तदभा
वोऽपैशुनं दया भूतेषु दुःखितेषु अलोलुत्वं इंद्रियाणां विषयसन्निधावविक्रिया। मार्दवं मृदुता अक्रौर्यं ह्रीः लज्जा अचापलं असति प्र
योजने वाक्पाणिपादादीनां व्यापारवर्जितत्वं॥२॥ किंच॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता॥ भवंति संपदं दैवीमभिजातस्य भारत॥
॥३॥ ॥तेजः प्रागल्भ्यं न त्वगतादीप्तिः॥ क्षमा आक्रुष्टस्य ताडितस्य वांतर्विक्रियानुत्पत्तिः उत्पन्नायां विक्रियायां प्रशमनमक्रोध इत्यवोचाम

१०४
गी॰ टी॰

पद्रोमायाश्च क्रोधस्य च विशेषः ।३। ति देहेन्द्रियेष्ववसादप्राप्तेषु तस्य प्रतिषेधकौ तत्प्रकारण वृत्तिविशेषो येनोत्तंभितानि करणानि देहश्च
नावसीदति । शौचं द्विविधं मृज्जलकृतं वाह्यमाभ्यंतरं मनोबुद्ध्योर्नैर्मल्यं मायारागादिकालुष्याभावः एवं द्विविधं शौचम् अद्रोहः परजिघांसाऽभावो
ऽतिमहं सनं । नातिमानिता अत्यर्थं मानोऽतिमानः स यस्य विद्यते सोऽतिमानी तद्भावोऽतिमानिता तदभावो ना ति मानि
तात्मान्यः पूज्यतातिशयभावनाभाव इत्यर्थः । एवं त्वभयादीन्येतदंतानि संपदं अभिजातस्य किं विशिष्टां संपदं दैवीं देवानां संपत्तामभिलक्ष्य जा
तस्य दैवीविभूत्यर्हस्य भाविकल्याणस्येत्यर्थः हे भारत ॥३॥ अथेदानीमासुरी संपदुच्यते ॥ ॥दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च ॥
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥४॥ दंभो धर्मध्वजित्वं दर्पः धनस्वजनादिनिमित्त उत्सेकः । अभिमानः पूर्वोक्तः क्रोधश्च पारुष्यमेव
च ॥ परुषवचनं यथा काणं चक्षुष्मान् विरूपं रूपवान् हीनाभिजनमुत्तमाभिजन इत्याद्यज्ञानं चाविवेकज्ञानं मिथ्याज्ञानं कर्त्तव्याकर्त्तव्या
दिविषयम् अभिजातस्य पार्थ किमभिजातस्येत्याह । असुराणां संपदमासुरीं तामभिलक्ष्य जातस्येत्यर्थः ॥४॥ अनयोः संपदोः कार्यमुच्यते ॥ ॥
दैवी संपद्विमोक्षा यनिबंधायासुरी मता ॥ मा शुचः संपदं दैवीमभिजातोसि पांडव ॥५॥ ॥दैवी संपद्या सा विमोक्षाय संसारनिबंधनात्
निबंधनाय नियतो बंधो निबंधस्तदर्थमासुरी संपत् मता अभिप्रेता तथा राक्षसी तथैव मुक्तो ऽर्जुनस्यांतर्गतं भावं किमहमासुरीसंपद्युक्तः । किं
वा दैवीसंपद्युक्तः इत्येवमालोचनात्मकरूपमालक्ष्य भगवानाह मा शुचः । शोकं मा कार्षीः । संपदं दैवीमभिजातोसि अभिलक्ष्य जातोसि भावि
कल्याणस्त्वमसीत्यर्थः ॥ हे पांडव ॥ द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ॥ दैवो विस्तरशः प्रोक्तः आसुरं पार्थ मे शृणु ॥६॥ द्वौ हि स्य

१०५
गी॰ भा॰

ख्याकौ भूतसर्गौ भूतानां मनुष्याणां सर्गौ सृष्टी सृज्येत इति भूतान्येव सृज्यमानानि दैवासुरसंपद्द्वययुक्तानि इति भूतसर्गौ इत्युच्यते द्वया
ह प्राजापत्या देवाश्चासुराश्चेति श्रुतेः लोकेस्मिन् संसारे इत्यर्थः सर्वेषां द्वैविध्योपपत्तेः कौ तौ भूतसर्गावित्याह प्रकृतावेव दैवश्चासुर एव च॥
उक्तयोरेव पुनरनुवादप्रयोजनमाह॥ दैवो भूतसर्गोऽभयं सत्वसंशुद्धिरित्यादिना विस्तरशो विस्तरप्रकारैः प्रोक्तः कथितः न त्वासुरो विस्त
रशोऽतस्तत्परिवर्जनार्थमासुरं पार्थ मे मम वचनादुच्यमानं विस्तरशः शृणु अवधारय॥६॥ आध्यायपरिसमाप्तेरासुरी संपत् प्राणिविशे
षण[illegible]त्वेन प्रदर्श्यते॥ प्रत्यक्षीकरणेन च शक्यते तस्याः परिवर्जनं कर्तुमिति॥ ॥प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः॥ न शौचं ना
पि चाचारो न सत्यं तेषु विद्यते॥७॥ प्रवृत्तिं च प्रवर्तनं यस्मिन् पुरुषार्थसाधने कर्तव्ये सा प्रवृत्तिस्तां प्रवृत्तिं निवृत्तिं च तद्विपरीतां यस्मादनर्थ
हेतोर्निवर्तितव्यं सा निवृत्तिस्तां च जना आसुरा न विदुः न जानन्ति न केवलं प्रवृत्तिनिवृत्ती एव न विदुः न शौचं नापि चाचारो न सत्यं तेषु विद्यते॥
अशौचा अनाचारा मायाविनोऽनृतवादिनो ह्यसुराः॥७॥ ॥किंच॥ असत्यमप्रतिष्ठं ते जगदाहुर[illegible]नीश्वरं॥ अपरस्परसं[illegible]भूतं किम
न्यत्कामहैतुकं॥८॥ ॥असत्यं यथा वयमनृतप्रायास्तथेदं जगत्सर्वमसत्यमप्रतिष्ठं॥ नास्य धर्माधर्मौ प्रतिष्ठातोऽप्रतिष्ठं चेति ते आसुर
जना जगदाहुरनीश्वरं॥ न च धर्माधर्मसव्यपेक्षकमस्य शासितेश्वरो विद्यत इत्यतोऽनीश्वरं जगदाहुः॥ किंच॥ अपरस्परसंभूतं कामप्रयु
क्तयोः स्त्रीपुरुषयोरन्योन्यसंयोगाज्जगत्सर्वं भूतं किमन्यत्कामहैतुकं कामहैतुकमेव कामहैतुकं किमन्यज्जगतः कारणं न किंचिददृष्टं धर्माधर्मादि
कारणांतरं विद्यते॥८॥ जगतः काम एव प्राणिनां कारणमिति लोकायतिकदृष्टिरियं॥ ॥एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः॥

१०५
गी॰ भा॰

प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥९॥ ॥एतां दृष्टिमवष्टभ्य आश्रित्य नष्टात्मानो नष्टस्वभावा भ्रष्टपरलोकसाधना अल्पबुद्धयो विष ॥
यात्मैव बुद्धिर्येषां ते अल्पबुद्धयः प्रभवंत्युद्भवंत्युग्रकर्माणः क्रूरकर्माणो हिंसात्मकाः क्षयाय जगतः प्रभवंतीति संबंधः ॥ जगतोऽहिताः शत्रवः
इत्यर्थः ॥९॥ किंच ॥ ॥काममाश्रित्य दुष्पूरं दंभमानमदान्विताः ॥ मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्ततेऽशुचिव्रताः ॥१०॥ कामं इच्छाविशेषमा
श्रित्यावष्टभ्य दुःपूरमशक्यपूरणं दंभमानमदान्विताः दंभश्च मानश्च मदश्च दंभमानमदास्तैरन्विताः मोहादविवेकतः गृहीत्वोपादाय
असद्ग्राहानशुभानिश्चयान्प्रवर्त्तते ईहंते लोके अशुचिव्रताः अशुचीनि व्रतानि येषां ते ॥१०॥ किंच ॥ चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः ॥
कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥ ॥चिंतामपरिमेयां च न परिमातुं शक्यते यस्याश्चिंतायास्तामपरिमेयां तां प्रलयांतां
मरणांतामुपाश्रिताः सदा चिंतापरा इत्यर्थः ॥ कामोपभोगपरमाः ॥ काम्यंत इति कामाः शब्दादयस्तदुपभोगपरमाः एष एव परमः पुरुषार्थो
यः कामोपभोग इत्येवं निश्चितात्मान एतावदिति निश्चिताः ॥११॥ ॥आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ॥ ईहंते कामभोगार्थमन्यायेनार्थसंच
यान् ॥१२॥ आशापाशशतैः आशा एव पाशाः आशापाशास्तेषां शतानि तैर्बद्धाः संतः सर्वत आकृष्यमाणाः कामक्रोधपरायणाः कामक्रोधौ परम
यनं परमाश्रयो येषां ते कामक्रोधपरायणाः ईहंते कामभोगार्थं कामभोगप्रयोजनाय अन्यायेन अर्थसंचयान् अन्यायेन परस्वापहरणादिना इत्यर्थः ॥
१२॥ इदृशाश्च ते येषां मनःप्रायः ॥ इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं ॥ इदमस्तीदमपि मे भविष्यति पुनर्धनं ॥१३॥ इदं द्रव्यं प्रथमं मयेदानीं म
या लब्धं इदमन्यत्प्राप्स्ये मनोरथं मनस्तुष्टिकरं इदं चास्ति इदमपि मे भविष्यत्यागामिनि संवत्सरे पुनर्धनं तेनाहं धनी विख्यातो भविष्यामि ॥१३॥

असौ मया हतः शत्रुर्हनिष्ये चापरानपि॥ ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी॥१४॥ असौ देवदत्तनामा मया हतः दुर्जनः शत्रुर्हनिष्ये चान्या
न्वराकानपरानपि। किमेते करिष्यंति तपस्विनः सर्वथापि नास्ति मत्तुल्य ईश्वरोऽहमहं भोगी सर्वप्रकारेण सिद्धोऽहं संपन्नः॥ पुत्रैर्नप्तृभिर्न केवलं
मानुषोऽहं बलवान्सुखी चाहमेव अन्ये तु भूमिभारायावर्त्तिनः॥१४॥ आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया॥ यक्ष्ये दास्यामि मोदिष्य इ
त्यज्ञानविमोहिताः॥१५॥ ॥आढ्यो धनेनाभिजनवान्सप्तपुरुषं श्रोत्रियत्वादिसंपन्नस्तेनापि न मम तुल्योऽस्ति कश्चित् कोऽन्योऽस्ति सदृशः
तुल्यो मया॥ किं च॥ यक्ष्ये यागेनाप्यन्यानभिभविष्यामि। दास्यामि नटादिभ्यो मोदिष्ये हर्षं चातिशयं प्राप्स्यामीत्येवमज्ञानविमोहिताः॥
अज्ञानेनाविवेकेन विमोहिताः अविवेकभावमापन्नाः॥१५॥ अनेकचित्तविभ्रांता मोहजालसमावृताः॥ प्रसक्ताः कामभोगेषु पतंति नरकेऽशु
चौ॥१६॥ अनेकचित्तविभ्रांताः उक्तप्रकारैरनेकैश्चित्तैर्विविधं भ्रांताः अनेकचित्तविभ्रांता मोहजालसमावृताः मोहोऽविवेकोऽज्ञानं तदेव जा
लमिवावरणात्मकत्वात्तेन समावृताः प्रसक्ताः कामभोगेषु तत्रैव निषण्णाः सन्तस्तेनोपचितकल्मषाः पतंति नरकेऽशुचौ वैतरण्यादौ॥
१६॥ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः॥ यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकम्॥१७॥ आत्मसंभाविताः सर्वगुणविशिष्टतया
आत्मनैव संभाविताः स्तब्धा अप्रणतात्मानो धनमानमदान्विताः॥ धनान्निमित्तो मानो मदश्च ताभ्यां धनमानमदाभ्यामन्विताः॥ यजंते नाम
यज्ञैर्नाममात्रैर्यज्ञैस्ते दंभेन धर्मध्वजितया विधिपूर्वकं विहितांगेतिकर्त्तव्यतारहितैः॥१७॥ ॥अहंकारं बलं दर्पं कामं क्रोधं च संश्रि
ताः॥ मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः॥१८॥ अहंकरणमहंकारः विद्यमानैरविद्यमानैश्च गुणैरात्मन्यध्यारोपितैर्विशिष्टमात्मा

क्तीनमहमितिमन्यतेसोऽहंकारोविद्यारव्यःकस्तमःसर्वदोषाणांमलंसर्वानर्थप्रवृत्तीनांचतथाबलंपरात्रिभवनिमित्तंकामरागान्वितंद
र्पंदर्पोनामयस्योद्भवेधर्ममतिक्रमतिसोऽयमंतःकरणाश्रयोदोषविशेषःकामंस्त्र्यादिविषयंक्रोधमनिष्टविषयंएतान्नत्यास्रमहतोदोषान्स
श्रिताः॥ किंचते॥ मामीश्वरंआत्मपतेदेहेषुचस्वदेहेपरदेहेषुच॥ तद्बुद्धिकर्मसाक्षिभूतंमांप्रद्विषतोम च्छासनातिवर्त्तित्वंप्रद्वेषस्तंकुर्व
न्तः॥ अभ्यसूयकाःसन्मार्गस्थानांगुणेष्वसहमानाः॥१८॥ ॥ तानहंद्विषतःक्रूरान्संसारेषुनराधमान्॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव
योनिषु॥१९॥ तानहंसन्मार्गप्रतिपक्षभूतान्द्वेषायुद्धेषिणोद्विषतश्चमांक्रूरान्संसारेष्वेवनरकसंसरणमार्गेषुनराधमानधर्मदोषवत्
त्वात्क्षिपामिप्रक्षिपाम्यजस्रंसततमशुभानशुभकर्मकारिणःआसुरीष्वेवक्रूरकर्मप्रायासिंहव्याघ्रादियोनिषुक्षिपामीत्यनेनसंबंधः॥१९॥
आसुरींयोनिमापन्नाःमूढाजन्मनिजन्मनि॥ मामप्राप्यैवकौन्तेयततोयान्त्यधमांगतिं॥२०॥ आसुरींयोनिमापन्नाःप्रतिपन्नाःमूढाअवि
वेकिनोजन्मनिजन्मनिप्रतिजन्मतमोबहुलास्वेवयोनिषुजायमानाअधोगच्छंतिमूढामानीश्वरमप्रा साध्येवकौन्तेयततस्तस्मादपि
यान्तिअधमांनिकृष्टतमांगतिंमामप्राप्यैवनमत्प्राप्तौकाचिदाशंकास्यतोमच्छिष्टसाधुमार्गप्राप्तिमप्राप्येत्यर्थः॥२०॥ ॥सर्वस्याआसुर्याःसं
पदःसंक्षेपोयमुच्यते॥ यस्मिंस्त्रिविधःसर्वस्याआसुरीसंपद्भेदोऽनंतोऽप्येतस्मिन्भवति॥ यस्यपरिहारेणपरिहृतस्सर्वोभवतियन्मूलंसर्वस्यानर्थस्यत
देतदुच्यते॥ ॥त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः॥ कामक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत्॥२१॥ त्रिविधं त्रिप्रकारंनर
कप्राप्तौइदंद्वारमात्मनःनाशनंयद्द्वारंप्रविशन्नेवनश्यत्यात्माकस्मैचित्पुरुषार्थाययोग्योभवतीत्येतदतउच्यतेद्वारंनाशनमात्मनइति त्यवु

प्पाता५

…ं तत्कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् यत एतद्द्वारं नाशनमात्मनस्तस्मात्कामादित्रयमेतत्त्यजेत् तत्त्यागस्तुतिरियं ॥२१॥
एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः ॥ आचरत्यात्मनः श्रेयस्ततो याति परां गतिं ॥२२॥ एतैर्विमुक्तः कौंतेय तमोद्वारैस्तमसो नरकस्य दुःख
मोहात्मकस्य द्वाराणि कामादयस्तैरेतैस्त्रिभिर्विमुक्तो नरः आचरत्यनुतिष्ठति किं आत्मनः श्रेयः यत्प्रतिबंधः पूर्वं नाचरति तदपगमादा
चरति ततस्तदाचरणाद्याति परां गतिं मोक्षमपि ॥२२॥ सर्वस्यैतस्यासुरीसंपत्परिवर्जनस्य श्रेयआचरणस्य च शास्त्रं कारणं शास्त्रप्र
माणाद्धुभयं शक्यं कर्त्तुं नान्यथा अतः ॥ यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः ॥ न स सिद्धिमवाप्नोति न सुखं न परां गतिं ॥२३॥ यः शा
स्त्रविधिं शास्त्रं वेदस्तस्य विधिं कर्त्तव्याकर्त्तव्यज्ञानकारणं विधिप्रतिषेधाख्यमुत्सृज्य त्यक्त्वा वर्त्तते कामकारतः कामप्रयुक्तः सन् न स सिद्धिं पु
रुषार्थयोग्यतामवाप्नोति ॥ नाप्यस्मिन् लोके सुखं नापि परां प्रकृष्टां गतिं स्वर्गं मोक्षं च ॥२३॥ तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यव
स्थितौ ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि ॥२४॥ तस्मात् शास्त्रं प्रमाणं ज्ञानसाधनं ते तव कार्याकार्यव्यवस्थितौ कर्त्तव्याकर्त्त
व्यव्यवस्थायामतो ज्ञात्वा बुद्ध्वा शास्त्रविधानोक्तं विधिर्विधानं शास्त्रेण विधानं कुर्यान्न कुर्यादित्येवंलक्षणं तेनोक्तं स्वकर्म यत्तत्
कर्त्तुमिहार्हसि इहेति कर्माधिकारभूमिप्रदर्शनार्थमिति ॥२४॥ ॥ इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यस्य
श्रीशंकरभगवतः कृतौ गीताभाष्ये दैव्यासुरीसंपत्वयोगो नाम षोडशोऽध्यायः ॥१६॥ ॥ तस्माच्छास्त्रं प्रमाणं ते इति भगवद्वाक्याल्लब्ध
प्रश्नबीजोऽर्जुन उवाच ॥ ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः ॥ तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः ॥१॥ ये केचिदविशेषिता

शास्त्रविधिविधानं श्रुतिस्मृतिचोदनामुत्सृज्य परित्यज्य यजंते देवादीन् यजंति पूजयंते श्रद्धयास्तिक्यबुध्यान्विताः संयुक्ताः संतः श्रुति
लक्षणस्मृतिलक्षणं वा किंचित् शास्त्रविधिमपश्यंतो वृद्धव्यवहारदर्शनादेव श्रद्दधानतया ये देवादीन् पूजयंति ते इह शास्त्रविधिमुत्सृ ज्य २
ज्य यजंते श्रद्धयान्विता इति संगृह्यंते ये पुनः किंचित् शास्त्रविधिमुपलभमाना एव तमुत्सृज्य अयथाविधि देवान् पूजयंति ते त्विह ये शास्त्रविधिमुत्सृज्य
यजंते इति न परिगृह्यंते कस्मात् श्रद्धयान्वितत्वविशेषणात् देवपूजाविधिपरं किंचित् शास्त्रं पश्यंत एव तदुत्सृज्य अश्रद्दधानतया तद्विहितायां दे
वादिपूजायां श्रद्धयान्विताः प्रवर्त्तंते इति शक्यं कल्पयितुं यस्मात् तस्मात् पूर्वोक्ता एव ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः इत्यत्र गृह्यंते तेषामेवं
भूतानां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ किं सत्त्वं निष्ठावस्थानमाहोस्वित् रजो अथवा तमः इति । एतदुक्तं भवति या तेषां देवादिविषया पूजा सा किं
सात्त्विकी आहोस्वित् राजसी उत तामसीति ॥१॥ सामान्यविषयप्रश्नोऽनाप्रविभज्य प्रतिवचनमर्हतीति ॥ श्रीभगवानुवाच ॥ त्रिविधा भवति श्रद्धा देहिनां सा स्व
भावजा ॥ सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥२॥ त्रिविधा त्रिःप्रकारा भवति श्रद्धा यस्यां निष्ठायां त्वं पृच्छसि देहिनां पुंसां स्वभावजा जन्मां
तरकृतो धर्माधर्मादिसंस्कारो मरणकाले अभिव्यक्तः स्वभाव उच्यते ततो जाता स्वभावजा सात्त्विकी सत्त्वनिर्वृत्ता देवपूजादिविषया राजसी रजोनिर्वृत्ता
यक्षरक्षःपूजादिविषया तामसी तमोनिर्वृत्ता प्रेतपिशाचादिपूजाविषया एवं त्रिविधामुच्यमानां श्रद्धां शृणु ॥२॥ सा चेयं त्रिविधा भवतीति ॥ सत्त्वानुरूपा
सर्वस्य श्रद्धा भवति भारत ॥ श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥३॥ सत्त्वानुरूपा सर्वजन्मकृतविषयविशिष्टसंस्कारोपेतांतःकरणानुरूपा
सर्वस्य प्राणिजातस्य श्रद्धा भवति भारत यद्येवं ततः किं स्यादित्युच्यते श्रद्धामयः श्रद्धाप्रायः अयं पुरुषो यः संसारी जीवः कथं यो यत् श्रद्धः या श्रद्धा यस्य
जीवस्य स एव तत् श्रद्धः तत् श्रद्धानुरूप एव जीवः ॥३॥ ततः कार्येण लिंगेन देवादिपूजया सत्त्वादिनिष्ठा अनुमेया इत्याह ॥ ॥ यजंते सात्त्विका देवान् यक्षर

ष्ठांश्चिराजसाः॥ प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः॥४॥ यजंते पूजयंति सात्विकाः [illegible] सत्वनिष्ठा देवान्यक्षरक्षांसि राजसाः प्रेतान्भू
तगणांश्चासप्तमातृकादींश्चान्ये जयंते तामसा जनाः॥४॥ एवं कार्यतो निर्णीता सत्वादिनिष्ठा शास्त्रवि[illegible]तत्र कश्चिद्देवस्य हस्त्रेष्वदेवपूजादि
परः सत्वनिष्ठो भवति॥ बाहुल्येन तु रजोनिष्ठास्तमोनिष्ठाश्च भवंति॥ किं च॥ अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः॥ दंभाहं
कारसंयुक्ताः कामरागबलान्विताः॥५॥ अशास्त्रविहितं घोरं पीडाकरं प्राणिनामात्मनश्च तपस्तप्यंते निर्वर्तयंति ये तपो जनास्ते च दंभाहंका
रसंयुक्ताः दंभश्चाहंकारश्च दंभाहंकारौ ताभ्यां संयुक्ताः दंभाहंकारसंयुक्ताः कामरागबलान्विताः। कामश्च रागश्च कामरागौ तत्कृतं बलं ते
नान्विताः। कामरागबलेर्वान्विताः॥ कर्शयंतः शरीरस्थं भूतग्राममचेतसः॥ मां चैवांतःशरीरस्थं तान्विध्यासुरनिश्चयान्॥६॥ कर्शयंतः कृ
शं कुर्वंतः शरीरस्थं भूतग्राममेकरणसमुदायमचेतसः॥ मां चैवांतःशरीरस्थमविवेकिनो मां चैव तत्कर्मबुद्धिसाक्षिभूतं कृतः शरीरस्थं
कर्शयंते मदनुशासनातिक्रमणमेव मत्कर्शनं तान्वि[illegible]ध्यासुरनिश्चयान्। असुरा इति अयोधेषां ते आसुराः निश्चया सान्त्वाय हरणार्थं वि
हो द्धीत्युपदेशः॥६॥ आहाराणां रस्यास्निग्धादिवर्गत्रयरूपेण भिन्नानां यथाक्रमं सात्विकराजसतामसपुरुषप्रियत्वदर्शनाभिहक्रियते तयतोर
स्यास्निग्धादिष्वाहारविशेषेष्वात्मनः प्रीत्यतिरेकेण लिंगेन सात्विकत्वं राजसत्वं च तामसत्वं च बुद्ध्वा रजस्तमोलिंगानामाहाराणां परि
वर्जनार्थं [illegible] सत्वलिंगानां [illegible] चोपपादनार्थं तथा यज्ञादीनामपि सत्वादिगुणभेदेन त्रिविधं प्रतिपादनमिह राजसतामसौ नु
द्ध्वा कथं नाम परित्यजेत्सात्विकानेवातिश्रद्धेदित्येवमर्थं॥ आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः॥ यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृ
णु॥७॥

आहारस्त्वपि सर्वस्य भोक्तुः त्रिविधो भवति प्रियः इष्टः तथा यज्ञस्तथा तपस्तथा दानं तेषां माहारादीनां भेदमिमं वक्ष्यमाणं शृणु ॥ आयुःसत्वब
लारोग्यसुखप्रीतिविवर्द्धनाः ॥ रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ॥८॥ आयुश्च सत्वं बलं च आरोग्यं च सुखं प्रीतिश्च तासां विवर्द्धय
न्ति वर्द्धनाः आयुःसत्वबलारोग्यसुखप्रीतिविवर्द्धनाः ते च रस्या रसोपेताः स्निग्धाः स्नेहवंतः स्थिराश्चिरकालस्थायिनो देहे हृद्या हृदयप्रिया
आहाराः सात्विकप्रियाः सात्विकस्येष्टाः ॥८॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ॥ आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥९॥
कट्वम्ललवणाः अत्युष्णाः अतिकटुः कट्वादिषु सर्वेषु योज्यो अतिकटुरतितीक्ष्ण इत्येवं कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ए
वंविधा राजसस्येष्टा दुःखशोकामयप्रदाः दुःखशोकमामयं च प्रयच्छंतीति दुःखशोकामयप्रदाः ॥९॥ यातयामं गतरसं पूति पर्युषितं च यत् ॥
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं ॥१०॥ यातयामं मंदपक्वं गतवीर्यस्य गतरसेनोक्तत्वात् उद्धृतरसं रसवियुक्तं पूति दुर्गंधि पर्युषितं च प
क्वं सद्रात्र्यंतरितं च यत् ॥ उच्छिष्टमपि च भुक्तशिष्टं अमेध्यं अयज्ञार्हं भोजनमीदृशं तामसस्येष्टं ॥१०॥ अथेदानीं यज्ञस्त्रिविध उच्यते ॥ अफलाकां
क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ॥ यष्टव्यमेवेति मनः समाधाय स सात्विकः ॥११॥ अफलाकांक्षिभिरफलार्थिभिर्यज्ञो विधिदृष्टः शास्त्रचोदि
तो य इज्यते निर्वर्त्यते यष्टव्यमेवेति यज्ञस्वरूपनिर्वर्त्तनमेव कार्यमेवमिति मनः समाधाय मानेन पुरुषार्थो मम कर्त्तव्य इत्ये
वं निश्चित्य स सात्विको यज्ञ उच्यते ॥ अभिसंधाय तु फलं दंभार्थमपि चैव यत् ॥ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं ॥१२॥ अभिसंधाय फलं उद्दिश्य फ
लं दंभार्थमपि चैव यत् ॥ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं ॥१२॥ विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं ॥ श्रद्धाविरहितं यज्ञं तामसं प

रिचक्षते॥१३॥विधिहीनं यथाचोदितविपरीतं असृष्टान्नं ब्राह्मणेभ्यो न सृष्टमन्नं यस्मिन्यज्ञे सोऽसृष्टान्नस्तमसृष्टान्नं मंत्रहीनं मंत्रतः स्वरतो
वर्णतश्च वियुक्तं मंत्रहीनं अदक्षिणां उक्तदक्षिणारहितं श्रद्धाविरहितं श्रद्धारहितं यज्ञं तामसं परिचक्षते तमोनिर्वृत्तं कथयंति॥१३॥अथे
दानीं तपस्त्रिविधमुच्यते॥देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं॥ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥१४॥देवाश्च द्विजाश्च गुरवश्च
प्राज्ञाश्च देवद्विजगुरुप्राज्ञास्तेषां पूजनं शौचमार्जवं ऋजुत्वं ब्रह्मचर्यमहिंसा च शरीरनिर्वर्त्यं शारीरं शरीरप्रधानैः सर्वैरेव कार्यकार
णैः कर्त्रादिभिः साध्यं शारीरं तप उच्यते॥१४॥यं चैतेतस्य हेतव रतिवद्यते॥अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्॥स्वाध्यायाभ्यसनं चैव वाङ्म
तप उच्यते॥१५॥अनुद्वेगकरं प्राणिनामदुःखकरं वाक्यं सत्यं प्रियंहितं च यत् प्रियहिते दृष्टादृष्टार्थे अनुद्वेगकरत्वादिभिः धर्मैर्वाक्यं विशिष्यते॥
विशेषणाधर्मसमुच्चयार्थश्चशब्दः परप्रत्ययार्थं प्रयुक्तस्य वाक्यस्य सत्यप्रियहितानुद्वेगकरत्वादीनामन्यतमेन द्वाभ्यां त्रिभिर्वा हीनता स्याद्यदि तद्
न वाङ्मयं तपस्तथा सत्यवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनतस्य न वाङ्मयं तपस्त्वं तथा प्रियवाक्यस्याप्यन्यतमेन द्वाभ्यां त्रिभिर्वा वि
हीनस्य न वाङ्मयं तपस्त्वं तथा हितवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा वियुक्तस्य न वाङ्मयं तपस्त्वं किं पुनस्तत्तपो यत्सत्यं हितं वाक्यमनुद्वेग
करं प्रियं च तपो वाङ्मयं यथा शांतो भव वत्स स्वाध्यायं योगं चातिष्ठ तथा ते श्रेयो भविष्यतीति स्वाध्यायाभ्यसनं चैवं यथाविधि वाङ्मयं तप उच्यते॥१५॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः॥भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥मनःप्रसादो मनसः प्रशांतिः स्वच्छतापादनं प्रसादः सौम्यत्वं यत
तः सौमनस्यमाहुः मुखादिप्रसादकार्यमंतःकरणस्य वृत्तिर्मौनं वाक्संयमोऽपि मनःसंयमपूर्वको भवति कार्येण कारणमुच्यते।मनःसंयमो
मौनमित्यात्मविनिग्रहो मनोनिरोधः सर्वतः सामान्यरूपः आत्मविनिग्रहः वाग्विषयस्यैव मनसः संयमो मौनमिति विशेषः।भावसंशुद्धिः

परैर्व्यवहारकाले मायाविवत्वं भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥ यदुक्तं कायिकं वाचिकं मानसं च तपस्तत्पुनरैः सत्वादिभेदेन कथं भ
त्रिविधं भवतीत्युच्यते ॥ ॥श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ॥ अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते ॥१७॥ श्रद्धया आस्तिक्यबुद्ध्या पर
योत्कृष्टतया तप्तमनुष्ठितं तत्तपस्तत्प्रकृतं त्रिविधं त्रिःप्रकारं । अधिष्ठानं नरैरनुष्ठातृभिरफलाकांक्षिभिः फलाकांक्षारहितैर्युक्तैः समाहितैर्यदी
दृशं तपस्तत्सात्विकं सत्वनिर्वर्त्यं परिचक्षते कथयंति शिष्टाः ॥१७॥ सत्कारमानपूजार्थं तपो दंभेन चैव यत् ॥ क्रियते तदिह प्रोक्तं राजसं चलमध्रु
वं ॥१८॥ सत्कारमानपूजार्थं सत्कारः साधुकारः साधुरयं तपस्वी ब्राह्मण इत्येवमर्थं मानो मानं प्रत्युत्थानाभिवादनादिः प्रोक्तं कथितं
राजसं चलं कदाचित्फलत्वेनाध्रुवं ॥१८॥ मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ॥ परस्योत्सादनार्थं वा तत्तामसमुदाहृतं ॥१९॥ मूढग्राहेणावि
वेकात्मिश्रयेनात्मनः पीडया क्रियते तपः परस्योत्सादनार्थं विनाशार्थं वा तत्तामसमुदाहृतं ॥२०॥ इदानीं दानभेद उच्यते । दातव्यमिति यद्दा
दी नं दीयतेऽनुपकारिणे ॥ देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम् ॥२०॥ दातव्यमित्येवं मनः कृत्वा यद्दानं दीयतेऽनुपकारिणे प्रत्युपकारासम
र्थाय समर्थायापि निरपेक्षं दीयते पुण्ये देशे कुरुक्षेत्रादौ काले संक्रांत्यादौ पात्रे च षडंगविद्वेदपारगरूपे दीयते तद्दानं सात्विकं स्मृतं ॥२०॥ यत्तु प्र
त्युपकारार्थं फलमुद्दिश्य वा पुनः ॥ दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतं ॥२१॥ यत्तु दानं प्रत्युपकारार्थं काले त्वयं मां प्रत्युपकरिष्यतीत्ये
वमर्थं फलं वास्य दानस्य मे भविष्यतीत्युद्दिश्यमपि तच्चोद्दिश्य पुनर्दीयते च परिक्लिष्टं खेदसंयुक्तं तद्राजसं स्मृतम् ॥२१॥ अदेशकाले यद्दानमपा
त्रेभ्यश्च दीयते ॥ असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥२२॥ अदेशकाले अपुण्ये देशे म्लेच्छाद्यशुच्यादिसंकीर्णे अकाले पुण्यहेतुत्वेनाप्र

तदर्थं पूजा पादप्रक्षाल नार्चना प्राधित्वला दितदर्थं च तपः सत्कारमा नपूजार्थं दंभेन चैव यत्क्रि यते तपस्त दिपत्रं:

रक्ष्यते संक्रांत्यादिविशेषरहिते अपात्रेभ्यश्च नटर्खतस्करादिभ्यश्च देशादिसंपत्तौ वा असत्कृतं प्रियवचनपादप्रक्षालनपूजादिरहितं अवज्ञा
तं पात्रपरिभवयुक्तं च तद्दानं तामसमुदाहृतम् ॥२२॥ यज्ञदानतपःप्रभृतीनां साद्गुण्यकरणोपायमुपदेष्टुमुच्यते ॥ ॐ तत्सदिति निर्देशो ब्र
ह्मणस्त्रिविधः स्मृतः ॥ ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥२३॥ ॐ तत्सदिति निर्दिश्यते अनेनेति निर्देशः त्रिविधो नाम निर्देशो ब्र
ह्मणः स्मृतः । किं ततो वेदांतेषु ब्रह्मविद्भिः ब्राह्मणास्तेन निर्देशेन त्रिविधेन वेदाश्च यज्ञाश्च विहिताः निर्मिताः ॥ पुरा पर्वमिति निर्देशस्तुत्य
र्थमुच्यते ॥२३॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ॥ प्रवर्त्तंते विधानोक्ताः सततं ब्रह्मवादिनां ॥२४॥ तस्मादोमित्युदाहृत्य उच्चार्य
यज्ञदानतपःक्रियाः यज्ञादिस्वरूपाः प्रवर्त्तंते विधानोक्ताः विधिनोक्ताः क्रियाः शास्त्रचोदिताः सततं सर्वदा ब्रह्मवादिनां ब्रह्मवादशीलानां ॥२४॥
तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ॥ दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः ॥२५॥ तदित्यनभिसंधाय तदिति ब्रह्माभिधान
मुच्चार्य अनभिसंधाय च कर्मणः फलं यज्ञतपःक्रियाः दानक्रियाश्च विविधाः क्षेत्रहिरण्यप्रदानादिलक्षणाः क्रियंते निर्वर्त्यंते मोक्षकांक्षि
भिर्मुमुक्षुभिः ॥२५॥ ॐ तच्छब्दयोर्विनियोग उक्तः अथेदानीं सच्छब्दस्य विनियोगः कथ्यते ॥ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ॥ प्रश
स्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥ सद्भावे असतः सद्भावे यथा अविद्यमानस्य पुत्रस्य जन्मनि तथा साधुभावे असद्वृत्तस्यासाधोः सद्वृत्तता सा
धुभावस्तस्मिन् साधुभावे च सदित्येतदभिधानं ब्रह्मणः प्रयुज्यते तत्रोच्यते अभिधीयते प्रशस्ते कर्मणि विवाहादौ च सच्छब्दः पार्थ प्रयुज्य
तेनैरत्येतत् ॥२६॥ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ॥ कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥२७॥ यज्ञे यज्ञकर्मणि या स्थितिः त

यातपसि च या स्थिति दाने च या स्थितिर्या सा च सदित्युच्यते। विद्वद्भिः कर्म च एवं तदर्थीयं यज्ञदानतपोर्थीयमथवा यस्याभिधानत्रयं प्रकृतं तद
र्थीयमीश्वरार्थीयमित्येतत्सदित्येवाभिधीयते॥२७॥ तदेवं यज्ञदानतपआदिकमसात्विकं विगुणमपि श्रद्धापूर्वकं ब्रह्मणोऽभिधानत्र
यप्रयो[illegible]गेन सगुणं सात्विकं संपादितं भवति तत्र च सर्वत्र श्रद्धाप्रधानतया सर्वं संपद्यते॥ यस्मात्तस्मात्॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं
च यत्॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥२८॥ अश्रद्धया हुतं हव्यं हवनं कृतं दत्तं च ब्राह्मणेभ्योऽश्रद्धया तपस्तप्तं अनुष्ठितं अश्र
द्धया तथा अश्रद्धयैव कृतं च यत्॥ स्तुति नमस्कारादि तत्सर्वमसदित्युच्यते। मत्प्राप्तिसाधनमार्गबाह्यत्वात्पार्थ न च तद्बहुलायासमपि प्रेत्य
फलाय नो पीहार्थं साधुभिर्निंदितत्वादिति॥२८॥ ॥इति श्रीगोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकर
भगव[illegible]तः कृतौ गीताभाष्ये श्रद्धाभेदयोगो नाम सप्तदशोध्यायः॥१७॥ ॥श्रीपरमात्मने नमः॥ ॐ ॐ ॐ हरिः॥ सर्वस्यैव गीताशा
स्त्रस्यार्थोऽस्मिन्नध्याय उपसंहृत्य सर्वश्च वेदार्थो वक्तव्य इत्येवमर्थोयमध्याय आरभ्यते॥ सर्वो ह्यतीतेष्वध्यायेषूक्तोऽर्थोऽस्मिन्नध्यायेऽवगम्य
ते। अर्जुनस्तु संन्यासत्यागशब्दार्थयोरेव विशेषं बुभुत्सुरुवाच॥ अर्जुन उवाच॥ संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं॥ त्यागस्य च हृषीकेश
पृथक्के[illegible]शिनिषूदन॥१॥ संन्यासस्य संन्यासशब्दार्थस्येत्येतत्॥ महाबाहो॥ तत्त्वं तस्य भावस्तत्त्वं याथात्म्यमित्येतत्॥ इच्छामि वेदितुं त्यागस्य च
त्यागशब्दार्थस्येत्येतत्॥ हृषीकेश पृथगितरेतरविभागतः। केशिनिषूदन केशी नाम हयछद्मा असुरस्तं निषूदितवान् भगवान्वासुदेवस्तेन
नाम्नातं संबोध्यते॥१॥ अर्जुनेन तत्र तत्र निर्दिष्टौ संन्यासत्यागशब्दौ न निर्णीतार्थौ पूर्वेष्वध्यायेष्वतोऽर्जुनाय पृष्टवते तन्निर्णयाय॥ श्रीभगवा

नुवाच॥ ॥काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः॥ सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥२॥ काम्यानां अश्वमेधादीनां कर्मणां
न्यासं परित्यागं संन्यासशब्दा[र्थं] मन्वस्येयतेन प्राप्तस्यानुष्ठानं कवयः पंडिताः केचिद्विदुर्विजानंति॥ नित्यनैमित्तिकानामनुष्ठीयमानानां
सर्वकर्मणां आत्मसंब[ं]धितया प्राप्तस्य फलस्य परित्यागः सर्वकर्मफलत्यागस्तं प्राहुः कथयंति त्यागं त्यागशब्दार्थं विचक्षणाः पंडिताः॥
यदि काम्यकर्मत्यागः फलपरित्यागो वार्थो वक्तव्यः॥ सर्वथा परित्यागमात्रं संन्यासत्यागशब्दयोरेकोर्थः॥ न घटपटशब्दाविवत्यासंतर
नातार्थौ॥२॥ ननु नित्यनैमित्तिकानां कर्मणां फलमेव नास्तीत्याहुः॥ कथमुच्यते तेषां फलत्याग इति॥ यथा वंध्यायाः पु[त्र]त्यागः॥ नैष दोषः॥
नित्यानामपि कर्मणां भगवता फलवत्त्वस्योक्तत्वात्॥ वक्ष्यति हि भगवान्॥ अनिष्टमिष्टं मिश्रं चेति॥ न तु संन्यासिनामिति॥ तत्र तत्र च संन्यासिना
मेव हि केवलं कर्मफलासंबंधं दर्शयन् संन्यासिनां नित्यकर्मफलप्राप्तिर्भवत्यत्यागिनां प्रेत्येति दर्शयति॥ ॥त्याज्यं दोषवदित्येके कर्म प्रा
हुर्मनीषिणः॥ यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥३॥ त्याज्यं [त्य]क्तव्यं दोषवत् दोषोस्यास्तीति दोषवत्॥ किं तत्कर्म बंधहेतुत्वात्सर्वमेव॥
अथवा दोषो यथा रागादि[स्]त्यज्यते तद्वत्त्याज्यमित्येके कर्म प्राहुर्मनीषिणः पंडिताः सांख्यादिदृष्टिमाश्रिताः॥ अधिकृतानां तु कर्मिणामपि
पीति॥ तत्रैव यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥ कर्मिणां अधिकृतानपेक्ष्य ते विकल्पा न तु ज्ञाननिष्ठान्॥ व्युत्थायिनः संन्यासिनोपे
क्ष्य॥ ज्ञानयोगेन सांख्यानां॥ निष्ठा मया प्रोक्तेति कर्माधिकारादपाकृता ये न तान्प्रति चिंता॥ ननु कर्मयोगेन योगिनामित्यधिकृताः॥ पूर्वाविज्ञा
नोति निष्ठाद्वयापि रहस्यं सर्वशास्त्रोपसंहारप्रकरणे यथा विचार्यते तथा सांख्यानामपि ज्ञाननिष्ठा विचार्यतामिति॥ न॥ तेषां मोहक्लेशदुःखानामित्त

कर्मण्यनधिकृतानामकर्मिणामेव कर्मत्याज्यं कर्मिणां तत्त्यागे प्रत्यवायादित्याशंक्याह॥ अधिकृतानामिति॥ न हि तेषामपि कर्मत्यजतां प्रत्यवायो हि सायुक्तस्य कर्म
णो नुष्ठापरं प्रत्यवायादिभावः सांख्यादिपक्षसमाप्तेरिति शेषः॥४

मीमांसकाप
नामाहा तत्रैवे
२

सा ४

त्यागोनुपपत्तेः ॥ न कायक्लेशदुःखं सांख्या आत्मनि पश्यंति ॥ इच्छादीनां क्षेत्रधर्मत्वेनैव दर्शितत्वात् तस्मान्न कायक्लेशदुःखभयात्क
र्म परित्यजंति । नापि ते कर्माण्यात्मनि पश्यंति येन नियतं कर्म मोहात्परित्यजेयुः गुणानां कर्म नैव किंचित्करोमीति हि ते संन्यस्यंति सर्व
कर्माणि मनसा संन्यस्येत्यादिभिरुक्तप्रकारैः तत्त्वविदः संन्यासप्रकार उक्तस्तस्माद्येऽन्येऽधिकृताः कर्मण्यनात्मविदो येषां च मोहात्त्यागः संभवति काय
क्लेशदुःखभयाच्च त एव तामसास्त्यागिनो राजसाश्चेति निंद्यंते कर्मिणामनात्मज्ञानां कर्मफलत्यागः स्तुत्यर्थं ॥ सर्वारंभपरित्यागी मौनी
संतुष्टो येन केनचिदनिकेतः स्थिरमतिरिति गुणातीतलक्षणे च परमार्थसंन्यासिनो विशेषितत्वाद्वक्ष्यति च ज्ञानस्य या परा निष्ठेति ॥ त
स्माज्ज्ञाननिष्ठाः संन्यासिनो नेह विवक्षिताः ॥ कर्मफलत्याग एव सात्त्विकत्वेन गुणेन तामसत्वाद्यपेक्षया संन्यास उच्यते । न मु[illegible]ख्यः
सर्वकर्मसंन्यासः सर्वकर्मसंन्यासासंभवे च न हि देहभृतेति हेतुवचनान्मुख्य एवेति चेन्न । हेतुवचनस्य स्तुत्यर्थत्वाद्यथा त्यागाच्छांति
रनंतरमिति ॥ कर्मफलत्यागस्तुतिरेव यथोक्तानेकपक्षानुष्ठानासक्तिमंतमर्जुनं प्रति विधानं तथेदमपि देहभृताशक्यमिति कर्मत्याग
स्तुत्यर्थं वचनं । न च सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्त इत्यस्य पक्षस्यापवादः केनचिद्दर्शयितुं शक्यस्तस्मा
त्कर्मण्येवाधिकृतानामेते वै[illegible]ष संन्यासत्यागविकल्पा ये तु परमार्थदर्शिनः सांख्यास्तेषां ज्ञाननिष्ठायामेव सर्वकर्मसंन्यासलक्षणाया
यामधिकारो नान्यत्रेति ॥ न ते विकल्पार्हा इत्युपपादितमस्माभिः वेदाविनाशिनमित्यन्प्रदेशे तृतीयादौ च ॥ ३ ॥ तत्र तेषु विकल्पभेदेषु ॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ॥ त्यागो हि पुरुषव्याघ्र त्रिविधः प्रकीर्तितः ॥ ४ ॥ निश्चयं शृणु अवधारय मे मम वचनात् । तत्र त्या

सिद्धिं प्रा
प्तो यथा
ब्रह्म तथ

न दि ५

प्र ५ सिम ३

गे त्यागसंन्यासविकल्पे यथा दर्शिते भरतसत्तम॥ भरतानां साधुतम॥ त्यागो हि त्यागसंन्यासशब्दवाच्यो हि यो ऽर्थः स एक एवेत्यभिप्रेत्याह त्या
गो हीति॥ पुरुषव्याघ्र॥ त्यागस्त्रिविधस्त्रिप्रकारस्तामसादिप्रकारैः संप्रकीर्त्तितः शास्त्रेषु कथितो यस्मात्तामसादिभेदेन त्यागसंन्यासशब्दवाच्यो
ऽर्थो ऽधिकृतस्य कर्मिणो ऽनात्मज्ञस्य त्रिविधः संभवति। न परमार्थदर्शिनः। इत्ययमर्थो दुर्ज्ञानः तं तस्मादत्र तत्त्वं नान्यो वक्तुं समर्थः। तस्मान्निश्च
यं परमार्थशास्त्रविषयमध्यवसायमैश्वरं शृणु॥४॥ कः पुनरसौ निश्चय इत्याह॥ ॥ यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत्॥ न ४
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥५॥ यज्ञो दानं तप इत्येतत्त्रिविधं कर्म न त्याज्यं न त्यक्तव्यं॥ कार्यं करणीयमेव तत्। कस्मा
त्। यज्ञो दानं तपश्चैव पावनानि विशुद्धिकराणि। मनीषिणां फलानभिसंधीनामित्येतत्॥५॥ एतान्यपि तु कर्माणि संगं त्यक्त्वा फला
नि च॥ कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं॥६॥ एतान्यपि कर्माणि यज्ञदानतपांसि पावनानीत्युक्तानि संगं त्यक्त्वा संगमासक्तिं
तेषु त्यक्त्वा फलानि च तेषां परित्यज्य कर्त्तव्यानीत्यनुष्ठेयानीति मे मम निश्चितं मतमुत्तमं। निश्चयं शृणु मे तत्रेति प्रतिज्ञाय पावनत्वं च
हेतुमुक्त्वा चैतान्यपि कर्माणि कर्त्तव्यानीति। निश्चितं मतमुत्तममिति प्रतिज्ञातार्थोपसंहारवचनापूर्वं वचनान्येतान्यपीति प्रकृतसंनिकृष्टा
र्थे नोपपत्तेः। सासंगस्य फलार्थिनो बंधहेतवः संत्येतान्यपि मुमुक्षोः कर्त्तव्यानीत्यपिशब्दस्यार्थः। न त्वन्यानि कर्माण्यपेक्ष्यैतान्यपीत्यु
च्यते॥ अन्ये वर्णयंति। नित्यानां कर्मणां फलाभावात्संगं त्यक्त्वा फलानि चेति नोपपद्यते। एतान्यपीति यानि काम्यानि कर्माणि नित्ये
भ्यो ऽन्यानि एतान्यपि कर्त्तव्यानि किंतु यज्ञदानतपांसि नित्यानीति। तदसत्॥ नित्यानामपि फलसंबंधस्योपपादितत्वाद्यज्ञो दा

तं तपश्चैव पावनानीत्यादिवचनेन नित्यान्यपि कर्मणां बंधहेतुत्वाशंकयापि हासो मुमुक्षोः कुतः काम्येष्वनुषंगः। दूरेण ह्यवरं कर्मेति च
तिंदितत्वात्॥ यज्ञार्थात्कर्मणोऽन्यत्रेति। काम्यकर्मणां बंधहेतुत्वस्यातिप्रसिद्धत्वात्॥ त्रैगुण्यविषया वेदाः। त्रैविद्याः॥ क्षीणे पुण्ये मर्त्यलोकं
विशंतीति च। दूरे व्यवहितत्वा त् च काम्येष्वेतान्यपीति व्यपदेशः॥६॥ तस्मादज्ञस्याधिकृतस्य मुमुक्षोः॥ ॥नियतस्य तु संन्यासः
कर्मणो नोपपद्यते॥ मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥७॥ ॥नियतस्य तु नित्यस्य संन्यासः परित्यागः कर्मणो नोपपद्यते ॥
अज्ञस्य पावनत्वस्येष्टत्वात्। मोहादज्ञानात्तस्य नियतस्य परित्यागो नित्यं चावश्यकं कर्तव्यं नैत्यज्यते चेत्तर्हि प्रतिविक्रमतो मोहनिमि
त्तः परित्यागस्तामसः परिकीर्तितो मोहस्तामस इति॥७॥ किंच॥ ॥दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्॥ स कृत्वा राजसं त्यागं नैव
त्यागफलं लभेत्॥८॥ दुःखमित्येव यत्कर्म कायक्लेशभयाच्छरीरदुःखभयात्त्यजेत् परित्यजेत्॥ स कृत्वा राजसं रजोनिर्वृत्तं तं त्यागं
फलं शो न सर्वकस्य सर्वकर्मत्यागस्य फलं मोक्षाख्यं न लभेत्॥८॥ कः पुनः सात्त्विकस्त्यागः॥ ॥कार्यमित्येव यत्कर्म नियतं क्रियतेऽ
र्जुन॥ संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥९॥ कार्यं कर्तव्यमित्येव यत्कर्म नियतं नित्यं क्रियते निर्वर्त्यते। संगं त्यक्त्वा फलं चैव वि
नां कर्मणां फलत्वे भगवद्वचनं प्रमाणमवोचाम। अथवा॥ यद्यपि फलं न श्रूयते नित्यस्य कर्मणस्तथापि नित्यं कर्म कृतमात्मसंस्कारं प्रत्यवायपरिहा
रं वापि करोत्यनां निवारयति फलं त्यक्त्वेति मन्नेन। अतः साधूक्तं संगं त्यक्त्वा फलं चेति स त्यागो नित्यकर्मसु संगफलपरित्यागः सात्त्विकः सत्त्वनिर्वृत्तो
मतोऽभिमतः॥ न तु कर्मपरित्यागस्त्रिविधः संन्या स इति च प्रकृतं तत्र तामसो राजसश्चोक्तस्त्यागः कथमिह संगफलत्यागस्तृतीयत्वेनो

च्यते। यथात्र यो ब्राह्मणोऽग्रतास्तत्र षडंगविदो द्वौ चात्रियस्ततीयरतितद्वत्। नैष दोषः॥ त्यागसामान्येन स्तुत्यर्थत्वात्। अस्ति हि कर्मसंन्या
सस्य फलाभिसंधित्यागस्य च त्यागत्वसामान्यं॥ तत्र तामस राजसत्वेन कर्मत्यागनिंदया कर्मफलाभिसंधित्यागः सात्विकत्वेन स्तूयते x
स त्यागः सात्विको मत इति॥९॥ यस्त्वधिकृतः संगं त्यक्त्वा फलाभिसंधिं चैव नित्यं कर्म करोति तस्य फलरागादिनाक लुषी क्रियमाणमंतः
करणं नित्यैश्च कर्मभिः संस्क्रियमाणं विशुद्ध्यति तद्विशुद्धं प्रसन्नमात्मालोचनक्षमं भवतीति तस्यैव नित्यकर्मानुष्ठानेन विशुद्धांतःकर
णस्यात्मज्ञानाभिमुखस्य क्रमेण यथा तन्निष्ठा स्यात्तद्वक्तव्यमित्याह॥ ॥न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते॥ त्यागी सत्वसमावि
ष्टो मेधावी छिन्नसंशयः॥१०॥ न द्वेष्टि अकुशलं अशोभनं काम्यं कर्म शरीरारंभद्वारेण संसारकारणं किमनेनेत्येवं। कुशले शो
भने नित्ये कर्मणि स त्वशुद्धिज्ञानोत्पत्तिनिष्ठाहेतुत्वेन मोक्षकारणमिदमित्येवं नानुषज्जते॥ तत्रापि प्रयोजनं अपश्यन्ननुषंगं प्री
तिं न करोति इति एतत्कः पुनरसौ। त्यागी पूर्वोक्तेन संगफलत्यागेन तं ह्यत्यागी यः कर्मणि संगं त्यक्त्वा तत्फलं च नित्यकर्मानुष्ठायी सः
त्यागी कदा पुनरसावकुशलं कर्म न द्वेष्टि कुशले च नानुषज्जते इत्युच्यते। सत्वसमाविष्टो यदा सत्वेनात्मानात्मविवेकविज्ञानहेतुना समाविष्टः
संव्याप्तः संयुक्त इत्येतत्॥ अत एव मेधावी मेधयात्मज्ञानलक्षणया प्रज्ञया संयुक्तस्तद्धि मेधावी मेधावित्वादेव छिन्नसंशयः॥१०॥ यो ह्यधिकृतः
पुरुषः पूर्वोक्तप्रकारेण कर्मयोगानुष्ठानेन क्रमेण संस्कृतात्मा सन् जन्मादिविक्रियारहितत्वेन निःक्रियमात्मानमात्मत्वेन संबुद्धः स सर्वकर्माणि
मनसा संन्यस्य नैव कुर्वन्न कारयन्नासीनो नैःकर्म्यलक्षणां ज्ञाननिष्ठामश्नुते इत्येतत्पूर्वोक्तस्य कर्मयोगस्य प्रयोजनमनेन श्लोकेनोक्तं॥ यः
पुनरधिकृतः सन्देहात्माभिमानित्वेन देहभृदज्ञोऽबाधितात्मकर्तृत्वविज्ञानतया अहं कर्तेति निश्चितबुद्धिस्तस्याशेषकर्मपरित्यागस्याशक्यत्वात्कर्मि

छिन्नो। विद्यातः शंसयो यस्यात्मस्वरूपावस्थानमेव परं निःश्रेयसमाधनं नान्यत्किंचिदित्येवं निश्चयेन छिन्नसंशयः ४॥ त्रुः

फलत्यागेन चोदितकर्मानुष्ठान एवाधिकारो न तत्त्यागः इत्येतमर्थं दर्शयितुमाह॥ ॥नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेष
तः॥ यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥११॥ नहि यस्मात्॥ देहभृता देहं बिभर्तीति देहभृत् देहात्माभिमानवान्देहभृदुच्यते।
न विवेकी स हि वेदाविनाशिनमित्यादिना कर्तृत्वाभिमानान्निवर्तितः। अतस्तेन देहभृताऽज्ञेन न शक्यं त्यक्तुं संन्यसितुं कर्माण्यशेषतो
निःशेषेण। तस्मात् यस्त्वज्ञोऽधिकृतो नित्यानि कर्माणि कुर्वन् कर्मफलत्यागी कर्माभिसंधिमात्रसंन्यासी स त्यागीत्यभिधीयते कर्म्य
पि सन्निति स्तुत्यभिप्रायेण॥११॥ तस्मात्परमार्थदर्शिनैवादेहभृता देहात्मभावरहितेनाशेषकर्मसंन्यासः शक्यते कर्तुं किं पु
नस्तत्प्रयोजनं यत्सर्वकर्मपरित्यागात्स्यादित्युच्यते॥ ॥अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं॥ भवत्यत्यागिनां प्रेत्य न तु
संन्यासिनां क्वचित्॥१२॥ ॥अनिष्टं नरकतिर्यगादिलक्षणं। इष्टं देवादिलक्षणं मिश्रं इष्टानिष्टसंयुक्तं मनुष्यलक्षणं चैवं त्रिविधं
त्रि प्रकारं॥ कर्मणो धर्माधर्मलक्षणस्य फलं बाह्यानेककारकव्यापारनिष्पन्नं सदविद्याकृतं इंद्रजालमायोपमं महामोहकरं प्रत्य
गात्मोपसर्पीव॥ फल्गुतालयं अदर्शनं गच्छतीति फलं रति फलनिर्वचनं तदेतदेवंलक्षणं फलं भवति। अज्ञानां कर्मिणां अपरमार्थसंन्या
सिनां प्रेत्य शरीरपातादूर्ध्वं न तु परमार्थसंन्यासिनां परमहंसपरिव्राजकानां केवलज्ञाननिष्ठानां॥ क्वचित् नहि केवलसम्यग्द
र्शननिष्ठोऽविद्यादिसंसारबीजं नोन्मूलयति कदाचिदित्यर्थः॥१२॥ परमार्थदर्शिन एवाशेषकर्मसंन्यासित्वं संभवत्यविद्याध्यारोपित
त्वादात्मनि क्रियाकारकफलानां न त्वज्ञस्याधिष्ठानादीनि क्रियाकारकाण्यात्मत्वेन पश्यतोऽशेषकर्मसंन्यासोऽपि संभवतीति तदेतदुत्त

रश्लोकैर्दर्शयति॥ ॥पंचैतानि महाबाहो कारणानि निबोध मे॥ सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणां॥१३॥ पंचएतानि वक्ष्यमाणानि
॥हे महाबाहो कारणानि निर्वर्त्तकानि तानि बोध मे मम सकाशात्तु अतः समाधानार्थं वस्तुनैषम्यप्रदर्शनार्थं च तानि पंच कारणानि ज्ञातव्यतया स्तौ
ति॥ सांख्ये ज्ञातव्याः पदार्थाः संख्यायंते यस्मिन्नशास्त्रे तत्सांख्यं वेदांतः कृतांत इति तस्यैव विशेषणं कृतांतमिति कर्मोच्यते। तस्यांतः कृतस्यपरि
समाप्तिर्येन सकृतांतः कर्मांतरत्येतत्। यावानर्थ उदपाने। सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते इत्यात्मज्ञाने संजाते सर्वकर्मणां निवृत्तिं दर्शि
यत्यतस्तस्मिन्नात्मज्ञानार्थं सांख्ये कृतांते वेदांते प्रोक्तानि कथितानि सिद्धये निष्पत्यर्थं सर्वकर्मणां॥१३॥ कानि तानीत्युच्यते॥ अधिष्ठानं त
था कर्त्ता करणं च पृथग्विधं॥ विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमं॥१४॥ ॥अधिष्ठानं इच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्र
योऽधिष्ठानं शरीरं। तथा कर्त्ता उपाधिलक्षणो भोक्ता। करणं च श्रोत्रादि शब्दाद्युपलब्धये पृथग्विधं नानाप्रकारं द्वादशसंख्यं। विविधाश्च पृथ
क्चेष्टा वायवीयाः प्राणापानाद्याः। दैवं चैवं दैवमेव च॥ अत्र तेषु चतुर्षु पंचमं चक्षुरादीनां प्रणामादित्यादि चक्षुराद्यनुग्राहकं॥१४॥ शरीरवाङ्मनो
भिर्यत्कर्म प्रारभते नरः॥ न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः॥१५॥ ॥शरीरवाङ्मनोभिर्यत्कर्म निर्वर्त्तिरे तैः प्रारभते निर्वर्त्तयति नरः। न्या
य्यं वा धर्म्यं शास्त्रीयं। विपरीतं वाऽधर्म्यमशास्त्रीयं यच्चापि निमेषणोन्मेषणादि जीवनहेतुस्तदपि पूर्वकृतधर्माधर्मयोरेव कार्यमिति न्याय्यविप
रीतयोरेव ग्रहणेन गृहीतं पंचैते यथोक्तास्तस्य सर्वस्यैव कर्मणो हेतवः कारणानि॥ ॥१५॥ ननु एतान्यधिष्ठानादीनि सर्वकर्म [illegible] कर्मणाम्
निर्वर्त्तकानि कथमुच्यते। शरीरवाङ्मनोभिर्यत्कर्म प्रारभत इति नैष दोषः। विधिप्रतिषेधलक्षणं सर्वकर्म शरीरादित्रयप्रधानं तदंगतया
दर्शनश्रवणादि च जीवनलक्षणं त्रेधैव राशीकृतमुच्यते शरीरादिभिः अधिष्ठानादिभिरारभ्यत इति फलकालेपि तत्प्रधानैर्भुज्यत इति यं

चात्महेतुत्वेन विरुध्यते ॥ तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः ॥ पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥१६॥ तत्रेति प्रकृतेन
संबध्यते ॥ एवं सतीति यथोक्तैः पंचभिर्हेतुभिर्निर्वर्त्यस्य सति कर्मणि । तत्रैवं सतीति दुर्मतिस्तस्य हेतुत्वेन संबध्यते । तच्च तेष्वात्मानमनन्यत्वेनावि
द्यया परिकल्प्य तैः क्रियमाणस्य कर्मणोऽहमेव कर्त्तेति कर्त्तारमात्मानं केवलं शुद्धं । यः पश्यत्यविद्वान्वेदांताचार्योपदेशन्यायैरकृ
तबुद्धित्वाद्योपि देहादिव्यतिरिक्तात्मवाद्यव्यमात्मानमेव केवलं कर्त्तारं पश्यत्यसावप्यकृतबुद्धिरेवातोऽकृतबुद्धित्वान्न स पश्य
त्यात्मनस्तत्त्वं कर्मणो वेत्यर्थोऽतो दुर्मतिर्दुष्टाजस्रं जननमरणप्रतिपत्तिहेतुभूता मतिरस्येति दुर्मतिः । स पश्यन्नपि न पश्यति ॥ यथा तैमिरि
कोऽनेकचंद्रं नभः । यथा वाहनेषूपविष्टोऽन्येषु धावत्स्वात्मानं धावंतं ॥१६॥ ॥ कः पुनः सुमतिर्यः सम्यक्पश्यतीत्युच्यते ॥ ॥ यस्य नाहं
कृतो भावो बुद्धिर्यस्य न लिप्यते ॥ हत्वापि स इमांल्लोकान्न हंति न निबध्यते ॥१७॥ यस्य शास्त्राचार्योपदेशन्यायसंस्कृतात्मनो न भवत्यहंकृ
तोऽहं कर्त्तेत्येवंलक्षणो भावो भावना प्रत्ययः ॥ एत एव पंचाधिष्ठानादयोऽविद्ययात्मत्वेन कल्पिताः सर्वकर्मणां कर्त्तारो नाहमहं तु तद्व्या
पाराणां साक्षिभूतोऽप्राणो ह्यमनाः शुभ्रोऽक्षरात्परतः परः केवलोऽविक्रिय इत्येवं पश्यतीत्येवं पश्यतीत्येवं बुद्धिरंतःकरणं यस्यात्मन उपाधि
भूता न लिप्यते नानुशयिनी भवतीदमहमकार्षं तेनाहं नरकं गमिष्यामीति । एवं यस्य बुद्धिर्न लिप्यते । स सुमतिः स पश्यति हत्वापि स इमांल्लो
कान्सर्वान्प्राणिन इत्यर्थः । न हंति हननक्रियां न करोति न निबध्यते । नापि तत्कार्येणाधर्मफलेन संबध्यते । ननु हत्वापि न हंतीति विप्रतिषिद्धमु
च्यते । यद्यपि स्तुतिर्नैष दोषो लौकिकपारमार्थिकदृष्ट्यपेक्षया तदुपपत्तेः । देहाद्यात्मबुद्ध्या हंताहमिति लौकिकीं दृष्टिमाश्रित्य हत्वापीत्याह ॥

भः भूम
ति ३

यथादर्शितापारमार्थिकीं दृष्टिमाश्रित्य न हंति न निबध्यत इति तदुभयमनुपपद्यते॥ न॥ नन्वधिष्ठानादिभिः संभूय करोत्येवात्मा कर्त्तार
मात्मानं केवलं त्विति केवलशब्दप्रयोगात् नैष दोषः। आत्मनोऽविक्रियस्वभावत्वादधिष्ठानादिभिः संहतत्वानुपपत्तेर्विक्रियावतो ह्य
न्यैः संहननं संहत्य वा कर्तृत्वं स्यान्न त्वविक्रियस्यात्मनः केनचित्संहननमस्तीति न संभूय कर्तृत्वमुपपद्यते। अतः केवलत्वमात्मनः स्वा
भाविकमिति केवलशब्दोऽनुवादमात्रं। अविक्रियत्वं चात्मनः श्रुतिस्मृतिन्यायप्रसिद्धं। अविकार्योऽयमुच्यते। गुणैरेव कर्माणि क्रियंते। शरी
रस्थोपि न करोतीत्यसकृदुपपादितं गीतास्वेव। श्रुतिषु च ध्यायतीव लेलायतीत्येवमाद्यासु। न्यायतश्च निरवयवमपरतंत्रम
विक्रियमात्मतत्त्वमिति राजमार्गः। विक्रियत्वाभ्युपगमे चात्मनः स्वकीयैव विक्रिया स्यान्न वितुमर्हति। नाधिष्ठानादीनां कर्माण्यात्मक
र्तृकाणि स्युर्नहि परस्य कर्म परेणाकृतमागंतुमर्हति। यत्त्वविद्यया गमितं न तत्तस्य। यथा रजतत्वं न शुक्तिकायाः। यथा वा तलमलिनत्वं
बालैर्गमितमविद्ययाकाशस्य। तथाधिष्ठानादिविक्रियापि तेषामेव नात्मनस्तस्माद्युक्तमुक्तं। अहंकृतत्वबुद्धिलेपाभावाद्विद्वान्न हं
ति न निबध्यत इति। नायं हंति न हन्यत इति प्रतिज्ञाय न जायत इत्यादिना हेतुवचनेनाविक्रियत्वमात्मन उक्त्वा वेदाविनाशिनमिति विदु
षः कर्माधिकारान्निवृत्तिं शास्त्रादौ संक्षेपत उक्त्वा मध्ये प्रसारितां तत्र तत्र प्रसंगं कृत्वेहोपसंहरति। शास्त्रार्थपिंडीकरणाय विद्वान्न हंति न निबध्य
त इति। एवं सति देहभृत्त्वाभिमानानुपपत्तावविद्याकृताशेषकर्मसंन्यासोपपत्तेः। संन्यासिनामनिष्टादित्रिविधं कर्मणः फलं न भवती
त्युपपन्नं। तद्विपर्ययाच्चेतरेषां भवतीत्येतदपरिहार्यमित्येव गीताशास्त्रस्यार्थ उपसंहृतः। स एष सर्ववेदार्थसारो निपुणमतिभिः पंडि

ते विचार्यप्रतिपत्तव्या इति तत्र तत्र प्रकरणविभागेन दर्शितोऽस्माभिः शास्त्रन्यायानुसारेण ॥१७॥ अथेदानीं कर्मणां प्रवर्त्तकमुच्यते ॥ ॥
ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ॥ करणं कर्म कर्त्तेति त्रिविधः कर्मसंग्रहः ॥१८॥ ज्ञानं ज्ञायतेऽनेनेति सर्वविषयमविशेषेणोच्यते ॥
तथा ज्ञेयं ज्ञातव्यं तदपि सामान्येनैव सर्वमुच्यते । तथा परिज्ञातोपाधिलक्षणोऽविद्याकल्पितो भोक्तेत्येतत्त्रयमविशेषेण सर्वकर्म-
णां प्रवर्त्तिका त्रिविधा कर्मचोदना । ज्ञानादीनां हि त्रयाणां संनिपाते हानोपादानादिप्रयोजनः कर्मारंभः स्यात् । ततः पंचभिरधिष्ठानादि-
भिरारब्धं कर्म वाङ्मनःकायाश्रयभेदेन त्रिविधा राशीकृतं त्रिषु करणादिषु संगृह्यत इति । एतदुच्यते । करणं क्रियतेऽनेनेति बाह्यं श्रो-
त्रादि अंतःस्थं बुद्ध्यादि । कर्म ईप्सिततमं कर्त्तुः क्रियया व्याप्यमानं । कर्त्ता करणानां व्यापारयितोपाधिलक्षणः इति त्रिविधस्त्रिप्रकारः कर्मसं-
ग्रहः संगृह्यतेऽस्मिन्निति संग्रहः कर्मणः संग्रहः कर्मसंग्रहः कर्मैषु हि त्रिषु समवैतीति तेनायं त्रिविधः कर्मसंग्रहः ॥१८॥ अथेदानीं क्रियाकार-
कफलानां सर्वेषां गुणात्मकत्वात्सत्त्वरजस्तमोगुणभेदतस्त्रिविधो भेदो वक्तव्य इत्यारभ्यते ॥ ॥ ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः ॥
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥१९॥ ज्ञानं ज्ञायतेऽनेनेति । कर्म च क्रियानकारकं पारिभाषिकमीप्सिततमं कर्म । कर्त्ता च नि-
र्वर्त्तकः क्रियाणां । त्रिधैवावधारणं गुणव्यतिरिक्तजात्यंतराभावप्रदर्शनार्थं । गुणभेदतः सत्त्वादिभेदेनेत्यर्थः । प्रोच्यते कथ्यते गुणसं-
ख्याने कापिले शास्त्रे कापिलमपि गुणसंख्याने शास्त्रं गुणभोक्तृविषये प्रमाणमेव परमात्मब्रह्मैकत्वविषये यद्यपि विरुध्यते । तेहि तेषु का-
पिला गुणगौणव्यापारनिरूपणे अभियुक्ता इति तच्छास्त्रमपि वक्ष्यमाणार्थस्तुत्यर्थत्वेनोपादीयते इति न विरोधः ॥ यथावद्यथान्यायं यथाशा-

तथापि न मरव्या२

नानाभावान्‌ भिन्नानात्मनः पृथग्विधान्‌ पृथक्‌ प्रकारान्‌ भिन्नलक्षणानित्यर्थः। वेत्ति ‸ जानाति य ज्ञानं यत्तु

स्तंभस्मरणं तान्यपि ज्ञानादीनि तद्भेद्‌ज्ञातानि च गुणभेदतस्तानि शृणु वदपमानेऽर्थे मनःसमाधिं कुर्वित्यर्थः॥१९॥ ज्ञानस्य तावत्त्रिविधत्वमु
च्यते॥ ॥सर्वभूतेषु येनैकं भावमव्ययमीक्षते॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकं॥२०॥ सर्वभूतेषु अव्यक्तादिस्थावरान्तेषु भूतेषु ये
न ज्ञानेनैकं भावं भावशब्दो वस्तुवाची॥ एकमात्मवस्त्वित्यर्थः। अव्ययं न व्येतीति स्वेनात्मना धर्मेण वा कूटस्थं नित्यमित्यर्थः। ईक्षते ये
न ज्ञानेन पश्यति। तं च भावमविभक्तं प्रतिदेहं विभक्तेषु देहभेदेषु व्योमवन्निरंतरमित्यर्थः। अद्वैतात्मदर्शनं सात्त्विकं सम्यग्दर्शनं विद्धीति॥२०॥
यानि द्वैतदर्शनान्यसम्यक्‌भूतानि राजसानि तामसानि चेति न संसारोच्छित्तये भवंति॥ ॥पृथक्त्वेन तु यज्ज्ञानं नानाभावान्‌ पृथग्विधान्‌
॥ वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं॥२१॥ ॥पृथक्त्वेन तु भेदेन तत्प्रतिशरीरमन्यत्वेन यज्ज्ञानं सर्वभूतेषु ज्ञातस्य कर्तृत्वात्‌ संभवतो ये
न ज्ञानेन वेत्तीत्यर्थः॥ तज्ज्ञानं राजसं रजोनिर्वृत्तं॥२१॥ ॥यत्तु कृत्स्नवदेकस्मिन्‌ कार्ये सक्तमहेतुकं॥ अतत्त्वार्थवदल्पं च तत्तामसमुदा
हृतं॥२२॥ यत्तु ज्ञानं कृत्स्नवत्‌ समस्तवत्‌ सर्वविषयमिव एकस्मिन्‌ कार्ये देहे वहिर्वा प्रतिमादौ सक्तमेतावानेवात्मेश्वरो वा नातः परम
स्तीति यथा नग्नक्षपणकादीनां शरीरान्तर्वर्ती देहपरिमाणो जीव ईश्वरो वा पाषाणदार्वादिमात्रं इत्येवमेकस्मिन्‌ कार्ये सक्तं। अहेतुकं
हेतुवर्जितमयुक्तिकं अतत्त्वार्थवत्‌ यथाभूतोऽर्थस्तत्त्वार्थः सोऽस्य ज्ञेयभूतोऽस्तीति तत्त्वार्थवत्‌ न तत्त्वार्थवदतत्त्वार्थवद्‌ अहेतुकत्वादेवाल्पं चाल्प
विषयत्वादल्पफलत्वाद्वा तत्तामसमुदाहृतं॥ तामसानां हि प्राणिनामविवेकिनां ज्ञानमीदृशं दृश्यते॥२२॥ अथ कर्म॥ नियतं संगरहितमरागद्वेषतः कृ
तं॥ अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते॥२३॥ नियतं नित्यं संगरहितं आसक्तिवर्जितं अरागद्वेषतः कृतं रागप्रयुक्तेन द्वेषप्रयुक्ते

न च कृतं रागद्वेषतः कृतं तद्विपरीतं कृतं अरागद्वेषतः कृतं॥ अफलप्रेप्सुना फलं प्रेप्सतीति फलप्रेप्सुः फलतृष्णस्तद्विपरीतेनाफलप्रेप्सु
ना कर्तृ कृतं कर्म यत् तत्सात्विकमुच्यते॥२३॥ यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः॥ क्रियते बहुलायासं तद्राजसमुदाहृतं॥२४॥ ॥यत्तु का
मेप्सुना फलप्रेप्सुनेत्यर्थः। कर्म साहंकारेण वा साहंकारेणेति न तत्त्वज्ञानापेक्षया। किं तर्हि लौकिकश्रोत्रियनिरहंकारापेक्षया यो हि परमार्थ
निरहंकार आत्मवित्तस्य न कामेप्सुत्वबहुलायासकर्तृत्वप्राप्तिरस्ति। सात्विकस्यापि कर्मणो नात्मवित्साहंकारं कर्ता किमु राजसतामसयोः। लो
के नात्मविदपि श्रोत्रियो निरहंकार उच्यते। निरहंकारोयं ब्राह्मण इति। तस्मात्तदपेक्षयैव साहंकारेणेत्युक्तं। वा पुनः शब्दः पादपूरणार्थः॥
क्रियते बहुलायासं महतायासेन निर्वर्त्यते तत्कर्म राजसमुदाहृतं॥२४॥ ॥अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं॥ मोहादारभ्यते कर्म यत्तत्ता
मसमुच्यते॥२५॥ ॥अनुबंधः पश्चाद्भावि यद्वस्तु सोऽनुबंधः उच्यते। तं चानुबंधं क्षयं यस्मिन्कर्मणि क्रियमाणे शक्तिक्षयोर्थक्षयो वा स्यात्। तं
क्षयं हिंसां प्राणिपीडां अनपेक्ष्य च पौरुषं पुरुषकारं शक्तोमीदं कर्म परिसमापयितुमित्येवमात्मसामर्थ्यमित्येतान्यनुबंधादीन्यनपेक्ष्य पौरु
षं तानि मोहादविवेकत आरभ्यते कर्म यत्तत्तामसमुच्यते॥२५॥ ॥मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः॥ सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्वि
क उच्यते॥२६॥ ॥मुक्तः परित्यक्तः संगो येन स मुक्तसंगः। अनहंवादी नाहंवादनशीलः। धृत्युत्साहसमन्वितः। धृतिर्धारणं उत्साह उद्यमस्ता
भ्यां समन्वितः संयुक्तो धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योः क्रियमाणस्य कर्मणः फलसिद्धावसिद्धौ च सिद्ध्यसिद्ध्योर्निर्विकारः। केवलं शास्त्रप्रमाण
प्रयुक्तो न फलरागादिना यः स निर्विकार उच्यते। एवंभूतः कर्ता यः स सात्विक उच्यते॥२६॥ रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः॥

हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः ॥२७॥ रागी रागोऽस्यास्तीति रागी कर्मफलप्रेप्सुः कर्मफलार्थी लु[illegible]ब्धः परद्रव्येषु संजात
तृष्णः तीर्थादौ च स्वद्रव्यापरित्यागी [illegible]हिंसात्मकः परपीडनस्वभावः अशुचिः बाह्यान्तःशौचवर्जितः । हर्षशोकान्वितः । इष्टप्राप्तौ ह
र्षः । अनिष्टप्राप्तौ विष्टवियो[illegible]गे च शोकस्ताभ्यां हर्षशोकाभ्यां समन्वितः संयुक्तः तस्यैव वा कर्मणः संपत्तिविपत्त्योर्हर्षशोकौ स्यातां ताभ्यां
संयुक्तो यः कर्त्ता स राजसः परिकीर्त्तितः ॥२७॥ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ॥ विषादी दीर्घसूत्री च कर्त्ता तामस उच्य
ते ॥२८॥ ॥ अयुक्तोऽसमाहितः प्राकृतोऽत्यंतासंस्कृतबुद्धिर्बालिशः स्तब्धो दंडवन्नतमतिः कस्मैचित् । शठः मायावी शक्तिगूहनकारी ।
नैष्कृतिकः परच्छेदनपरः अलसोऽप्रवृत्तिशीलः कर्त्तव्येष्वपि । विषादी प्रवसन्नस्वभावः दीर्घसूत्री च कर्त्तव्यादीनां दीर्घप्रसारणो
यदद्य श्वो वा कर्त्तव्यं तन्मासेनापि न करोति । यश्चैवंभूतः कर्त्ता स तामस उच्यते ॥२८॥ ॥ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ॥ प्रोच्यमान
मशेषेण पृथक्त्वेन धनंजयः ॥२९॥ ॥ बुद्धेर्भेदं धृतेश्चैव भेदं गुणतः सत्त्वादिगुणतस्त्रिविधं शृणु इति सूत्रोपन्यासः ॥ प्रोच्यमानं क
थ्यमानमशेषेण निरवशेषतो यथावत्पृथक्त्वेन विवेकतो धनंजय । दिग्विजये मानुषं दैवं च प्रभूतं धनमजयत् । तेनासौ धनंजयोऽ
र्जुनः ॥२९॥ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये । बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥३०॥ प्रवृत्तिः शास्त्रविहिता विषया । निवृत्ति
र्नतत्प्रतिषिद्धविषया ॥ कार्याकार्ये कर्त्तव्याकर्त्तव्ये करणाकरणे इत्येतत् ॥ देशकालाद्यपेक्षया दृष्टादृष्टार्थानां कर्मणां भयाभये बिभेत्य
स्मादिति भयं तद्विपरीतमभयं च भयाभये दृष्टादृष्टयोः [illegible]रणे इत्यर्थः ॥ बंधं सहेतुकं मोक्षं च सहेतुकं या वेत्ति बुद्धिः सा[पा]र्थ सात्त्विकी । तत्र सानं बुद्धे

का२ पा

वैतिः। बुद्धिस्तु वति वृत्तिमती। धृतिरपि वृत्तिविशेषो बुद्धेः॥३०॥ यया धर्ममधर्मं च कार्यं वाकार्यमेव च। अयथावत्प्रजानाति बुद्धिः सा पार्थ रा
जसी॥३१॥ यया धर्मं शास्त्रचोदितं। अधर्मं च प्रतिषिद्धं कार्यमकार्यमेव च। पूर्वोक्ते एव कार्याकार्ये अपि यथावत् न यथावत् सर्वतो निर्णयेन प्र न २
जानाति बुद्धिः सा पार्थ राजसी॥३१॥ ॥अधर्मं धर्ममिति या मन्यते तमसावृता॥ सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥३२॥ अ
धर्मं प्रतिषिद्धं धर्मं विहितमिति या मन्यते जानाति तमसावृता तामसी सर्वार्थान् सर्वानेव ज्ञेयपदार्थान् विपरीतांश्च वि रीतानेव वि प ४
जानाति बुद्धिः सा पार्थ तामसी॥३२॥ धृत्या यया धारयते मनः प्राणेंद्रियक्रियाः॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्वि
की॥३३॥ धृत्या यया अव्यभिचारिण्या प्रतिव्यवहितेन संबंधः॥ धारयते किं मनः प्राणेंद्रियक्रियाः। मनश्च प्राणश्चेंद्रियाणि च तेषां
क्रियाश्चेष्टास्ता उच्छास्त्रमार्गप्रवृत्तेर्धारयति धृत्या हि धार्यमाणा उच्छास्त्रविषयमार्गीनभवंतीति। योगेन समाधानेनाव्यभिचारि
चे १ ण्येति त्यसमाध्यनुगतत्यर्थः॥ एतदुक्तं भवति। अव्यभिचारिण्या धृत्या मनःप्राणेंद्रियक्रिया धारयमाणा योगेन धारयतीत्येवं लक्षा
णा धृतिः सा पार्थ सात्विकी॥३३॥ यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन॥ प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी॥३४॥ य
या तु धर्मकामार्थान् धर्मश्च कामश्चार्थश्च तान् धर्मार्थकामान् धृत्या यया धारयते मनसि नित्यकर्तव्यरूपान् अवधारयत्यर्जुन। प्रसंगेन य
यम्य स्य यं धर्मादेर्धारणप्रसंगस्तेन तेन प्रसंगेन फलाकांक्षी च भवति यः पुरुषस्तस्य सा धृतिः पार्थ राजसी॥३४॥ यया स्वप्नं भयं शोकं विषादं
२ मदमेव च॥ न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी॥३५॥

यया स्वप्नं भयं निद्रां शोकं संतापं विषादं विषण्णतां मदं विषयसेवामात्मनो बहुमन्यमानो मत्त इव मदमेव च। मतः। असौ नित्यमेव कर्त्त
व्यरूपतया कुर्वन्न विमुंचति धारयत्येव दुर्मेधाः कुत्सितमेधाः पुरुषो यस्तस्य धृतिर्या सा तामसी मता॥३५॥ गुणभेदेन क्रियाणां कार
काणां च त्रिविधो भेद उक्तः। अथेदानीं फलस्य सुखस्य च त्रिधा भेद उच्यते॥ ॥सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ॥ अभ्यासाद्रमते य
त्र दुःखांतं च निगच्छति॥३६॥ सुखं त्विदानीं त्रिविधं शृणु समाधानं कुर्वित्येतन्मे भरतर्षभ॥ अभ्यासात्परिचयादावृत्तेः रम
ते रतिं प्रपद्यते यत्र यस्मिन् सुखे न तु प्रथमे दुःखांतं च दुःखावसानं दुःखोपशमनं च निगच्छति निश्चयेन प्राप्नोति॥३६॥ ॥यत्तदग्रे विष
मिव परिणामेऽमृतोपमं॥ तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजं॥३७॥ यत्तत्सुखमग्रे प्रथमं सन्निपाते ज्ञानवैराग्यध्यानसमा
ध्यारंभेऽत्यंतायाससाध्यत्वाद्विषमिव दुःखात्मकं भवति॥ परिणामे ज्ञानवैराग्यादिपरिपाकजं सुखममृतोपमं तत्सुखं सात्विकं प्रोक्तं
विद्भिः। आत्मनो बुद्धिरात्मबुद्धिरात्मबुद्धेः प्रसादो नैर्मल्यं सलिलवत्स्वच्छता ततो जातमात्मबुद्धिप्रसादजमात्मविषयाऽलंबना बुद्धि
रात्मबुद्धिस्तत्प्रसादप्रकर्षाद्वा जातमित्यतस्तस्मात्सात्विकं तत्॥३७॥ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं॥ परिणामे विषमिव तत्सु
खं राजसं स्मृतं॥३८॥ विषयेंद्रियसंयोगाद्यत्तत्सुखं जायते तदग्रे प्रथमं चात्यंतमतोऽमृतसमं॥ परिणामे विषमिव बलवीर्यरूपप्र
ज्ञामेधाधनोत्साहहानिहेतुत्वादधर्मतज्जनितनरकादिहेतुत्वाच्च। परिणामे तदुपभोगपरिणामांते विषमिव तत्सुखं राजसं स्मृतं॥३८॥
यदग्रे चानुबंधे च सुखं मोहनमात्मनः॥ निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं॥३९॥ यदग्रे चानुबंधे च वासनोत्तरकाले च सुखं मोहनकरम।

नो १

त्मनो निद्रालस्यप्रमादोत्थं ॥ निद्रा च आलस्यं च प्रमादश्च इत्येतेभ्यः समुत्तिष्ठतीति निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं॥३९॥ अथेदानीं
प्रकरणोपसंहारार्थः श्लोक आरभ्यते॥ ॥न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः॥ सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः॥४०॥ ॥न त
दस्ति तन्नास्ति पृथिव्यां वा मनुष्यादिसत्त्वं प्राणिजातं अन्यद्वा अप्राणि दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैः प्रकृतितो जातैरेभिस्त्रिगुणैः सत्त्वादिभि
र्मुक्तं परित्यक्तं यत्स्यात् भवेत् न तदस्तीति पूर्वेण संबन्धः॥४०॥ सर्वः संसारः क्रियाकारकफललक्षणः सत्त्वरजस्तमोगुणात्मकः अविद्यापरि
कल्पितः समूलोऽनर्थ उक्तः वृक्षरूपकपरिकल्पनया चोर्ध्वमूलमित्यादिना। तं च असङ्गशस्त्रेण दृढेन छित्त्वा परं पदं ततः परिमार्गितव्यमिति चो
क्तं। तत्र च सर्वस्य त्रिगुणात्मकत्वात् संसारकारणानिवृत्त्यनुपपत्तौ प्राप्तायां यथा तन्निवृत्तिः स्यात्तद्वक्तव्यं। सर्वश्च गीताशास्त्रार्थ उपसंहर्तव्यः।
एतावानेव च सर्वो वेदस्मृत्यर्थः पुरुषार्थमिच्छद्भिरनुष्ठेय इत्येवमर्थं च ब्राह्मणक्षत्रियविशामित्यादिरारभ्यते॥ ॥ब्राह्मणक्षत्रियविशां शूद्रा
णां च परंतप। कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥४१॥ ब्राह्मणाश्च क्षत्रियाश्च विशश्च ब्राह्मणक्षत्रियविशः तेषां ब्राह्मणक्षत्रियविशां॥ शूद्राणां च शूद्रा
णामसमासकरणमेकजातित्वे सति वेदानधिकारात्॥ परंतप। कर्माणि प्रविभक्तानि इतरेतरविभागेन व्यवस्थापितानि केन स्वभावप्रभवैर्गुणैः
स्वभाव ईश्वरस्य प्रकृतिस्त्रिगुणात्मिका माया प्रभवो येषां गुणानां ते स्वभावप्रभवास्तैः शमादीनि कर्माणि प्रविभक्तानि ब्राह्मणादीनां। अथवा ब्राह्म
णस्वभावस्य सत्त्वगुणः प्रभवः कारणं। तथा क्षत्रियस्वभावस्य सत्त्वोपसर्जनं रजः प्रभवः। वैश्यस्वभावस्य तम उपसर्जनं रजः प्रभवः। शूद्रस्वभाव
स्य रजः उपसर्जनं तमः प्रभवः प्रशान्तैश्वर्येहामूढस्वभावदर्शनाच्चतुर्णां। अथवा जन्मान्तरकृतसंस्कारः प्राणिनां वर्तमानजन्मनि स्वका

र्यात्रिगुणत्वेनाभिव्यक्तः स्वभावः स प्रभवो येषां गुणानां ते स्वभावप्रभवाः गुणाः प्रादुर्भावस्य निःकारणत्वानुपपत्तेः ॥ स्वभावः कारणमिति कारणवि
शेषोपादानं । एवं स्वभावप्रभवैः सत्वरजस्तमोभिः गुणैः स्वकार्यरूपेण शमादीनि कर्माणि प्रविभक्तानि । ननु शास्त्रप्रविभक्तानि शा
स्त्रेण विहितानि ब्राह्मणादीनां शमादीनि कर्माणि कथमुच्यंते सत्वादिगुणप्रविभक्तानीति । नैष दोषः । शास्त्रेणापि ब्राह्मणादीनां सत्वादि
गुणविशेषापेक्षयैव शमादीनि कर्माणि प्रविभक्तानि न गुणानपेक्षयेति शास्त्रविभक्तान्यपि कर्माणि गुणविभक्तानि इति उच्यंते ॥४१॥
कानि पुनस्तानि कर्माणीत्युच्यते ॥ शमो दमस्तपः शौचं क्षांतिरार्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं ॥४२॥ ॥शमो दमो यथाव्या
ख्यातार्थौ । तपो यथोक्तं शारीरादितपः । शौचं व्याख्यातं । क्षांतिः क्षमा । आर्जवं ऋजुतैव च । ज्ञानं विज्ञानं उक्तार्थं । आस्तिक्यमास्तिभावः श्रद्दधानता आ
गमार्थेषु ॥ ब्रह्मकर्म ब्राह्मणजातेः कर्म ब्रह्मकर्म स्वभावजं यदुक्तं स्वभावप्रभवैर्गुणैः प्रविभक्तानीति तदेवोक्तं स्वभावजमिति ॥४२॥ शौर्यं तेजो धृति
र्दाक्ष्यं युद्धे चाप्यपलायनं । दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजं ॥४३॥ शौर्यं शूरस्य भावः तेजः प्रागल्भ्यं । धृतिः धारणं सर्वावस्थास्ववस
सादो न भवति । यथावस्थोत्तंभितस्य । दाक्ष्यं दक्षभावः सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रतिपत्तिः । युद्धे चाप्यपलायनं । अपराङ्मुखीभावः
यत्या शत्रुभ्यः । दानं देये मुक्तहस्तता । ईश्वरभावश्च ईश्वरस्य भावः प्रभुशक्तिप्रकटीकरणं ईशितव्यान् प्रति । क्षात्रं कर्म स्वभावजं क्षत्रजातेः विहितं कर्म ×
४ क्षात्रं कर्म स्वभावजं ॥४३॥ कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभावजं । परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ॥४४॥ कृषिगोरक्षवाणिज्यं ॥
कृषिर्भूमेः विलेखनं । गोरक्षतीति गोरक्षः तस्य भावो गोरक्ष्यं पशुपाल्यं । वाणिज्यं वणिक्कर्म क्रयविक्रयादिलक्षणं । वैश्यकर्म वैश्यजातेः क

म वैश्यं स्वभावजं ॥ परिचर्यात्मकं कर्म शुश्रूषा स्वभावं कर्म शूद्रस्यापि स्वभावजं ॥ एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्रा
प्तिः फलं स्वभावतः । वर्णाश्रमादयश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मायुः श्रुतवृत्तमेधसो
जन्म प्रतिपद्यंते । इत्यादि स्मृतिभ्यः पुराणे च वर्णितानामाश्रमिणां च लोकफलभेदविशेषस्मरणात् ॥ कारणांतरलक्षणां त्विदं वक्ष्यमा
फलं श्रवणम् ॥ ॥ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ॥ स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ॥४५॥ स्वे स्वे यथोक्तलक्षणे
दे कर्मण्यभिरतः तत्परः संसिद्धिं स्वकर्मानुष्ठानाद शुद्धिक्षये सति कायेंद्रियाणां ज्ञानाधिष्ठानयोग्यतालक्षणां लभते प्राप्नोति नरो
धिकृतः पुरुषः । किं स्वकर्मनिष्ठात एव साक्षात् संसिद्धिं । न । कथं तर्हि स्वकर्मनिरतः सिद्धिं यथा येन प्रकारेण विंदति तच्छृणु ॥४५॥
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं ॥ स्वकर्मणा तमभ्यर्च्य सिं। द्धिं विंदत मानवः ॥४६॥ यतो यस्मात्प्रवृत्तिरुत्पत्तिश्चेष्टा वा । य
स्मादंतर्यामिन ईश्वराद् भूतानां प्राणिनां स्याद्येन ईश्वरेण सर्वमिदं जगत्ततं व्याप्तं स्वकर्मणा पूर्वोक्तेन प्रतिवर्णितमीश्वरमभ्यर्च्य पू
जयित्वा आराध्य केवलं ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं विंदति मानवः ॥४६॥ यत एवमतः ॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनु
ष्ठितात् ॥ स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥४७॥ श्रेयान् प्रशस्यतरः स्वो धर्मः स्वधर्मः विगुणोऽपीत्यपिशब्दो द्रष्टव्यः । परधर्मा
त्स्वनुष्ठितात् । स्वभावनियतं यदुक्तं स्वभावजमिति तदेवोक्तं स्वभावनियतमिति । यथा विषजातस्य कृमेर्विषं न दोषकरं ॥ तथा स्वभावनियतं

९२
गी॰ भा॰

कर्म कुर्वन्नाप्नोति किल्बिषं पापं॥४७॥ स्वभावनियतं कर्म कुर्वाणो विषजातकृमिवत् किल्बिषं नाप्नोतीत्युक्तं॥ परधर्मश्च भयावह इति
श्रुतो न जस्तात्ति हि कश्चित् क्षणमपि अकर्मकृत् तिष्ठतीत्युक्तः॥ ॥सहजं कर्म कौंतेय सदोषमपि न त्यजेत्॥ सर्वारंभा हि दोषेण धूमेना
ग्निरिवावृताः॥४८॥ ॥सहजं कर्म कौंतेय सहजन्मनैवोत्पन्नं सहजं कर्म। हे कौंतेय सदोषमपि त्रिगुणात्मकत्वान्न त्यजेत्। सर्वारंभा आरभ
्यंत इत्यारंभाः सर्वकर्माणीत्येतत् ये केचिदारंभाः स्वधर्माः परधर्माश्च ते सर्वे हि दोषा हि यस्मात् त्रिगुणात्मकत्वमत्र हेतुः त्रिगुणात्म
कत्वादि दोषेण धूमेन सहजेनाग्निरिवावृताः। सहजस्य कर्मणः स्वधर्माख्यस्य परित्यागेन परधर्मानुष्ठानेपि दोषान्नैव मुच्य
ते। भयावहश्च परधर्मो न च शक्यते अशेषतस्त्यक्तुमज्ञेन कर्म यतस्तस्मान्न त्यजेदित्यर्थः। किमशेषतस्त्यक्तुमशक्यं कर्मेति न त्यजेत्।
किं वा सहजस्य कर्मणस्त्यागे दोषो भवतीति। किं चातो यदि तावदशेषतस्त्यक्तुमशक्यमिति न त्यज्यं सहजं कर्म एवं तर्ह्यशेषतस्त्याजे
गुणत्वं स्यादिति सिद्धं भवति। सत्यमेवं अशेषतस्त्यागणावनोपपद्यत इति चेत् किं। नित्यप्रचलितात्मकः पुरुषो यथा सांख्यानां गुणाः॥
किं वा क्रियैव कारकं यथा बौद्धानां पंचस्कंधाः क्षणप्रध्वंसिनः उभयथापि कर्मणोऽशेषतस्त्यागो न संभवत्यघततीयो॥ पिय चोपद
करोति तदा सक्रियं वस्तु यदा न करोति तदा निःक्रियं वस्तु तदेवात्तत्रैवं सति शक्यं कर्माशेषतस्त्यक्तुमयं त्वस्मिन्नयं दोविशेषो न तत्त्व प्रचलि
तं वस्तुनापि क्रियैव कारकं किंतर्हि व्यवस्थिते द्रव्ये विद्यमाना क्रियोत्पद्यते विद्यमाना च विनश्यति। शुद्धं द्रव्यं शक्तिमदवतिष्ठत इत्येव
पंच परिमाणमस्येति पंचकः स्कंधः। स्कंधो नाम संज्ञा संघस्तज्ञाध्यवनेष्विति [illegible] रूपवेदनाविज्ञानसंज्ञासंस्काराख्याः पंचस्कंधाः। तत्र विषयप्रपंचो रूप
स्कंधः। तत्र ज्ञानप्रपंचो वेदनास्कंधः। आलयप्रपंचो विज्ञानस्कंधः। नामप्रपंचः संज्ञास्कंधः। वासनाप्रपंचः संस्कारस्कंधः। एवं पंचधा परिवर्तमानो ज्ञान
संतीतानस्य बाध्योऽत्र बौद्धाः। एवं बौद्धानां [illegible] ताः सौ॥३॥

९२
गी॰ भा॰

माहुः। कारणादाः सदेव च कारकमित्यस्मिन्पक्षे को दोष इत्ययमेव तु दोषो यतस्त्वभावावर्त्तं मतमिदं। कथं जायते यस्मादाह भगवान्नासतो
विद्यते भाव इत्यादि। कारणादानां ह्यसतो भावः सतश्चाभाव इतीदं मतमभागवतं। अभागवतत्वेपि न्यायवञ्चेति को दोष इति चेदुच्यते। दो
षवत्त्विदं सर्वप्रमाणविरोधात्। कथं। यदि तावद् घ्राणकादि द्रव्यप्रागुत्पत्तेरसत्वं तमेवायदुत्पन्नं चास्थितं किंचित्कालं पुनरसत्वं तमेवासत्व
मापद्यते। तथा च सत्यसदेव सज्जायते भावोभावीभवति भावश्चाभाव इति। तत्राभावो जायमानः प्रागुत्पत्तेः शशविषाणः कल्प्यः समवाय्य
समवायिनिमित्ताख्यकारणमपेक्ष्य जायत इति। न चैवमभाव उत्पद्यते कारणत्रयापेक्षात इति शक्यं वक्तुं असतः शशविषाणादीनामदर्श
नात्। भावात्मकास्तु घटादय उत्पद्यमानाः किंचिदपि व्यक्तिमात्रकारणमपेक्ष्योत्पद्यन्त इति शक्यं प्रतिपत्तुं। किंच। असतश्च सद्भावे सतश्चास
द्भावे न कश्चित्प्रमाणप्रमेयव्यवहारे विश्वासः कस्यचित्स्यात्। सत्सदेवासदसदेवेति नियमानुपपत्तेः। किंचोत्पद्यत इति घ्राणकादेर्द्रव्यस्य
स्वकारणसंबंधमाहुः। प्रागुत्पत्तेश्चासत्यस्मात्कारकव्यापारमपेक्ष्य स्वकारणैः परमाणुभिः स्वसत्तासंबंधतया च समवायलक्षणेन संबंधेन तं
बद्धं स्वकारणसमवेतत्वसत्ता इति। तत्र च वक्तव्यं कथमसतः स्वकारणत्रवेत्संबंधो वा केनचित्स्यात्। नहि वंध्यापुत्रस्य सत्तासंबंधो वा कारणं
वा केनचित्प्रमाणतः कल्पयितुं शक्यः। ननु तेनैव वैशेषिकैरभावस्य संबंधः कल्प्यते। घ्राणकादीनां हि द्रव्याणां स्वकारणसमवायलक्षणः सं
बंधः सतामेवोच्यते। इति न संबंधात्प्राकसत्तानभ्युपगमात्। नहि वैशेषिकैः कुलालदंडचक्रादिव्यापारात्प्राग्घटादीनामस्तित्वमिष्यते। न च स
दा एव घटाद्याकारप्राप्तिमिच्छंति। ततश्चासत एव संबंधः पारिशेष्यादिष्टो भवति। ननु सतोपि समवायलक्षणः संबंधो नाविरुद्धः नो वंध्यापु

सत्ताय
द्रव्य ४

न

१२१
गी॰भा॰

रतिलक्षणेतोन कश्चिद्विशेषो दर्शयितुं शक्यः। असति च विशेषे घटस्य प्रागभाव एव कु
लालादिभिर्घटभाव॥२॥ ऊं॥

न्नादीनामदर्शनात्। घटादेरेव प्रागभावस्य सकारणसंबंधोऽभवति। न वंध्यापुत्रादेरभावस्य तुल्यत्वेऽपीति विशेषोऽभावस्य वक्तव्यः॥ एकस्याभावे
द्वयोरभावः सर्वस्याभावः प्रध्वंसाभावः प्रागभाव इतरेतराभावो अत्यंताभावमापद्यते। संबध्यते च भावेन कपालाख्येन सकारणेन सर्वव्यवहारयो
ग्यश्च भवति। न तु घटस्येव प्रध्वंसाभावोऽभावत्वे सत्यपीति प्रध्वंसाभावस्य न कश्चिद्व्यवहारयोग्यत्वं। प्रागभावस्येव द्व्यणुकादिद्रव्याख्यस्यात्यन्त
दिव्यवहारार्हमित्येतदसमंजसं अभावत्वाविशेषादत्यंतप्रध्वंसाभावयोरिव। ननु नैवास्माभिः प्रागभावस्याभावापत्तिरु[illegible]च्यते। किं तर्हि भावस्यैव
भावापत्तिः। घटस्येव घटापत्तिः पटस्येव पटापत्तिरिति। एतदप्यभावस्याभावापत्तिवदेव प्रमाणविरुद्धं। सोऽस्य स्यादपि यः परिणामपक्षः सोऽप्य एवं घ
र्मोत्पत्तिविनाशांगीकरणाद्वैशेषिकपक्षान्नाशिष्यते[illegible]॥ अभिव्यक्तितिरोभावांगीकरणेऽप्यभिव्यक्तितिरो[illegible]भावयोर्विद्यमानत्वानिरूपणेऽप
र्ववदेव प्रमाणविरोधः। एतेन कारणस्यैव संस्थानमुत्पादेतमित्येदेतदप्ययुक्तं। पारिशेष्यात्सदेकमेव वस्तु विषयोत्पत्तिनाशादिधर्मैरनेकधा
२८ नटवद्विकल्प्यते। इतीदं भगवतं मतमुक्तं। नासतो विद्यते भाव इत्यस्मिन् श्लोके सत्प्रत्ययस्याव्यभिचारात् व्यभिचार[illegible]तरेषामिति॥ कथं त
र्ह्यात्मनो विक्रियते नाशेषतः कर्मणां त्यागमुपपद्यत इति। यदि वस्तुभूता गुणा यदि वा अविद्याकल्पिताः तद्धर्मं कर्म तदात्मन्यविद्याध्यारोपितमेवे
त्यविद्वान्न हि कश्चित्क्षणमपि अशेषा[illegible] तस्य तु शक्नोतीत्युक्तं विद्वांस्तु विद्यया अविद्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म परित्यक्तुं। अवि
द्ययाध्यारोपितस्य शेषानुपपत्तेर्न हि तिमिरकदृष्ट्याध्यारोपितस्य द्वितीयचंद्रादेस्तिमिरापगमे शेषो वतिष्टते। एवं च सतीदं वचनमुपपन्नं। सर्व
कर्माणि मनसेत्यादि॥ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः। स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इति॥४८॥ या चक[illegible]र्मजा सिद्धिरुक्ता
सा न तिरयोग्यतालक्षणा तस्याः फलभूता नैष्कर्म्यसिद्धिर्ज्ञाननिष्ठालक्षणा[illegible]क्तव्येति श्लोकमारभ्यते॥ ॥असक्तबुद्धिः सर्वत्र जितात्मा

वा

१२१
गी॰भा॰

विगतस्पृहः॥ नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥४९॥ ॥असक्ता संगरहिता बुद्धिरंतःकरणं यस्य सोऽसक्तबुद्धिः। सर्वत्र पुत्रदारादि
षु आसक्तिनिमित्तेषु जितात्मा जितो वशीकृत आत्मा अंतःकरणं यस्य स जितात्मा। विगतस्पृहः। विगतास्पृहा तृष्णा देहजीवनभोगेषु यस्मात्स वि
गतस्पृहः। य एवंभूत आत्मज्ञः स नैष्कर्म्यसिद्धिं निर्गतानि कर्माणि यस्मान्निःक्रियः ब्रह्मात्मसंबोधात्तन्निःकर्मा तस्य भावो नैष्कर्म्यं नैष्कर्म्यं
च तत्सिद्धिश्च सा नैष्कर्म्यसिद्धिः। नैष्कर्म्यस्य वा निःक्रियात्मस्वरूपावस्थानलक्षणस्य सिद्धिर्निष्पत्तिस्तां नैष्कर्म्यसिद्धिं परमां प्रकृष्टां क
र्मजसिद्धिविलक्षणां सद्योमुक्त्यवस्थानरूपां संन्यासेन सम्यग्दर्शनेन तत्पूर्वकेण वा सर्वकर्मसंन्यासेनाधिगच्छति प्राप्नोति॥ तथा चोक्तं॥
सर्वकर्माणि मनसा संन्यस्यैव नैव कुर्वन्न कारयन्नास्ते इति॥४९॥ पूर्वोक्तेन स्वकर्मानुष्ठानेनेश्वराभ्यर्चनरूपेण जनितां प्रागुक्तलक्षणां सि
द्धिं प्राप्तस्योत्पन्नात्मविवेकविज्ञानस्य केवलात्मज्ञाननिष्ठारूपा नैष्कर्म्यलक्षणा सिद्धिर्येन क्रमेण भवति तद्वक्तव्यमित्याह॥ ॥सिद्धिं प्राप्तो
यथा ब्रह्म तथाप्नोति निबोध मे॥ समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा॥५०॥ सिद्धिं प्राप्तः स्वकर्मणेश्वराभ्यर्चनजां कायेन्द्रियाणां
ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं प्राप्त इति तदनुवाद उत्तरार्थः॥ किं तदुत्तरं यदर्थोऽनुवाद उच्यते॥ यथा येन प्रकारेण ज्ञाननिष्ठालक्षणेन ब्रह्म
परमात्मानमाप्नोति तथा तं प्रकारं ज्ञाननिष्ठाप्राप्तिक्रमं मे मम वचनान्निबोध ।निश्चयेत्येतत्किं विस्तारेणेत्याह॥ समासेनैव संक्षेपे नावधारयेत्
णैव हे कौन्तेय यथा ब्रह्म प्राप्नोति तथा निबोधेत्यनेन प्रकारेण या प्रतिज्ञाता ब्रह्मप्राप्तिस्तामिदं तया दर्शयितुमाह॥ निष्ठा ज्ञानस्य या परेति नि
ष्ठा पर्यवसानं परिसमाप्तिरित्येतत्कास्य ब्रह्मज्ञानस्य या परा। कीदृशी सा यादृश आत्मज्ञानं कीदृशं तत् यादृश आत्मा कीदृशोऽसौ यादृशो भग

ग्रा ५२

वतो रूपविषय[illegible]द्वा कैश्चिदन्यायतश्च ॥ ननु विषयाकारं ज्ञानं न विषयो नाप्याकारवानात्मेष्यते क्वचित् ॥ नन्वादित्यवर्णं भारूपः स्वयंज्योतिरि
त्याकारवत्त्वमात्मनः श्रूयते नैतन्न तमोरूपत्वप्रतिषेधार्थत्वात्तेषां वाक्यानां द्रव्यगुणाद्याकारप्रतिषेधे आत्मनः तमोरूपत्वे तत्प्रतिषेधार्थान्या
दित्यवर्णमित्यादिवाक्यान्यरूपमिति च विशेषतो रूपप्रतिषेधादविषयत्वाच्च ॥ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चिदेनमशब्दम च
स्पर्शमित्यादेः तस्मादात्माकारं ज्ञानमित्यनुपपन्नं ॥ कथं तर्ह्यात्मनो ज्ञानं सर्वं हि यद्विषयं ज्ञानं तत्तदाकारं भवति । निराकारश्चात्मेत्युक्तं ज्ञाना
श्रा ४ त्मनोश्चोभयोर्निराकारत्वे कथं तद्भावनेति उच्यते नैतत् तन्निर्मलत्वस्वच्छत्वसूक्ष्मत्वोपपत्तेरात्मनो बुद्धेश्चात्मसमनैर्मल्याद्युपपत्तेरात्म
चैतन्याकाराभासत्वोपपत्तिर्बुद्ध्याभासं मनस्तदाभासानीन्द्रियाणीन्द्रियाभासश्च देहोऽतो लौकिकैर्देहमात्र आत्मदृष्टिः क्रियते देहचैतन्यवा
दिनश्च लोकायतिकाः चैतन्यविशिष्टः कायः पुरुष इत्याहुः । तथा चेन्द्रियचैतन्यवादिनश्चान्ये अन्ये मनश्चैतन्यवादिनश्चान्ये बुद्धिचैतन्य
वादिनस्ततोऽप्यन्तरमव्यक्तमव्याकृताख्यमविद्यावस्थमात्मत्वेन प्रतिपन्नाः केचित् प्रकृतिचैतन्यवादिनः सर्वत्र हि बुद्ध्यादिदेहान्ते आत्मचैत
न्याभासतात्मभ्रान्तिकारणमित्यत आत्मविषयं ज्ञानं न विधातव्यं किन्तर्हि नामरूपाद्यनात्माध्यारोपणनिवृत्तिरेव कार्या नात्मचैत
न्यविज्ञानं अविद्याध्यारोपितसर्वपदार्थाकारैरेव विशिष्टतया गृह्यमाणत्वादत एवाविज्ञानवादिनो बौद्धा विज्ञानव्यतिरेकेण वस्त्वेव नास्ती
ति प्रतिपन्नाः प्रमाणान्तरनिरपेक्षतां च स्वसंविदितत्वाभ्युपगमेन तस्मादविद्याध्यारोपणनिराकरणमात्रं ब्रह्मणि कर्तव्यं ॥ ननु ब्र
ह्मविज्ञाने यत्नोत्पत्तिप्रसिद्धत्वादविद्याकल्पितनामरूपाविशेषाकारापहृतबुद्धित्वादत्यन्तप्रसिद्धं सुविज्ञेयतरमासन्नतममात्मतत्त्व
मप्यप्रसिद्धं दुर्विज्ञेयमतिदूरमन्यदिव च प्रतिभाति अविवेकिनां बाह्याकारनिवृत्तबुद्धीनां तु लब्धगुर्वात्मप्रसादानां नातः परं सुखं सुप्रसि

ऽस्तु विज्ञेयं स्यात्स्वतन्त्रमस्ति। तत्रोक्तं। प्रत्यक्षावगमं ध[र्म्य]मित्यादि। केचित्तु पंडितंमन्या निराकारत्वादात्मवस्तुनोऽयमिति बुद्धिरतो
दुःसाध्या सम्यग्ज्ञाननिष्ठेत्याहुः। सत्यमेवं। गुरुसंप्रदायरहितानामश्रुतवेदान्तानामत्यन्तबहिर्विषयासक्तबुद्धीनां सम्यक्प्रमाणेष्वश्र कृत
श्रमाणां तद्विपरीतानां तु लौकिकग्राह्यग्राहकद्वैतवस्तुनि सद्बुद्धिर्नितरां दुःसंपाद्यात्मचैतन्यव्यतिरेकेण वस्त्वन्तरस्यानुपलब्धेर्यथा
चैतदेवमेव नान्यथेत्यवोचाम॥ उक्तं च भगवता॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति। तस्माद्बाह्याकारभेदबुद्धिनिवृत्तिरे
वात्मस्वरूपावलम्बनकारणं। न ह्यात्मा नाम कस्यचित्कदाचिदप्रसिद्धः॥ प्राप्यो हेय उपादेयो वा। अप्रसिद्धे हि तस्मिन्नात्मनि स्वार्थाः सर्वाः प्र
वृत्तयो व्यर्थाः प्रसज्येरन्। न च देहाद्यचेतनार्थत्वं शक्यं कल्पयितुं न च सुखार्थं सुखं दुःखार्थं दुःखमात्मावगत्यवसानार्थत्वाच्च सर्वव्यवहा
रस्य। तस्माद्यथा स्वदेहस्य परिच्छेदाय न प्रमाणान्तरापेक्षा ततोऽप्यात्मनोऽन्तरंगत्वात्तदवगतिं प्रति न प्रमाणान्तरापेक्षेत्यात्मज्ञाननिष्ठा विवे
किनां सुप्रसिद्धेति सिद्धं। येषामपि निराकारं ज्ञानमप्रत्यक्षं तेषामपि ज्ञानवशेनैव ज्ञेयावगतिरिति। ज्ञानमत्यन्तप्रसिद्धं सुखादिवदेवाभ्युप
गंतव्यं॥ जिज्ञासानुपपत्तेश्चाप्रसिद्धं चेत्। ज्ञानं ज्ञेयवज्जिज्ञास्येत यथा ज्ञेयं घटादिलक्षणं ज्ञानेन ज्ञाताव्याप्तुमिच्छति। तथा ज्ञानमपि ज्ञानान्त ज्ञा तु४
रेण ज्ञाताव्याप्तुमिच्छेत्। न चैतदस्ति। अतोऽत्यन्तप्रसिद्धं ज्ञानं ज्ञाताप्यत एव प्रसिद्ध इति। तस्माज्ज्ञाने यत्नो न कर्तव्यः॥ किं त्वनात्मबुद्धि
ज्ञाने निवृत्तावेव तस्मात् ज्ञाननिष्ठा सुसंपाद्या॥ सैव ज्ञानस्य निष्ठा परा निष्ठोच्यते॥५०॥ कथं कार्येति॥ ॥बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च॥ श
३ ब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥५१॥ ॥बुद्ध्याऽध्यवसायात्मिकया विशुद्धया मायारहितया युक्तः संपन्नो धृत्या धैर्येणात्मा

३

त्मकार्यकारणसंघातं नियम्य च नियमनं कृत्वा वशीकृत्य शब्दादीन् शब्द आदिर्येषां तान् विषयांस्त्यक्त्वा सामर्थ्याच्छरीरस्थितिमात्रान् केव
लान् अनुज्ञातो ऽधिकान् सुखार्थांस्त्यक्त्वेत्यर्थः ॥ शरीरस्थित्यर्थत्वेन प्राप्तेषु च रागद्वेषौ व्युदस्य च परित्यज्य ॥५१॥ ततः ॥ ॥विविक्तसे
वी लघ्वाशी यतवाक्कायमानसः ॥ ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥५२॥ ॥अरण्यगिरिगुहादीन् विविक्तान् देशान् सेवितुं
शीलमस्येति विविक्तसेवी ॥ लघ्वाशी लघ्वशनशीलः ॥ विविक्तसेवित्वलघ्वशनशीलयोर्निद्रादिदोषनिवर्त्तकत्वेन चित्तप्रसादहेतुत्वात्
ग्रहणं ॥ यतवाक्कायमानसो वाक् च कायश्च मानसं च यतानि संयतानि यस्य ज्ञाननिष्ठस्य स ज्ञाननिष्ठो यतिः यतवाक्कायमानसः स्यात् ॥ एवमुप
रतसर्वकरणः सन् ध्यानयोगपरो ध्यानमात्मस्वरूपचिंतनं योग आत्मविषयैकाग्रीकरणं तौ ध्यानयोगौ परत्वेन कर्त्तव्यौ यस्य स ध्या
नयोगपरो नित्यं नित्यग्रहणं मंत्रजपाद्यन्यकर्त्तव्याभावप्रदर्शनार्थं ॥ वैराग्यं विरागस्य भावो दृष्टादृष्टविषयेषु वैतृष्ण्यं समुपाश्रितो नित्यमे
वेत्यर्थः ॥५२॥ किं च ॥ ॥अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं ॥ विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥५३॥ ॥अहंकरणमहंकारो दे
हादिषु तं बलं सामर्थ्यं कामरागादियुक्तं नेतरच्छरीरादिसामर्थ्यं स्वाभाविकत्वेन त्यागस्याशक्यत्वात् ॥ दर्पो हर्षानंतरभावी धर्मातिक्रमहेतु
र्हृष्टो दृप्यति दृप्तो धर्ममतिक्रामतीति स्मरणात् ॥ तं च कामम् इच्छां क्रोधं द्वेषं परिग्रहमिन्द्रियमनोदोषपरित्यागेपि शरीरधारणप्रसंगेन धर्मा
नुष्ठाननिमित्तेन वा बाह्यः परिग्रहः प्राप्तस्तं च मुक्तं विमुच्य परित्यज्य परमहंसपरिव्राजको भूत्वा देहजीवनमात्रेपि निर्गतममभावो निर्ममः अत एव
शांत उपरतः हर्षायासो यतिर्ज्ञाननिष्ठो ब्रह्मभूयाय ब्रह्मभावाय कल्पते समर्थो भवति ॥५३॥ अनेन क्रमेण ॥ ॥ब्र ह्मभूतः प्रसन्ना

चा॰ ५

त्मा न शोचति न कांक्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ॥५४॥ ॥ब्रह्मभूतो ब्रह्मप्राप्तः प्रसन्नात्मा लब्धाध्यात्मप्र
साद स्वभावो न शोचति ॥ न किंचिदर्थवैकल्यमात्मनो वैगुण्यं वोद्दिश्य शोचति न संतप्यते ॥ न कांक्षति न ह्यप्राप्तविषयाकां
क्षा ब्रह्मविद उपपद्यते ॥ अतो ब्रह्मभूतस्यायं स्वभावो ह्युत्पद्यते न शोचति न कांक्षतीति । न हृष्यतीत्यपि पाठः ॥ समः सर्वेषु भूतेषु आ
त्मौपम्येन सर्वभूतेषु सर्वसुखं वा दुःखं वा सममेव पश्यतीत्यर्थः न तु आत्मसमदर्शनमिह तस्य वक्ष्यमाणत्वात् भक्त्या मामभिजानातीति । य एवंभू
तो ज्ञाननिष्ठो मद्भक्तिं मयि परमेश्वरे भक्तिं भजनं परां उत्तमां ज्ञानलक्षणां चतुर्थीं लभते ॥५४॥ चतुर्विधा भजंते मामिति ह्युक्तं ततो ज्ञानल
क्षणया ॥ भ क्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं ॥५५॥ भक्त्या मामभिजानाति इत्यक्ष
रेण न भजनेन स्वयं यावान् अहमुपाधिकृतविस्तरभेदो यश्चाहं विध्वस्तसर्वोपाधिभेद उत्तमः पुरुषः आकाशकल्पस्तं मामद्वैतं चैतन्यमात्रैक
रसमजरममरमभयमनिधनं तत्त्वतो ऽभिजानाति ततो मामेवं तत्त्वतो ज्ञात्वा विशते तदनंतरं मामेव ॥ नात्र ज्ञानानंतरप्रवेशक्रिये भिन्ने
विवक्षिते विशते तदनंतरमिति । किं तर्हि फलांतराभावात् ॥ ज्ञानमात्रमेव । क्षेत्रज्ञं चापि मां विद्धि इत्युक्तत्वात् । ननु विरुद्धमिदमुक्तं ज्ञा
नस्य या परा निष्ठा तया मामभिजानातीति ज्ञानमिति ज्ञाननिष्ठां ज्ञानावृत्तिलक्षणामपेक्षते तरति । ततश्च ज्ञानेन नत्वाभिजानातीति ज्ञा
नावृत्त्या तु ज्ञाननिष्ठयाभिजानातीति नैष दोषो ज्ञानस्य स्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्य प्रतिपक्षविहीनस्य यदात्मानुभवनिश्चयावसा
नत्वं तस्य निष्ठाशब्दाभिलापात् ॥ शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सहकारिकारणं बुद्धिविशुद्धत्वादिमानित्वादिगुण
रतिकर्षं विरुद्धमिति चेदुच्यते ॥ यदेव यस्मिन्विषये ज्ञानमुत्पद्यते ज्ञातृस्तु देवतं विषयम

भिजानाति च.

३

गणादिचापेक्ष्य जति तस्य हेत्वसपरमात्मैकत्वज्ञानस्य कर्त्रादिकारकभेदबुद्धिनिबंधनसर्वकर्मसंन्याससहितस्य स्वात्मानुभवनि
श्चयरूपेण यदवस्थानं सा परा ज्ञाननिष्ठा इत्युच्यते। सेयं ज्ञाननिष्ठा आर्त्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिः। इत्युक्ता तया परया भ
क्त्या भगवंतं तत्त्वतोऽभिजानाति। तदनंतरमेवेश्वरक्षेत्रज्ञभेदबुद्धिरशेषतो निवर्त्तते अतो ज्ञाननिष्ठालक्षणया भक्त्या मामभिजा
नातीति वचनं न विरुध्यते॥ तत्र च सर्वं निवृत्तिविधायिशास्त्रं वेदांतेतिहासपुराणस्मृतिलक्षणं अर्थवद्भवति। विदित्वा व्युत्थाय
अथ भिक्षाचर्यं चरंति। न्यासमेषां तपसामतिरिक्तमाहुः न्यास एवात्यरेचयदिति॥ संन्यासः कर्मणां न्यासो वेदानिमं च
लोकममुं च परित्यज्य॥ त्यज धर्ममधर्मं चेत्यादीति तत्र दर्शितानि वाक्यानि॥ न च तेषां वाक्यानामानर्थक्यं युक्तं॥ न चार्थवादत्वं
स्वप्रकरणस्थत्वात्प्रत्यगात्माविक्रियस्वरूपनिष्ठत्वाच्च मोक्षस्य न हि पूर्वसमुद्रं जिगमिषोः प्रातिलोम्येन प्रत्यक्समुद्रं जिगमि
षुणा समानमार्गत्वं संभवति॥ प्रत्यगात्मविषयप्रत्ययसंतानकरणाभिनिवेशश्च ज्ञाननिष्ठा सा च प्रत्यक्समुद्रगमनवत्कर्मणा
सहभावित्वेन विरुध्यते॥ पर्वतसर्षपयोरिवांतरवान्विरोधः प्रमाणविदां निश्चितः तस्मात्सर्वकर्मसंन्यासेनैव ज्ञाननिष्ठा कार्येति सिद्धं
॥५५॥ स्वकर्मणा भगवतोऽभ्यर्चनभक्तियोगस्य सिद्धिप्राप्तिः फलं ज्ञाननिष्ठायोग्यता यन्निमित्ता ज्ञाननिष्ठा मोक्षफलावसाना स भगवद्भक्ति
योगोऽधुना प्रस्तूयते॥ सर्वशास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थनिश्चयदार्ढ्याय॥ ॥सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः॥ मत्प्र मा ३
सादादवाप्नोति शाश्वतं पदमव्ययं॥५६॥ सर्वकर्माणि प्रतिषिद्धान्यपि सदा कुर्वाणोऽनुतिष्ठन् मद्व्यपाश्रयोऽहं वासुदेव ईश्वरो व्यपा

श्रयो यस्य स मद्व्यपाश्रयो मत्यर्पितसर्वात्मस्वभावस्त्वर्थः ॥ सोपि मत्प्रसादात्परमेश्वरस्य प्रसादादवाप्नोति शाश्वतं नित्यं वैष्णवं पद
मव्ययं ॥५६॥ यस्मादेवं तस्मात् ॥ ॥चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ॥ बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥५७॥ चेतसा विवेक
बुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि मयीश्वरे संन्यस्य यत्करोषि यदश्नासीत्युक्तन्यायेन मत्परो ऽहं परो यस्य तव स त्वं मत्परः सन् बुद्धि
योगमवसमाहितबुद्धित्वं बुद्धियोगस्तं बुद्धियोगमुपाश्रित्य अनन्यशरणत्वं मच्चित्तो मय्येव चित्तं यस्य त्वं मच्चित्तः सततं सर्वदा भव
॥५७॥ ॥मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यति ॥ अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ॥५८॥ मच्चित्तः सर्वदुर्गाणि दुस्तराणि संसार
हेतुजातानि मत्प्रसादात्तरिष्यसि अतिक्रमिष्यसि ॥ अथ चेद्यदि त्वं मदुक्तमहंकारात्पंडितोहमिति न श्रोष्यसि न ग्रहीष्यसि ततस्त्वं विनंक्ष्य
सि विनाशं गमिष्यसि ॥५८॥ इदं च त्वया न कर्तव्यं स्वतंत्रोऽहं किं परवशः परोक्तं करिष्यामीति ॥ ॥यदहंकारमाश्रित्य न योत्स्य इति मन्य
से ॥ मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥५९॥ ॥यच्चैतत्त्वमहंकारमाश्रित्य न योत्स्य इति युद्धं न करिष्यामीति मन्यसे चिंतयसि निश्च
यं करोषि मिथ्यैष व्यवसायो निश्चयः ते तव यस्मात्प्रकृतिः क्षत्रस्वभावस्त्वां नियोक्ष्यति ॥५९॥ ॥यस्माच्च ॥ ॥स्वभावजेन कौन्तेय निबद्धः स्वेन
कर्मणा ॥ कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत् ॥६०॥ ॥स्वभावजेन शौर्यादिना यथोक्तेन कौंतेय निबद्धो निश्चयेन बद्धः स्वेनात्मी
येन कर्मणा ॥ कर्तुं नेच्छसि यत्कर्म मोहादविवेकतः ॥ करिष्यस्यवशोपि परवशएव तत्कर्म ॥६०॥ यस्मात् ॥ ईश्वरः सर्वभूतानां हृद्देशे
ऽर्जुन तिष्ठति ॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥६१॥ ॥ईश्वरः ईशनशीलः नारायणः सर्वभूतानां सर्वप्राणिनां हृद्देशे हृ

द्यदेशे हेर्ज्जुन॥ भूतानां तरात्मस्वभावो विष्णुर्भूतः कारण इति अहं च राम महर्ज्जुनं चेति दर्शनात् तिष्ठति स्थितिं लभते॥ स कथं तिष्ठतीत्य
ह। भ्रामयन् सर्वभूतानि भ्रमणं कारयन् सर्वभूतानि यंत्रारूढानि अधिष्ठितानि इवेतीवशब्दो दृष्टान्तो यथा दारुकृतपुरुषादीनि यंत्रारू
ढानि मायया छद्मना भ्रामयन् तिष्ठतीति संबंधः॥६१॥ ॥तमेव शरणं गच्छ सर्वभावेन भारत॥ तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शा
श्वतम्॥६२॥ तमेवेश्वरं शरणं आश्रयं संसारार्त्तिहरणाय गच्छ आश्रय सर्वभावेन सर्वात्मना हे भारत तत्प्रसादादीश्वरानुग्रहात्परां
प्रकृष्टां शांतिं परामुपरतिं स्थानं च मम विष्णोः परमं पदमवाप्स्यसि शाश्वतं नित्यं॥६२॥ ॥इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया॥ विमृ
श्यैतदशेषेण यथेच्छसि तथा कुरु॥६३॥ इत्येतत्ते तुभ्यं ज्ञानमाख्यातं कथितं। गुह्याद्गोप्यात् गुह्यतरमतिशयेन गुह्यं रहस्यमित्यर्थः॥
मया सर्वज्ञेन सर्वं विमृश्य विमर्शनमालोचनं कृत्वैतद्यथोक्तं शास्त्रमशेषेण समस्तं यथोक्तं चार्थजातं यथेच्छसि तथा कुरु॥६३॥ भूयोपि म
येच्यमानं शृणु॥ ॥सर्वगुह्यतमं भूयः शृणु मे परमं वचः॥ इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितं॥६४॥ सर्वगुह्यतमं सर्वगुह्येभ्यो
ऽत्यंतरहस्यं मुक्तमप्युक्तमपि सकृद्भूयः पुनः शृणु मे मम परमं प्रकृष्टं वचो वाक्यं न भयान्नाप्यर्थकारणाद्वा वक्ष्यामि। किं तर्हि इष्टः प्रियोसि मे म
म दृढमव्यभिचारेणेति कृत्वा ततस्तेन कारणेन वक्ष्यामि कथयिष्यामि ते तव हितं परं ज्ञानप्राप्तिसाधनं तद्धि सर्वहितानां हिततमं॥६४॥ ॥
किंच॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे॥६५॥ ॥मन्मना भव मच्चित्तो भव मद्भक्तो भव म
द्भजनो भव। मद्याजनशीलो भव। मां नमस्कुरु नमस्कारमपि ममैव कुरु। तत्रैवं वर्त्तमानो वासुदेवसमर्पितसाध्यसाधनप्रयोजनो मामे

वएष्य सि आगमिष्यसि सत्यं ते तव प्रतिजाने सत्यां प्रतिज्ञां करोम्यस्मिन्वस्तुनीत्यर्थः॥ यतः प्रियोऽसि मे। एवं भगवतः सत्यं प्रतिज्ञातं
बुध्वा भगवद्भक्तेरवश्यंभावि मोक्षफलमवधार्य भगवच्छरणैकपरायणो भवेदिति वाक्यार्थः॥६५॥ सर्वकर्मयोगनिष्ठायाः परमं रहस्यमी
श्वरशरणतामुपसंहृत्याथेदानीं कर्मयोगत्यागनिष्ठाफलं सम्यग्दर्शनं सर्ववेदांतविहितं वक्तव्यमित्याह॥ ॥सर्वधर्मान्परित्यज्य मामे
कं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥६६॥ ॥सर्वधर्मान् सर्वे च ते धर्माश्च तान् सर्वधर्मान् धर्मशब्देन चात्राधर्मो
पि गृह्यते। नैष्कर्म्यस्य विवक्षितत्वात्। नाविरतो दुश्चरितान्मुच्यते॥ त्यज धर्ममधर्मं चेत्यादिश्रुतिस्मृतिभ्यः। सर्वधर्मान्परित्यज्य संन्य
स्य सर्वकर्माणि इत्येतत्। मामेकं सर्वात्मानं समं सर्वभूतस्थं ईशमहमेवेत्येवमेकं शरणं व्रज॥ न मत्तोऽन्यदस्तीत्यवधारयेत्यर्थः॥ अहं त्वामे
वं निश्चितबुद्धिं सर्वपापेभ्यः सर्वधर्माधर्मबंधनरूपेभ्यो मोक्षयिष्यामि इति स्वात्मभावप्रकाशीकरणेन॥ उक्तं च॥ नाशयाम्यात्मभावस्थो ज्ञा
ज्ञान दीपेन भास्वता इत्यतो मा शुचः शोकं मा कार्षीः। अस्मिन् गीताशास्त्रे परं निःश्रेयससाधनं निश्चितं किं ज्ञानं किं वा कर्म आहोस्विदुभयमिति॥
कुतः संशयः॥ यज्ज्ञात्वाऽमृतमश्नुते॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरमित्यादीनि वाक्यानि केवलज्ञानान्निःश्रेयसप्राप्तिं दर्शयंति॥ कर्मण्येवा
धिकारस्ते कुरु कर्मैवेत्यादीनि कर्मणामवश्यकर्तव्यतां दर्शयंति॥ एवं ज्ञानकर्मणोः कर्तव्यत्वोपदेशात्॥ समुच्चितयोरपि निःश्रेयसहेतुत्वं स्यादि
ति भवेत्संशयः॥ किं पुनरत्र मीमांसाफलं॥ नन्वेतदेषामन्यतमस्य परमनिःश्रेयससाधनत्वावधारणमतो विस्तीर्णतरं मीमांस्यमेतत्॥ तच्चात्मज्ञान
स्य तु केवलस्य निःश्रेयसहेतुत्वं भेदप्रत्ययनिवर्तकत्वेन केवल्यफलावसानत्वात् क्रियाकारकफलभेदबुद्धिरविद्ययात्मनि नित्यप्रवृत्ता मम कर्मा
हं कर्ता अहममुष्मै फलायेदं कर्म करिष्यामीतीयमविद्याऽनादिकालप्रवृत्ता अस्या अविद्याया निवर्तकमयमहमस्मि केवलोऽकर्ताक्रियोऽफलो

एवं विचारमवतार्य सिद्धांतं संगृह्णाति

अतो २

१२६ गीताभाः

नमत्तो न्यो॥ रूं कश्चिदित्येवं रूपमात्मविषयं ज्ञानमुत्पद्यमानं कर्मप्रवृत्तिहेतुभूताया भेदबुद्धेर्निवर्त्तकत्वात्॥ तस्माद्यः पदाव्याकृत्यर्थः न के
वलेभ्यः कर्मभ्यो न च ज्ञानकर्मभ्यां समुच्चिताभ्यां निःश्रेयसप्राप्तिरिति पदद्वयं निवर्त्तयति॥ अकार्यत्वाद्धि निःश्रेयसस्य कर्मसाधनत्वानुपपत्तेर्न हि
नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते। केवलं ज्ञानमप्यनर्थकं तर्हि न। अविद्यानिवर्त्तकत्वे सति दृष्टकैवल्यफलावसानत्वात्। अविद्यातमोनिवर्त्त
कस्य ज्ञानस्य दृष्टं कैवल्यफलावसानत्वं। रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्त्तकप्रदीपप्रकाशफलवद्धि निवृत्तसर्पविकल्परज्जुकैव
ल्यावसानं हि प्रकाशफलं तथा दृष्टार्थानां च छिदिक्रियाग्निमथनादीनां व्यापृतकर्त्रादिकारककानां द्वैधीभावाग्निदर्शनादिफलादन्यफले क
र्मान्तरे वा व्यापारानुपपत्तिर्यथा तथा ज्ञाननिष्ठाक्रियायां दृष्टार्थायां व्यापृतस्य ज्ञात्रादिकारकस्यात्मकैवल्यफलादन्यफले कर्मान्तरे वा
प्रवृत्तिरनुपपन्नेति न ज्ञाननिष्ठा कर्मसहिता उपपद्यते। अग्निहोत्रादिक्रियावत्स्यादिति चेन्न कैवल्यफले ज्ञाने क्रियाफलार्थित्वा वृत्तिज्ञानेन
नुपपत्तेः॥ कैवल्यफले हि ज्ञाने प्राप्ते सर्वतः संप्लुतोदके फले कूपतडागादिक्रियाफलार्थित्वाभाववत्फलान्तरे तत्साधनायां वा क्रियायां अर्थित्वा
नुपपत्तेः। न हि राज्यप्राप्तिफले कर्मणि व्यापृतस्य क्षेत्रप्राप्तिफले व्यापारे उपपत्तिस्तद्विषयं वार्थित्वं। तस्मान्न कर्मणोस्ति निःश्रेयससाधनत्वं। न च ज्ञा स ४
नकर्मणोः समुच्चितयोरपि ज्ञानस्य कैवल्यफलस्य कर्मसाहाय्यापेक्षा। अविद्यानिवर्त्तकत्वे न च विरोधात्। न हि तमस्तमसो निवर्त्तकमतः केवल
मेव ज्ञानं निःश्रेयससाधनमिति॥ नन्वनित्याकरणे प्रत्यवायप्राप्तेः कैवल्यस्य च नित्यत्वात् तदुत्पत्त्या वा केवलज्ञानात्कैवल्यप्राप्तिरित्ययुक्तं। तदसत्
यतो नित्यानां कर्मणामकृत्यज्ञानामकरणे प्रत्यवायो नरकादिप्राप्तिलक्षणः स्यात्॥ नन्वेवं तर्हि कर्मभ्यो मोक्षो नास्तीत्यनिर्मोदाएवानेबदोबेदि
कर्मसाहित्यं ज्ञाननिष्ठायां दृष्टं तेन साधनैषयन्वाशंकते नन्विति ननु क्रियाणां लौकिकानां वैदिकानामग्निहोत्रादिक्रियापापाः स्वरूपानुष्ठानवदग्निहोत्रादिक्रियापा ज्ञाननिष्ठ
याः फलार्थित्वमिति पर्यः॥ ३॥ नन्विति फले तत्प्राप्तव्ये प्राप्ते स्वर्गादौ तदर्थं अग्निहोत्रादावर्थित्वं दृष्टं पुनस्तत्र कर्मसाहित्यं न तथा मुक्तिफलज्ञाननिष्ठालाभे स्वर्गादौ तदर्थित्वं वा १२६ गीभाः
कर्मण्यपेक्षितं तेन ज्ञाननिष्ठाकर्मणो न साहित्यमिति परिहृदयानेति॥ ६॥

ग्न्यादिपापयितव्ये चोडावर्द्धनादि [illegible] वचनेन स्वप्रकरणस्थानां च सत्त्वादेव प्रामाण्यसिद्धिः। प्रागात्मज्ञानात् देहाभिमाननिमित्तप्र
त्ययत्वादि प्रामाण्यवत्। यत्तु मन्यसे स्वयमव्यापृयमाणोप्यात्मा संनिधिमात्रेण करोतीति तदेव मुख्यं कर्तृत्वमात्मनो यथा राजा युध्यमानेषु यो
धेषु युध्यत इति प्रसिद्धं। स्वयमयुध्यमानोपि संनिधानादेव जितः पराजित इत्युच्यते तथा सेनापतिर्विचेव करोति क्रियाफलसंबंधश्च राज्ञः
सेनापतेश्च दृश्यते यथा ऋत्विक्कर्म यजमानस्य। तथा देहादीनां कृतं कर्म आत्मकृतं स्यात् फलस्यात्मगामित्वाच्च यथा वा भ्रामकस्य लोहभ्राम
यितृत्वादव्यापृतस्यैव मुख्यमेव कर्तृत्वं तथा चात्मन इति। तदसत्। अकुर्वतः कारकत्वप्रसंगात्। कारकमनेकप्रकारमिति चेन्न। राजप्रभृती
नां मुख्यस्यापि कर्तृत्वस्य दर्शनात्। राजा तावत् स्वव्यापारेणापि युध्यते। योधानां च योधयितृत्वेन धनदाने च मुख्यमेव कर्तृत्वं। तथा जयप
राजयफलोपभोगेन। तथा यजमानस्यापि प्रधानत्यागेन दक्षिणादानेन च मुख्यमेव कर्तृत्वं तस्मादव्यापृतस्य कर्तृत्वोपचारो यः स गौण
स्त्ववगम्यते। यदि मुख्यमत्य कर्तृत्वस्याव्यापारल[illegible]दाणेनोपलभ्यते। राजयजमानप्रभृतीनां तथा संनिधिमात्रेणापि कर्तृत्वं मुख्यं
परिकल्प्येत। यथा [illegible] भ्रामकस्य लोहभ्रामणेन। तथा राजयज[illegible]मानादीनां स्वव्यापार उच्यते। तस्मात्संनिधिमात्रेण कर्तृत्वं गौणमेव त
था चूक्तमिति तत्फलसंबंधोपि गौण एवास्यात्। न गौणेन मुख्यं कार्यं निर्वर्त्यते। तस्मादस[illegible]देवैतदुच्यते। देहादीनां व्यापारेणाव्यापृतस्यात्मा
कर्तृत्वं भोक्तृत्वं चास्यादिति भ्रान्तिनिमित्तं तु सर्वं चोपपद्यते। यथा स्वप्ने मायया चैवं न च देहाद्यात्मप्रत्ययभ्रान्तिसंतानविच्छेदेषु सुषुप्तसमाध्यादि
षु कर्तृत्वभोक्तृत्वाद्यनर्थ उपलभ्यते। तस्माद्भ्रा[illegible]न्तिप्रत्ययनिमित्त एवायं संसार[illegible]भ्रमः। न तु परमार्थ इति सम्यग्दर्शनादत्यन्तमेवो

रोनोपल
भ्यते। छि

परम इति सिद्धं ॥ अस्मिन्शास्त्रे श्रुते चावधारिते संसारोच्छित्तिर्भवतीति भावः ॥ ६६ ॥ सर्वगीताशास्त्रार्थमुपसंहृत्यास्मिन्नध्याये विशे-
षतः श्रोतॄनिह शास्त्रार्थदार्ढ्याय संक्षेपत उपसंहारं कृत्वाथेदानीं शास्त्रसंप्रदायविधिमाह ॥ ॥ इदं ते नातपस्काय नाभक्ताय
कदाचन ॥ न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७ ॥ ॥ इदं शास्त्रं ते तव हिताय मयोक्तं संसारविच्छित्तये अतपस्काय इदं तेऽतप-
स्काय तपोरहिताय न वाच्यं इति व्यवहितेन संबध्यते। तपस्विनेऽप्यभक्ताय गुरौ देवे च भक्तिरहिताय कदाचन कस्यांचिदप्यवस्थायां न वा-
च्यं। भक्तो तपस्व्यपि सन्नशुश्रूषुर्यो भवति तस्मा अपि न वाच्यं। न च यो मां वासुदेवं मनुष्यं प्राकृतं मत्वाभ्यसूयति आत्मप्रशंसादिदोषाध्या-
रोपणेन ईश्वरत्वमजानन्न सहते असावप्ययोग्यस्तस्मा अपि न वाच्यं ॥ भगवति अनसूयायुक्ताय च तपस्विने भक्ताय शुश्रूषवे च वाच्यं ॥
शास्त्रमिति सामर्थ्याद्गम्यते। तत्र मेधाविने तपस्विने वेत्यनयोर्विकल्पदर्शनात् शुश्रूषाभक्तियुक्ताय तपस्विने तद्युक्ताय मेधाविने वा वाच्यं ॥
शुश्रूषाभक्तियुक्ताय न तपस्विने नापि मेधाविने वाच्यं। भगवत्यसूयायुक्ताय समस्तगुणवतेऽपि न वाच्यं। गुरुशुश्रूषाभक्तिमते च वाच्यं ॥ इत्येष
शास्त्रसंप्रदायविधिः ॥ ६७ ॥ संप्रदायस्य कर्तुरिदानीमाह ॥ ॥ य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंश-
यः ॥ ६८ ॥ य इमं यथोक्तं परमं परं निःश्रेयसार्थं केशवार्जुनयोः संवादरूपं ग्रंथं गुह्यं गोप्यं मद्भक्तेषु मयि भक्तिमत्स्वभिधास्यति वक्ष्यति ग्रंथतोऽर्थ-
तश्च स्थापयिष्यतीत्यर्थः ॥ यथा त्वयि मयि भक्तेः पुनर्ग्रहणात् भक्तिमात्रेण केवलेन शास्त्रसंप्रदाने पात्रं भवतीति गम्यते। कथमभिधास्य-
तीत्युच्यते। भक्तिं मयि परां कृत्वा भगवतः परमगुरोः शुश्रूषा मया क्रियत इत्येवं कृत्वेत्यर्थः। तस्येदं फलं मामेवैष्यति मुच्यत एवासंशयो

त कर्त्तव्यः ॥६८॥ किंच ॥ ॥न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ॥ भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥६९॥ ॥न च तस्माच्छा
स्त्रसंप्रदायकर्तुः मनुष्येषु मनुष्याणां मध्ये कश्चिन्मे मम प्रियकृत्तमः अतिशयेन प्रियकृत्तमोऽन्यः प्रियकृत्तमो नास्त्येवेत्यर्थः ॥ वर्त्तमानेषु भ
विता भविष्यत्स्वपि तस्माद्द्वितीयोऽन्यः प्रियतरो भुवि लोकेऽस्मिन् ॥६९॥ योऽपि ॥ ॥अध्येष्यते च य इमं धर्म्यं संवादमावयोः ॥ ज्ञानयज्ञेन तेना
हमिष्टः स्यामिति मे मतिः ॥७०॥ ॥अध्येष्यते पठिष्यति च य इमं धर्म्यं धर्मादनपेतं संवादरूपं ग्रन्थमावयोस्तेनेदं कृतं स्यात् ॥ ज्ञानयज्ञे
न विधियज्ञो जपो उपांशुर्मानसश्च यज्ञानां ज्ञानयज्ञो मानसत्वाच्च विशिष्टतमस्त्वतस्तेन ज्ञानयज्ञेन गीताशास्त्राध्ययनेनैव तत्फलं विधिरेव वा
देवतादिविषयज्ञानयज्ञफलं तुल्यमस्य भवतीति । तेनाध्ययनेनाहमिष्टः पूजितः स्यां भवेयमेव मम मतिर्निश्चयः ॥७०॥ ॥अथ श्रोतुरि
दं फलं ॥ ॥श्रद्धावाननसूयश्च शृणुयादपि यो नरः ॥ सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मिणाम् ॥७१॥ ॥श्रद्धावान् श्रद्दधानोऽनसू
यश्च असूयावर्जितः सन् इमं ग्रन्थं श्रवणादपि यो नरोऽपि शब्दात् किमुतार्थज्ञानवान् ॥ सोऽपि मुक्तः पापात् शुभान् लोकान् प्राप्नुयात् पुण्यकर्मि
णामग्निहोत्रादिकर्मवतां ॥७१॥ ॥शिष्यस्य शास्त्रार्थसंग्रहणाविवेकबुद्ध्यास्य पृच्छति । तदग्रहणे ज्ञाते पुनर्ग्राहयिष्याम्युपायान्तरेणेति ॥ य
द्गुरुर्शिष्यो यत्नोत्तरं च स्थापयित्वा ॥ शिष्यः कृतार्थः कर्त्तव्य इत्याचार्यधर्मः प्रदर्शितो भवति ॥ ॥कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ॥
कच्चिदज्ञानसंमोहः प्रणष्टस्ते धनंजय ॥७२॥ ॥कच्चित्किमेतन्मयोक्तं श्रुतं श्रवणेनावधारितं ॥ पार्थ किं त्वया एकाग्रेणैकतया एका
ग्रेणाचित्तेन किं वा प्रमादितं । कच्चिदज्ञानसंमोहो ज्ञाननिमित्तः संमोहो । विचित्तभावो । विवेकता स्वाभाविकः किं प्रनष्टः । यदर्थोऽयं शास्त्रश्र

१२१
गी॰ भा॰

वणायास्सस्तव मम चोपदेश्रुत्वायासः संवृत्तस्ते तु ध्यं धनंजयः॥७२॥ अर्जुन उवाच॥ ॥नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत॥
स्थितोस्मि गतसंदेहः करिष्ये वचनं तव॥७३॥ नष्टो मोहो ऽज्ञानजः समस्तसंसारानर्थहेतुः सागर इव दुस्तरः स्मृतिश्चात्मतत्त्वविष
या लब्धा यस्या लाभात् सर्वग्रंथीनां विप्रमोक्षः त्वत्प्रसादात् तव प्रसादात् मया त्वत्प्रसादमाश्रितेन अच्युत दासेन तेन मोहनाश प्रश्न प्र
तिवचनेन सर्वशास्त्रार्थज्ञानफलमेतावदेवेति निश्चितं दर्शितं भवति यदुत अज्ञानसंमोहनाश आत्मस्मृतिप्रतिलंभश्चेति तथा च
श्रुतौ वनात्मविच्छोचामीत्युपन्यस्यात्मज्ञानेन सर्वग्रंथविप्रमोक्ष उक्तः भिद्यते हृदयग्रंथिः तत्र को मोहः शोक एकत्वमनुपश्यतः
इति च मंत्रवर्णाः अथेदानीं त्वच्छासने स्थितोस्मि गतसंदेहो मुक्तसंशयः करिष्ये वचनं तवाहं त्वत्प्रसादादर्थोन मम कर्तव्यमस्तीत्य
भिप्रायः॥७३॥ परिसमाप्तः सकलो शास्त्रार्थः अथेदानीं कथासंबंधप्रदर्शनार्थं॥ संजय उवाच॥ ॥इत्यहं वासुदेवस्य पार्थस्य च
महात्मनः॥ संवादमिममश्रौषमद्भुतं रोमहर्षणं॥७४॥ ॥इत्येवमहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिमं यथोक्तमश्रौषं श्रु
तवानस्मि॥ अद्भुतमत्यंतविस्मयकरं रोमहर्षणं रोमांचनकरं॥७४॥ तमेव॥ ॥व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परं॥ योगं योगे
श्वरात्कृष्णात्साक्षात्कथयतः स्वयम्॥७५॥ व्यासप्रसादात्ततो दिव्यचक्षुर्लाभात् श्रुतवानिमं संवादं गुह्यमहं परं योगं योगार्थत्वात्॥ सं
वादमिमं योगमेव वा योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं॥ न परंपरातः॥७५॥ ॥राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतं॥ केश
वार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः॥७६॥ ॥राजन् धृतराष्ट्र॥ संस्मृत्य संस्मृत्य संवादमिममद्भुतं॥ केशवार्जुनयोः पुण्यं श्रव

१२१
गी॰ भा॰